CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ यः कामयेत पुनर्नप्रत्याजायेयमिति रात्रिं प्रपद्ये
पुनर्भूं मयोभूं कन्याङ् शिखण्डिनीं पाशहस्तां युवतिं
कुमारिणीमादित्यश्चक्षुषे वातः प्राणाय सोमो गंधर्वापाक्षे-
भ्यो मनोनुज्ञाय पृथिव्यै शरीरङ् साहन्नुवाचास्मिन्संवत्सरे
मरिष्यन्नस्मिन्मनसि कृतावस्मिन्नासेस्मिन्नहृदये
स्मिन्नाहश रात्रे स्मिन्षड्रात्रे स्मिंङ् लोके स्मिन् डिरात्रे
स्मिंन्नहोरात्रे स्मिन्नहन्यस्माङ् रात्रावस्यां वेलायां मुहू-
र्त्ते मरिष्यसेहि स्वर्गं लोकं गच्छ देवलोकं वा ब्रह्म-
लोकं वा क्षत्रलोकं वा विशेचमानस्तिष्ठ विशेचमानमेहि
योनिं प्रविशनाहं योनिं प्रवेक्ष्यामि मृतो मयोया ब्रह्मणा-
दिष्टः सङ् राग वल्लोपा जायते म्रियते संधीयते च
राजिस्तु मा पुनातु रात्रिः स्वर्गेतमुष्यां ते मा मुष्याका-
काशं तत्र ते स्थानं कृत्वा पुनर्भवाय पुनर्जन्मने एतावद-
देव रात्रौ रात्रेर्व्रतं च रात्रेर्व्रतं च ।

सामविधान तृतीय प्रपाठक अध्याय

पं. श्रीगोहित्तः सामवेदीयः त्रिपाठी

पं. श्रीदेवकृष्ण त्रिपाठी याज्ञवल्क्यः वाराणसी

पं. उमाकृष्णः त्रि.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सामवेदसंहिता

(आग्नेयं पर्व)

श्री १०८ ईश्वर मठ
पुस्तकालय,
मुमुक्षु भवन, वाराणसी

श्रीसत्यचरण-राय-देवशर्म्म-साङ्ख्यवेदान्तवेदतीर्थ-
कृताधियाज्ञिकाध्यात्मिकभाष्यान्वयपदपाठव्याकरणा-
द्युपेता विविधटिप्पनीसमलङ्कृता च ।

प्रथमावृत्तिः ।

१९२

श्री १०८ ईश्वर मठ
पुस्तकालय,
मुमुक्षु भवन, वाराणसी

सर्वाधिकाराः संरक्षिताः]

[मूल्यं सार्द्धैकरूप्यकम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ओ३म्

श्री १०८ ईश्वर मठ पुस्तकालय

विज्ञप्तिः

ॐ 'विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रं तन्न आसुव' (यजुः)
'नावेदविन्मनुते तं बृहन्तम्' (तैत्तिरीयब्रा०)।

यथा पिता स्वसन्ततिं प्रति सदैव करुणां दधाति तथा परमपिता परमेश्वरो मनुष्याणां धर्मार्थकाममोक्षसिद्धये तद्विपरीतार्थपरिहाराय च ऋग्यजुस्सामाथर्वसंज्ञकान् चतुर्वेदान् प्रकाशितवान् (२८ मन्त्रव्याख्या द्रष्टव्या)। विदन्ति जानन्ति विद्यन्ते भवन्ति विन्दन्ति लभन्ते विन्दते विचारयन्ति सर्वे मनुष्याः सर्वाः सत्यविद्या यैर्येषु वा ते वेदाः। तथा च सायणः—'इष्टप्राप्तानिष्टपरिहारयोरलौकिकमुपायं यो वेदयति स वेदः'। स्मर्यते च मनुना 'वेदोऽखिलो धर्ममूलम्' (२।६) इति।

वेदानामीश्वरोक्तत्वे नित्यत्वे च भूयांसि प्रमाणानि सन्ति। प्रथमं तु परमात्मनः सकाशात्तेषां वेदानां प्रकाशे सति स्वत एव तेषां नित्यत्वं भवति। तथा च वेदे 'तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे। छन्दाँसि जज्ञिरे तस्माद्यजुस्तस्मादजायत' (ऋ० ८।४।१८) —तस्मात्सर्वपूज्याद्यज्ञपुरुषात्परमात्मनश्चतुर्वेदा उत्पन्ना इति संक्षिप्तोऽर्थः। अपरन्तु 'यस्मादृचो अपातक्षन्यजुर्यस्मादपाकषन्। सामानि यस्य लोमान्यथर्वाङ्गिरसो मुखम्। स्कम्भं तं ब्रूहि कतमः स्विदेव सः' (अथर्व० १०।४।७)—कीदृशः स ईश्वरो यस्मादृग्वेदः समुत्पन्नो यजुर्वेदः प्रादुर्भूतः सामानि यस्य लोमानीवाथर्ववेदो यस्य मुखमिव मुख्य इति ? अस्योत्तरमाह—तं जगद्धारकं विजानीहि। अपरमपि 'तस्मै नूनमभिद्यवे वाचा विरूप ! नित्यया वृष्णे चोदय सुष्टुतिम्' (ऋ० ६।५।२५)—हे विविधरूपयुक्ताग्ने ! त्वं सर्वतो द्योतमानाय कामानां वर्षयित्रे तस्मै परमात्मने नित्यया वैदिकमन्त्ररूपया वाचास्माभिः क्रियमाणां शोभनां स्तुतिं सर्वथा प्रेरय। तथा निरुक्ते 'पुरुषविद्यानित्यत्वात्कर्मसम्पत्तिर्मन्त्रो वेदे' (१।२।७)। पूर्वमीमांसायाम् 'नित्यस्तु स्याद्दर्शनस्य परार्थत्वात्' (१।१।१८)। वेदान्ते 'शास्त्रयोनित्वात्' 'अतएव च नित्यत्वम्' (१।१।३॥१।३।२८)। न्यायदर्शने 'मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्' (२।१।६७)। योगदर्शने 'स एष पूर्वेषामपि गुरुः कालेनानवच्छेदात्' (१।१।२६)। सांख्ये 'निजशक्त्यभिव्यक्तेः स्वतः प्रामाण्यम्' (५।५१)। वैशेषिके 'तद्वचनादाम्नायस्य प्रामाण्यम्' (१।१।३)। महाभाष्येऽपि 'नित्याः शब्दा नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिरिति'

विज्ञानकर्मोपासनाज्ञानकाण्डभेदाच्चत्वारो विभागा वेदानां सन्ति। ऋग्भिर्ऋचन्ति स्तुवन्ति, यजुर्भिर्यजन्ति, सामभिर्गायन्ति, अथर्वभिरतिकर्मा तत्र निषेधः (नि० ११।१९।१)।

'माहाभाग्याद्देवताया एक आत्मा बहुधा स्तूयते' 'एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति' 'कर्मजन्मानः' 'आत्मजन्मानः' 'आत्मवेषा रथो भवत्यात्मास्य आत्मायुधमात्मेषव आत्मा सर्वं देवस्य देवस्य' (नि० ७।४।८,९,१३,१४,१५)। परमात्मनः सर्वशक्तिमत्त्वात् सर्वासां व्यवहारोपयोगिदेवतानां मध्ये तस्यैव मुख्यं देवतात्वमस्ति। वेदेष्वद्वितीयस्य तस्यैव बहुधाग्न्यादिनाम्नोपासना विहिता।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वैदिकमन्त्राणां विशेषनियमानाह—'तास्त्रिविधा ऋचः परोक्षकृताः प्रत्यक्षकृतां आध्यात्मिक्यश्चेति' 'तत्र परोक्षकृताः सर्वाभिर्नामविभक्तिभिर्युज्यन्ते प्रथमपुरुषैराख्यातस्य' 'अथ प्रत्यक्षकृता मध्यमपुरुषयोगास्त्वमिति चैतेन सर्वनाम्ना' 'अथाध्यात्मिक्य उत्तमपुरुषयोगा अहमिति चैतेन सर्वनाम्ना' (नि० ७।१।५,६॥७।२।२,५) तथा त्रिविधानि मन्त्रव्याख्यानानि भवन्ति। तद्यथाधियज्ञं यज्ञमधिकृत्येति, अधिदैवतं देवताविज्ञानमधिकृत्येति, अध्यात्ममात्मानमिन्द्रियादिकं ब्रह्म वाधिकृत्येति।

वैदिकसंज्ञानां यौगिकार्थे प्रमाणम् 'परं तु श्रुतिसामान्यम्' (मी० १।१।३१) 'नाम च धातुजमाह' (महाभा०) तच नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च' (नि० १।१२।२) परमात्मविषयकोऽर्थो मुख्यः 'सर्वे वेदा यत्पदमामनन्ति' (कठ)।

ऋषयो मन्त्रद्रष्टारः। स्तूयते या सा देवता। छन्दांसि गायत्र्यादीनि।

ओंकारपूर्वकं मन्त्रोच्चारणं विहितम्। 'ओमभ्यादाने' (पाणि० ८।२।७) ओंशब्दस्य प्लुतः स्यादारम्भे। ओमिति परमात्मनो मुख्यं नाम। अ-उ-म एतत्त्रयं मिलित्वोमित्यक्षरं भवतीति मनुः। अपरमपि 'मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह' इति शिक्षायाम्। योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्। स जीवन्नेव शूद्रत्वमित्याह च मनुः।

तत्रोपासनाप्रधानस्तुतीयस्सामवेदः। छन्दोगानमिति च संहिताभागो द्विधा भिन्नः। छन्दसामेवार्चिक इति नामान्तरम्। पूर्वारण्यकमहानाम्न्युत्तरभेदेन आर्चिकग्रन्थाश्चत्वारः। गेयारण्यकमहानाम्न्यूहोह्यभेदेन गानग्रन्थाः पञ्च। ऋक्सन्नः साम्नां योनिः। तथा च छान्दोग्ये 'ऋचध्यूढं साम गीयते' (१।६।५) अतस्तेषां व्याख्यानमादौ कर्त्तव्यम्। आर्चिकग्रन्थेषु यथा सामयोनीनामृचां (पद्यात्मकानां) सङ्ग्रहस्तथैव सामयोनिभूतानां यजुषां (गद्यात्मकानां) स्तोभग्रन्थे। 'स्तोभहीनमाविर्गानम्' 'लिङ्गं स्तोभऋचा सह' 'ऋग्विहीनं छन्नगानम्'। सामयोनीनामृचां भाष्यं दृश्यते। स्तोभपदानां भाष्यं नास्ति, अतोऽर्थरहिता मन्त्रा मननयोग्या न भवन्ति। अर्थज्ञानप्रशंसार्थाज्ञाननिन्दानेन प्रतिपादिता 'स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्। योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा'। पूर्वार्चिके आग्नेयमैन्द्रं पवमानं चेति पर्वत्रयम्। श्रौतस्मार्त्तयज्ञानामग्न्याधानाग्निहोत्रपूर्वकत्वादाग्नेयपर्वणः प्रथमसन्निवेशः। 'अग्निर्वै दीक्षितस्य देवता' (तै० सं० ३।१।१) तथा चोक्तम् 'अग्ने व्रतपते व्रतं चरिष्यामि' (य० १।५) 'अग्निः पृथिवीस्थानः' (नि० ७।५।२)।

सामसन्त्रेषु १,२,३ चिह्नानि उदात्तानुदात्तस्वरितस्वरज्ञापकानि। 'उच्चैरुदात्तः' नीचैरनुदात्तः' 'समाहारः स्वरितः' (पाणि०)। गानानां सप्तस्वरास्तद्यथा 'षड्जयैवर्षभयैव गान्धारो मध्यमस्तथा। पञ्चमो धैवतश्चैव निषादः सप्तमः स्वरः॥' नारदीयशिक्षायां विशेषो द्रष्टव्यः। कृतेऽपि भूयसि यत्ने क्वचिन्मुद्रणप्रमादो जातस्तद्दोषः सुधीभिः चन्तव्य इति। धन्योऽस्तु श्रीसत्येन्द्रनाथसेनो यस्याहेतुकी सहायता मां कृतज्ञताप्रकाशायोन्मुखयति। अलमतिपल्लवेन। शमित्योम्।

विद्वज्जनकृपाभिलाषी

श्रीसत्यचरणराय-देवशर्मा।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऋचां सूचीपत्रम् ।

ऋक्	पत्रे	ऋक्	पत्रे
अगन्म इचहन्तमं	१४७	इत एत उदारुहन्	१५३
अग्न आयाहि वीतये	१	इदं त एकं पर ऊ त	११२
अग्न ओजिष्ठमाभर	१४०	इन्धे राजा समर्यो	११८
अग्निं दूतं इणीमहे	५	इममू षु त्वमस्माकं	४४
अग्निं नरो दीधितिभि	१२१	इमएँ सोममहँते	११३
अग्निं वो इधन्त	३७	ईड़िष्वा हि प्रतीव्याइं	१६५
अग्निमिन्धानो मनसा	२९	उत स्या नो दिवा मति	१६४
अग्निमीड़िष्वावसे	८४	उदु त्यं जातवेदसं	४८
अग्निरुक्थे पुरोहितो	८२	उप त्वाग्ने दिवे दिवे	२४
अग्निर्मूर्द्धा दिवः ककुत्	४३	उप त्वा जामयो गिरो	२३
अग्निर्देवाणि जङ्गनद	६	ऊर्द्ध ऊ षु ण ऊतये	१००
अग्निस्तिग्मेन शोचिषा	३८	एना वो अग्निं नमसो	७८
अग्ने जरितर्विश्पतिः	६५	एह्यू षु ब्रवाणि ते	१०
अग्ने चड़ महाएँ असय	३९	और्वभृगुवच्छुचि	२८
अग्ने यजिष्ठो अध्वरे	१६३	कविमग्निमुपस्तुहि	४९
अग्ने युङ्क्ष्वा हि ये तवा	४१	कस्य नूनं परीणसि	५१
अग्ने रचाणो अएँहसः	४०	कायमानो वना त्वं	८८
अग्ने वाजस्य गोमत	१६२	चित्र इच्छिशोस्तरुणस्य	११०
अग्ने विवस्वदाभरा	१४	जज्ञानः सप्त मातृभिः	१६४
अग्ने विवस्वेदुषस	६६	जरावोध तद्विविड्ढि	२५
अदर्शि गातुवित्तमो	८१	जातः परेण धर्मणा	१४८
अधजमो अधवा दिवो	८७	तदग्ने द्युम्नमाभरा	१७६
अप त्यं इजिनं रिपुं	१६७	तं गूर्धया स्वर्णरं	१७३
अबोध्यग्निः समिधा	१२७	तं त्वा गोपवनो गिरा	४६
अयमग्निः सुवीर्य्यस्येशे	१०३	त्वमग्ने गृहपतिस्त्वं	१०४
अरण्यो र्निहितो	१३४	त्वमग्ने यज्ञानां होता	४
अश्वं न त्वा वारवन्तं	२७	त्वमग्ने वसूएँरिह	१५७
आजुहोता इविषा	१०९	त्वमित्सप्रथा असयग्ने	६९
आ ते वत्सो मनो यमत्	११	त्वामग्ने पुष्करादध्य	१२
आदित्यनस्य रेतसो	३०	त्वे अग्ने स्वाहुत	६४
आ नो अग्ने वयोइधं	७०	त्वेषस्ते धूम ऋण्वति	१४२
आ वो राजानमध्वरस्य	११७	त्वं नश्चित्र ऊत्या	६८
इड़ामग्ने पुरुदएँससएँ	१३१	त्वं नो अग्ने महोभिः	९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऋक्	पन्ने	ऋक्	पन्ने
त्वंहि चेतवदग्ने	१४३	प्रेष्ठं वो अतिथिं स्तुषे	८
दधन्वे वा यदीमनु	१५५	प्रैतु ब्रह्मणस्पतिः	९९
दूतं वो विश्ववेदसं	२२	बृहद्भिरग्ने अर्चिभिः	६३
देवो वो द्रविणोदाः	९७	बृहद्वयो हि भानवे	१४७
न तस्य मायया चन	१६६	भद्रो नो अग्निराहुतो	१७५
नमस्ते अग्न ओजसे	२१	मा नो हृणीथा	१७४
नि त्वा नक्ष्य विश्पते	४२	मूर्द्धानं दिवो अरतिं	११४
नि त्वामग्ने मनुर्दधे	९०	यजिष्ठं त्वा ववृमहे	१७५
परि वाजपतिः कविः	४७	यज्ञा यज्ञा वो अग्नये	६०
पाहि नो अग्न एकया	६१	यदि वीरो अनु ष्या	१४१
पुरु त्वा दाशिवांसं वोचे	१६०	यदा उ विश्पतिः	१७७
प्र केतुना बृहता	११९	यदाहिष्टं तदग्नये	१४५
प्रति त्यं चारुमध्वरं	२६	यो विश्वा दयते	७१
प्रत्यग्ने हरसा हरः	१५६	राये अग्ने महे त्वा	१५४
प्र देवोदासो अग्निः	८६	वि त्वदापो न	११६
प्र भूर्जयन्तं महां	१२८	विशो विशो वो अतिथिं	१४६
प्र मंहिष्ठाय गायत	१७१	शुक्रं ते अन्यद्यजतं	१२९
प्र यो राये निनीषति	१०१	शेषे वनेषु मातृषु	७९
प्र वो यह्वं पुरूणां	१०२	शन्नो देवीरभिष्टये	५०
प्र समाजमसुरस्य	१३३	शुधि शुक्रार्ण वह्निभिः	८५
प्र सो अग्ने तवोतिभिः	१७२	शृण्वग्ने नवस्य मे	१६८
प्र होत्रे पूर्व्यं वचो	१६१	सखायस्त्वा ववृमहे	१०५
प्र होता जातो महान्	१३२	सनादग्ने मृणसि	१३५
प्रातरग्निः पुरुप्रियो	१४४	सोमं राजानं वरुण	१५२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

साङ्केतिकानि चिह्नानि ।

अ०	अव्ययम् ।
आ०	आर्षेयम् ।
ऋ०	ऋग्वेदः ।
ऐ०	ऐतरेयम् ।
क्रि०	क्रिया ।
गी०	गीता ।
ता० म०	ताण्ड्य-महाब्राह्मणम् ।
तै०	तैत्तिरीयम् ।
नि०	निरुक्तम् ।
पि० सू०	पिङ्गलच्छन्दःसूत्रम् ।
ब्रा०	ब्राह्मणम् ।
मी०	मीमांसा ।
मं०	मन्त्रः ।
यजुः	यजुर्वेदः ।
योग०	योगदर्शनम् ।
महा०	महाभाष्यम् ।
लाट्या०	लाट्यायन-श्रौतसूत्रम्
स०	सम्बोधनम् ।
श०	शतपथम् ।

पदपाठः ।

१	प्रथमा ।
२	द्वितीया ।
३	तृतीया ।
४	चतुर्थी ।
५	पञ्चमी ।
६	षष्ठी ।
७	सप्तमी ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शुद्धिपत्रम् ।

पत्रे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२२	२४	कर्म्मकलस्य	कर्म्मफलस्य
५१	३	...	'नः अभिष्टये'
७१	२२	(=सोमानि)	(सोमाः)
७२	३	सोमानि	सोमाः
७२	५	क्रतें	क्रताभि
७२	१०	सोमानि	सोमाः
८९	१९	वैद्युतात्मनाऽरण्यो	वैद्युतात्मनाऽरण्यो
१३१	७	विश्वमिव	विश्वामिव
१३२	१९	[सः] ते	[सः] विधते ते
१५२	४	बृहस्पस्पति-	बृहस्पति-
१६२	७	सत्ये वां	सत्ये वा
१६२	१५	ऐशानः	ईशानः
१६४	२०	सुधूम्रवर्णा	सुधूम्रवर्णा
१६६	३	[अग्नं]	[अग्निं]
१६८	१४	प्रमात्मन्	परमात्मन्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शुद्धिपत्रम् ।

पत्रे	पङ्क्तौ	अशुद्धम्	शुद्धम्
३	४	वहुनि	वह्नि
७	१२	परमात्मा...	'विपन्यया'
११	१७	ते ६ ।...	वत्सः १ ।
१६	१	व्याकरणम्	सामवेदसंहिता
१६	२	दानादनयो	दानादनयीः
१८	४	पूव	पूर्व
२०	२८	आदेशः	-देशः
२३	५	ऋञ्जतिः	ऋञ्जति
२३	१७	परमात्मानम्	अग्निम्
२३	१८	आधियाज्ञिकम्	भाष्यम्
२३	२२	त्वां परमात्मानम्	त्वामग्निं परमात्मानं वा
३०	९	ऋत्विभिः	ऋत्विग्भिः
३१	१	दशति	दशतिः
३२	२२	अतिथिन्	अतिथिम्
३६	२६	...	हव्यवाहम् (१२)—हव्यपूर्वा-वहतेर्ण्विः 'वहश्च' ३।२।६४ इति। तम्।
३६	२७	...	हविष्कृतः (१३)—५८।
३८	२०	तिग्मन	तिग्मेन
४०	१६	अग्ने	अग्नेः
४१	२०	वहन्तिः	वहन्ति
४२	२०	...	विश्पते सं० ।
४६	१३, १४	अस्माकमनु	अस्मानु
४६	२०	अस्माकमनु	अस्मानु
५०	११	शस्त्र	शस्त्रे
५३	२२	१व०	वहुव०
५४	८	(१४)	(२४)
५४	२०	उत्तम	मध्यम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पत्रे	पङ्क्तौ	अशुद्धम्	शुद्धम्
५६	२	शत:	शतप्रत्यय:
५७	१५	१व०	बहुव०
५८	१०	शत:	शतप्रत्यय:
६४	१०	ऊर्वम् ८।	ऊर्वम् २।
७०	१८	मुनीत्या	मुनीत्या
७४	४	श्री	श्री
७४	१०	स्त्रियां	स्त्रियां
७६	३	शत:	शतप्रत्यय:
८४	२०	मनुस्य	मनुष्य
९७	१२	चतुर्थी, चतुर्थं	पञ्चमी, पञ्चम
१०१	३	ऋष:	ऋषे:
१०१	१३	पीषिण	पीषिणं
१०६	२	न्यते	हन्यते
१०७	३३	सुवृतं	सूवृतं
१११	१०	यदव	यदैव
१२३	८	शत:	शतप्रत्यय:
१२३	३२	व्यत्ययेन।	व्यत्ययेन प्रथमा च।
१२४	४	शत:	शतप्रत्यय:
१२४	२५	स्त्रायति	स्थायति
१२६	९	हिरादेशश्च।	हिरादेशश्च बाहुलकात्। 'हर्य' गतिकान्त्यो: भ्वा० धातोर्वा।
१३४	३	स्वरूप	स्वरूपं
१३५	२१	समूहान्	समूलान्
१३६	२३	विभक्ते	विभक्ते:
१३७	४	आयास्यतिर्वा	आयास्यति वा
१३८	२३	विभक्तेर्लुक्	विभक्तेर्ङा
१३८	२९	शत:	शत प्रत्यय:
१४९	१०	ऋंत्विग्भि:	ऋत्विग्भि:
१५५	२१	स्त्रीवम्	स्त्रीवम्
१६१	१९	है	है

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ओ३म्

सामवेदसंहिता

(छन्द आर्चिकः)

प्रथमम् (आग्नेयं) पर्व । प्रथमोऽध्यायः । प्रथमः प्रपाठकः । प्रथमः खण्डः । प्रथमा दशतिः ।

['परं तु श्रुतिसामान्यम्' मी० १।१।३१ ॥ 'नाम च धातुजमाह' । मह्ना० ॥ श्लेषेणार्थद्वयं, परमात्मविषयको मुख्यः 'सर्वे वेदा यत्पदमामनन्ति' । कठ० ॥]

अथ प्रथमा ।

अग्न आयाहीत्यृचो बार्हस्पत्यो भरद्वाज ऋषिः । द्वे सामनी (गोतमस्य पर्कावभितः कश्यपस्य बर्हिष्यं मध्यमम् । आ० ब्रा०) गायत्रीछन्दः (गायत्रा वसवः (क) । पि० छ० सू० ३।३) अग्निर्देवता (तस्याः स्तूयमानत्वात् 'यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति' नि० ७।१।४) अग्नेराह्वानेऽस्या विनियोगः (...तेराह्वयति । अग्न आयाहि वीतये... । ता० म० ब्रा० ११।२।२, ३) इति याज्ञिकम् । अध्यात्मं तु मन्त्रार्थे एव उक्तम् ।

२ ३ १ २ ३ १ २ ३ २ ३ १ २
ॐ अग्न आयाहि वीतये गृणानो हव्यदातये ।
१ र २र ३ १ २
नि होता सत्सि बर्हिषि ॥ १ ॥ (ख)

(क) वसवोऽष्टाक्षराणीति ॥ अष्टाक्षरा वै गायत्री । श० ब्रा०, कां० १ । प्र० ६ । ब्रा० १।२३ ॥

(ख) ऋग्वेदे, अष्ट० ४ । अध्या० ५ । व० २२ । एवमेव पाठः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पदपाठः। अग्ने सं०। आयाहि क्रि०। वीतये ४। गृणानः १। हव्यदातये ४। नि अ०। होता १। सत्सि क्रि०। बर्हिषि ७।

अन्वयः। [हे] अग्ने [त्वं] वीतये हव्यदातये [च] [अस्माभिः] गृणानः [सन्] आयाहि। [आगत्य च] होता [त्वं] बर्हिषि निषत्सि। (क)

आधियाज्ञिकं भाष्यम्। हे 'अग्ने' यज्ञदेव! त्वं 'वीतये' हविषां भक्षणाय [अग्निमुखा वै देवताः। ता० म० ब्रा० २५।१४।४॥ अग्निर्वै देवतानां मुखम्। श० ब्रा० ३।७।२।६। 'हव्यदातये' देवेभ्यो हविष्प्रदानाय च अस्माभिः 'गृणानः' स्तूयमानः सन् 'आयाहि' अस्मद्यज्ञं प्रति आगच्छ। आगत्य च 'होता' होमनिष्पादकः त्वं 'बर्हिषि' बृंहति वर्धते ज्ञानं यत्र तस्मिन् यज्ञे 'निषत्सि' आहितो भव। (ख)

आध्यात्मिकं भाष्यम्। हे 'अग्ने' परमात्मन्! [इन्द्रं मित्रं वरुण मग्नि माहु रथो दिव्यः स सुपर्णो गरुत्मान्। एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वान माहुः। ऋग्वेदे, अष्ट० २।

(क) 'व्यवहिताय' १।४।८२ व्यवहिता अपि गत्युपसर्गसंज्ञकाः प्रयोक्तव्याः। उपसर्गस्य विप्रकृष्टत्वेऽप्यन्वयकाले नैकट्यं स्यात्। 'सदिरप्रतेः' ८।३।६६ प्रतिभिन्नादुपसर्गात् सदेः सस्य षः स्यात्।

(ख) श० ब्रा० १।३।३।२२,२३,२४ एवमस्ति :—अग्न ऽआ याहि वीतय इति। तद्देति भवति वीतय ऽ इति समन्तिक मिव ह वा ऽ इमेऽग्ने लोका आसुरित्युन्मृश्या इव वीरास॥ ते देवाऽअकामयन्त। कथन्नु न इमे लोका वितराएँ स्युः कथन्न इदं व्वरीय इव स्यादिति तानेतैरेव चिभिरचरैर्व्यनयन् वीतय ऽ इति तऽइमे विदुरं लोकास्ततो देवेभ्यो व्वरीयो ऽ भवद् वरीयो ह वा ऽ अग्ने भवति यस्यैवं विदुष एता मन्वाहु र्व्वीतयऽइति॥ गृणानो हव्यदातयऽइति। यजमानो वै हव्यदाति गृणानो यजमानायेत्येवैतदाह नि होता सत्सि बर्हिषीत्यग्निर्वै होतायं लोको बर्हिरस्मिन्नेवैतल्लोकेऽग्निं दधाति सोऽय मस्मिंल्लोके ऽग्निर्हितः सेवेम मेव लोक मभ्यनूक्तो ममैवैतया लोकं जयति यस्यैवं विदुष एता मन्वाहुः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अध्या० ३। व० २२॥ तदेवाग्निस्तदादित्य स्तद्वायुस्तदुचन्द्रमाः।

तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः। यजुर्वेदे, अध्या० ३२।

मं० १॥ इत्यादिभ्य एकस्य सतः परब्रह्मणः अग्न्यादीनि बहुनि नामानि सन्तीति वेदितव्यम्] त्वं 'वीतये' विद्यादिशुभगुणव्याप्तये 'हव्यदातये' हव्यस्य दातव्यस्य शुभकर्मफलस्य दानाय च अस्माभिः 'गृणानः' स्तूयमानः सन्, अस्मान् सद्गुणानुपदिशन् वा 'आयाहि' अस्माकं समीपमागच्छ। आगत्य च 'होता' होमनिष्पादकः, सुखस्य दाता वा त्वं 'बर्हिषि' बृंहति वर्धते ज्ञानं यत्र तस्मिन् यज्ञे 'निषत्सि' निषीद, विराजस्व। अनेन मन्त्रेण ईश्वरस्य प्रत्यक्षाह्वानम्, [प्रत्यक्षकृता मध्यमपुरुषयोगास्त्वमिति चैतेन सर्वनाम्ना। नि० ७।२।२] इति मन्त्रस्य प्रत्यक्षकृतार्थत्वात्।

निरुक्तम्। अग्निः कस्मात्॥ अग्रणीर्भवति। अग्रं यज्ञेषु प्रणीयते। अङ्गं नयति सन्नममानः॥ अक्नोपनो भवतीति स्थौलाष्ठीवि र्न क्नोपयति न स्नेहयति॥ त्रिभ्य आख्यातेभ्यो जायत इति शाकपुणिः। इतादक्ताद्दग्धाद्वा नीतात्। स खल्वेतेरकारमादत्ते गकारमनक्तेर्वा दहते र्वा नीः परः॥ ७।१४।३, ४, ५, ६॥ गृणातिः अर्चतिकर्मा॥ ३।१९।१॥ दातिः दानकर्मा॥ ३।१९।१२॥

अथ द्वितीया।

त्वमग्नेयज्ञानामित्यृचो बार्हस्पत्यो भरद्वाज ऋषिः। सामगानस्य सुपर्णा ऋषिः, सौपर्णं च नाम (सौपर्णञ्च। आ० ब्रा०) गायत्री वर्द्धमाना। अग्निः। (सौपर्णं भवति स्वर्गस्य लोकस्य समष्ट्यै। ता० म० ब्रा० १४।३।९) इति स्वर्गलोक-समष्टिकामाय अस्या विनियोगः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१२ ३२ ३ २ ३ १२ ३२
त्वमग्ने यज्ञानाᳬ होता विश्वेषाᳬ हितः ।
३२ ३ १ २३ १२
देवेभि र्मानुषे जने ॥ २ ॥ (क)

पदपाठः । त्वम् १ । अग्ने सं० । यज्ञानाम् ६ । होता १ । विश्वेषाम् ६ । हितः १ । देवेभिः ३ । मानुषे ७ । जने ७ ।

अन्वयः । [हे] अग्ने ! त्वं विश्वेषां यज्ञानां होता (ख) । [एवम्भूतस्त्वं] मानुषे जने देवेभिः हितः [असि] ।

आधियाज्ञिकम् । हे 'अग्ने' ! 'त्वं' 'विश्वेषां' सर्वेषां 'यज्ञानां' श्रौतस्मार्त्तादीनां 'होता' होमनिष्पादनशीलः । एवम्भूतस्त्वं 'मानुषे' मननशीले 'जने' यजमाने 'देवेभिः' ऋत्विग्भिः 'हितः' गार्हपत्याहवनीयदक्षिणाग्निरूपेण स्थापितः असि ।

आध्यात्मिकम् । हे 'अग्ने' परमात्मन् ! 'त्वं' 'विश्वेषां' सर्वेषां 'यज्ञानां' सङ्गन्तव्यानां व्यवहाराणां, श्रेष्ठतमानां कर्मणां वा [यज्ञो वै श्रेष्ठतमं कर्म । श० ब्रा० १।५।४।५] 'होता' स्वीकर्त्ता फलदाता च । एवम्भूतस्त्वं 'मानुषे' मननशीले 'जने' यज्ञकर्त्तरि मादृशि जने 'देवेभिः' दिव्यगुणैः ध्यानधारणा समाधिभिः 'हितः' धारितः असि ।

निरुक्तम् । यज्ञः कस्मात् प्रख्यातं यजति कर्मेति नैरुक्ताः । याच्ञ्ञो भवतीति वा यज्ञुरुन्नो भवतीति वा बहुकृष्णाजिन इत्यौपमन्यवो यजूंष्येनं नयन्तीति वा ॥ ३।१८।६ ॥ विश्वं बहुनामसु ॥ ३।१३।१ ॥

देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा ॥७।१५।१॥

(क) ऋग्वेदे, अष्ट० ४ । अध्या० ५ । व० २१ ॥

(ख) यद्वा यज्ञानां विश्वेषां [देवानां] होतेति । 'यज्ञानां' यष्टव्यानां 'विश्वेषां' देवानामिति 'होता' आह्वाता । सा० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ तृतीया ।

अग्निन्दूतमित्यृचः काण्वोमेधातिथिर्ऋषिः । सामगानस्य बृहन्नाम भरद्वाजऋषिश्च (बृहद्वा भरद्वाजम् । आ० ब्रा०) गायत्री । अग्निः । विनियोगस्तु (बृहत्स्वर्गकामाय सन्धिं कुर्यात् । ता० म० ब्रा० ८।१।३०) इति ।

३ २ ३१ २ ३ १ ३ ३ १ २
अग्निन्दूतं वृणीमहे होतारं विश्ववेदसम् ।
३ २ ३१ २ ३ १ २
अस्य यज्ञस्य सुक्रतुम् ॥ ३ ॥ (क)

पदपाठः । अग्निम् २ । दूतम् २ । वृणीमहे क्रि० । होतारम् २ । विश्ववेदसम् २ । अस्य ६ । यज्ञस्य ६ । सुक्रतुम् २ ।

अन्वयः । दूतं होतारं विश्ववेदसम् अस्य यज्ञस्य सुक्रतुम् अग्निं वृणीमहे ।

आधियाज्ञिकम् । 'दूतं' दावयति गमयति देशान्तरं पदार्थान् तं देवानां दौत्ये विनियुक्तम् [अग्निरेव देवानां दूत आस । श० ब्रा० १।३।३।३४, ३५ (ख)] 'होतारं' देवानामाह्वातारं 'विश्व-

---

(क) ऋग्वे०, अष्ट० १ । अध्या० १ । व० २२ ॥

(ख) श० ब्रा० १।३।३।३४, ३५ एवमस्ति :—सोऽब्रवीत् । अग्निं दूतं वृणीमह ऽ इति देवाश्च वा ऽ असुराश्चोभये प्राजापत्याः पस्पृधिरे तान् स्पर्द्धमानान् गायत्र्यन्तरा तस्थौ या वै सा गायत्र्यासीदियं वै सा पृथिवीयँ हैव तदन्तरा तस्थौ त ऽ उभय ऽ एव विदाञ्चक्रुर्यतरान् वै न इयं सुपावर्त्स्यति ते भविष्यन्ति परेतरे भविष्यन्तीति तामुभय ऽ एवोपमन्त्रयाञ्चक्रिरे ऽग्निरेव देवानां दूत आस सहरक्षा इत्यसुररक्षस मसुराणाँ साग्निमेवानुप्रेयाय तस्मादन्वाहाग्निं दूतं वृणीमह ऽ इति स हि देवानां दूत आसीद्धोतारं विश्ववेदसमिति ॥ तदु हैकेऽन्वाहुः । होता यो विश्ववेदस इति नेदर मित्यात्मानं ब्रवाणीति तदु तथा न ब्रूयान् मानुषँ ह ते यज्ञे कुर्वन्ति व्यृद्धं वै तद्यज्ञस्य यन्मानुषं नेदृग्द्धं यज्ञे करवाणीति तस्मादथैवऽर्चानूक्त मेवमेवानुब्रूयाद्धोतारं विश्ववेदस मित्येवास्य यज्ञस्य सुक्रतु मित्येष हि यज्ञस्य सुक्रतुर्यदग्निस्तस्मादाहास्य यज्ञस्य सुक्रतुमिति सेयं देवानुपाववर्त्त ततो देवा अभवन् परासुरा भवति ह वाऽ आत्मना परास्य सपत्ना भवन्ति यस्यैवं विदुष एता मन्वाहुः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेदसं यज्ञनिष्पादकत्वेन सर्वधनप्रापकम् 'अस्य' प्रवर्तमानस्य 'यज्ञस्य' यागकर्मणः 'सुक्रतुं' शोभनसम्पादकम् 'अग्निं' 'हवीमहे' आदधो वयमृत्विज इति।

आध्यात्मिकम्। 'दूतं' दूनोति उपतापयति नाशयति त्रितापं तं 'होतारं' सुखस्य दातारं 'विश्ववेदसं' सर्वधनं, सर्वज्ञं वा 'अस्य' प्रवर्त्तमानस्य 'यज्ञस्य' यष्टव्यस्य कर्मणः 'सुक्रतुं' निष्पादकत्वेन शोभनकर्माणं, शोभनप्रज्ञं वा 'अग्निं' परमात्मानं (हवीमहे) सम्भजामहे, उपास्महे वयमुपासका इति।

निरुक्तम्। दूतो जवतेर्वा द्रवतेर्वा वारयतेर्वा ॥५।१।२॥ वेद इति धननाम ॥ ३।९।९ ॥ क्रतुरिति कर्मनाम ॥ ३।१।१ ॥ क्रतुरिति प्रज्ञानाम ॥ ३।१३।१७ ॥

अथ चतुर्थी।

अग्निर्वृत्राणीत्यृचो भरद्वाज ऋषिः। त्रीणि सामानि, श्रुतर्षाचर्षिः (श्रौतर्षाणित्रीणि। आ० ब्रा०) गायत्री। अग्निः।

विनियोगस्तु (अग्निर्वृत्राणि जङ्घनत् त्वं सोमासि सत्पतिरिति वार्त्रघ्नावेव कुर्याद्वृत्रं वा एष हन्ति यं यज्ञ उपनमति। ऐ० ब्रा० १।१।४) इति वृत्र (रोग-ताप-विघ्न) नाशाय अग्निस्तुतौ।

३ २ ३ १ २ ३१ २ ३ १ २
अग्निर्वृत्राणि जङ्घनद् द्रविणस्यु विपन्यया।
१ २ ३१ २ २२
समिद्धः शुक्र आहुतः ॥ ४ ॥ (क)

पदपाठः। अग्निः १। वृत्राणि २। जङ्घनत् क्रि०। द्रविणस्युः १। विपन्यया ३। समिद्धः १। शुक्रः १। आहुतः १।

(क) ऋग्वेदे, अष्ट० ४। अध्या० ५। व० २७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अन्वयः । द्रविणस्युः समिद्धः शुक्रः आहुतः अग्निः विपन्यया [स्तूयमानः सन्] वृत्राणि जङ्घनत् ।

आधियाज्ञिकम् । 'द्रविणस्युः' यजमानस्य यज्ञफलरूप-विविधधनमिच्छुः 'समिद्धः' सम्यक् प्रदीप्तः 'शुक्रः' शुद्धः 'आहुतः' आ समन्ताद् ऋत्विग्भिः कृतहोमः 'अग्निः' 'विपन्यया' विविध स्तुत्या स्तूयमानः सन् 'वृत्राणि' आवरकाणि रोगादीनि 'जङ्घनत्' भृशं हन्तु, नाशयतु ।

आध्यात्मिकम् । (द्रविणस्युः) स्तोतॄणामात्मबलप्राप्त्यादि-धनमिच्छुः (समिद्धः) सम्यक् प्रकाशितः प्रसादितः प्रत्यक्षीकृतश्च (शुक्रः) शुद्धस्वरूपः (आहुतः) मनसि योगानुष्ठानेन सम्यग्धृतः ध्यानेन धारितश्च (अग्निः) परमात्मा (वृत्राणि) ईश्वरप्रणिधानस्य आवरकाणि दुरितानि अविद्यातमांसि वा (जङ्घनत्) भृशं हन्तु, नाशयतु ।

निरुक्तम् । वृत्रो वृणोतेर्वा वर्त्ततेर्वा वर्द्धतेर्वा 'यद-वृणोत्तद्वृत्रस्य वृत्रत्वमिति विज्ञायते, यदवर्त्तत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते, यदवर्द्धत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते ॥ २।१७।१ ॥ वृत्रं धननाम (क) ॥ ३।९।९ ॥ द्रविणमिति धननाम ॥ ३।९।७ ॥ शुक्रं शोचतेर्ज्वलति कर्मणः ८।११।२ ॥

अथ पञ्चमी ।

प्रेष्ठं वो इत्यृच उशना ऋषिः । चत्वारि सामगानानि, उशना ऋषिश्च (सर्वाणि वौशनानि । आ० ब्रा०) गायत्री । अग्निः । विनियोगस्तु (प्रेष्ठं वो अतिथि मित्यातिथ्यस्यैव तद्रूपं क्रियते । ता० म० ब्रा० १४।१२।१) इति आहितस्याग्नेरातिथ्य स्तुती । विशेषस्तु तत्रैव ब्राह्मणे द्रष्टव्यः ।

(क) अत्र निरुक्तानुसारं 'वृत्राणि जङ्घनत्=धनानि गमयतु' इत्यप्यर्थोऽनुमीयते । (हनहिंसागत्योः अ० प० अनि० हन्ति) अस्य यङ्लुकि लिङर्थे लेट् अडभावश्च ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१२ ३ १२ ३२ ३१ २ ३२
प्रेष्ठं वो अतिथिꣳ स्तुषे मित्र मिव प्रियम् ।
२ ३ २३ १ २ २२
अग्ने रथं न वेद्यम् ॥ ५ ॥ (क)

पदपाठः । प्रेष्ठम् २। वः २। अतिथिम् २। स्तुषे क्रि०। मित्रम् २। इव अ०। प्रियम् २। अग्ने सं०। रथम् २। न अ०। वेद्यम् २।

अन्वयः । [हे] अग्ने ! प्रेष्ठम् अतिथिं मित्रमिव प्रियं रथं न वेद्यं वः (=त्वां) स्तुषे।

आधियाज्ञिकम् । हे 'अग्ने'! 'प्रेष्ठं' प्रियतमम् 'अतिथिं' सततं देवेभ्यो हविः प्रदातुं गच्छन्तम्, अतिथिवत् पूज्यं वा 'मित्रं' बन्धुम् 'इव' 'प्रियं' हितकरं 'रथं' 'न' इव, यथा रथेन साधनभूतेन धनानि प्राप्यन्ते तथा 'वेद्यं' लाभहेतुं 'वः' त्वां, वचनव्यत्ययः 'स्तुषे' स्तौमि।

आध्यात्मिकम् । हे 'अग्ने' परमात्मन्! 'प्रेष्ठं' प्रियतमम् 'अतिथिम्' अतति सततं गच्छति तं सर्वव्यापकम्, अतिथिवत्पूज्यं वा 'मित्रं' बन्धुम् 'इव' 'प्रियम्' अनुकूलं 'रथं' रमणसाधनं 'न' इव 'वेद्यं' लब्धव्यं ज्ञातव्यञ्च 'वः' त्वां 'स्तुषे' स्तौमि, उपासे।

निरुक्तम् । अतिथिरभ्यतितो गृहान् भवति। अभ्येति तिथिषु परकुलानीति वा परगृहाणीति वा ॥ ४।५।१ ॥

...उपमार्थे...। इवेति भाषायाञ्च। अन्वध्यायञ्च ॥ १।४।४, ५, ६ ॥ रथो रंहते र्गतिकर्मणः। स्थिरतेर्वा स्याद्विपरीतस्य। रममाणोऽस्मिंस्तिष्ठतीतिवा, रपते र्वा, रसतेर्वा ॥ ९।११।३ ॥

नेति प्रतिषेधार्थीयो भाषायाम्। उभय (प्रतिषेधोपमार्थीय) मन्वध्यायम् ॥ १।४।७, ८ ॥

(क) ऋग्वेदे, अष्ट० ६। अध्या० ६। व० ५। 'अग्ने' इत्यत्र 'अग्नि'मिति पाठः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ षष्ठी ।

त्वं नो अग्न इत्यृच आङ्गिरसः सुदीतिः पुरुमीढो वा ऋषिः उभौ वा । द्वे सामनी सांवर्गवार्चन्ने इन्द्रश्चर्षिः (इन्द्रस्य सांवर्गवार्चन्ने द्वे । आ० ब्रा०) । गायत्री । अग्निः । विनियोगस्तु वार्चन्नसामवत्त्वादग्निर्वृत्राणीतिवत् (४ मं०) ।

१ २ ३ १ २ ३ १ २र ३ १ २
त्वं नो अग्ने महोभिः पाहि विश्वस्या अरातेः ।
३ २ ३ १ र २ र
उत द्विषो मर्त्यस्य ॥ ६ ॥ (क)

पदपाठः । त्वम् १ । नः २ । अग्ने सं० । महोभिः ३ । पाहि क्रि० । विश्वस्याः ५ । अरातेः ५ । उत अ० । द्विषः ५ । मर्त्यस्य ६ ।

अन्वयः । [हे] अग्ने ! त्वं महोभिः [तुष्टः] विश्वस्याः अरातेः उत मर्त्यस्य द्विषः नः पाहि ।

आधियाज्ञिकम् । हे 'अग्ने' ! 'त्वं' 'महोभिः' अस्मत्कृतपूजाभिः तुष्टः 'विश्वस्याः' सर्वस्य 'अरातेः' शत्रोः रोगादेरिति 'उत' अपि च 'मर्त्यस्य' अस्मदादेर्मनुष्यस्य 'द्विषः' शत्रोः अनावृष्टिदुर्भिक्षादिभ्यः 'नः' अस्मान् 'पाहि' रक्ष ।

आध्यात्मिकम् । हे 'अग्ने' परमात्मन् ! 'त्वं' 'महोभिः' अस्मत्कृतपूजाभिः, अग्नावाहुतिदानमेव तत्पूजा ताभिः तुष्टः 'विश्वस्याः' सर्वस्य 'अरातेः' शत्रोः अविद्यादेरज्ञानादेश्च 'उत' अपि च 'मर्त्यस्य' अस्मदादेर्मनुष्यस्य 'द्विषः' शत्रोः अनावृष्टिदुर्भिक्षादिभ्यः 'नः' अस्मान् 'पाहि' रक्ष ।

निरुक्तम् । अरातयोऽदानकर्माणो वाऽदानप्रज्ञा वा ॥ ३।११।१ ॥ मर्त्या इति मनुष्यनाम ॥ ३।७।१ ॥

(क) ऋग्वेदे, अष्ट० ६ । अध्या० ५ । व० ११ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ सप्तमी ।

एह्यूषु ब्रवाणीत्यृचो बार्हस्पत्यो भरद्वाज ऋषिः । शौनःशेपं साम साकमश्वर्षिः (साकमश्वस्य शौनःशेपः सामनी द्वे । आ० ब्रा०) गायत्री । अग्निः । विनियोगस्तु (एह्यूषु ब्रवाणित इत्येहिवत्यो भवन्ति तृतीयस्याङ्ग उपहवाय सन्तत्यै । ता० म० ब्रा० ११।११।१) इति सायंसवने अग्नग्राह्याने ।

२ ३ १र २ र ३ १ ३ १ २ ३ १ २
एह्यूषु ब्रवाणि ते ऽग्न इत्येतरा गिरः ।
३ १ २ ३ १ २
एभि र्वर्द्धसि इन्दुभिः ॥ ७ ॥ (क)

पदपाठः । एहि क्रि० । ऊ अ० । सु अ० । ब्रवाणि क्रि० । ते ४ । अग्ने सं० । इत्था अ० । इतराः २ । गिरः २ । एभिः ३ । वर्द्धसि क्रि० । इन्दुभिः ३ ।

अन्वयः । [हे] अग्ने ! एहि । ते ऊ (=इत्येताः) इतराः गिरः इत्था सु ब्रवाणि [प्रार्थयानि तन्नाशाय] । [आगत्य च] एभिः इन्दुभिः वर्द्धसि ।

आधियाज्ञिकम् । हे 'अग्ने' ! 'एहि' अस्मद्यज्ञं प्रति आगच्छ । 'ते' तुभ्यम् 'ऊ' इत्येताः 'इतराः' मनोवचसोः असावधानाः [एह्यूषु ब्रवाणि ते ऽग्न इत्येतरा गिर इत्यसुर्या ह वा इतरा गिरः । ऐ० ब्रा० ३।५।५] (ख) 'गिरः' स्तुतिरूपा वाचः 'इत्था' अनेन प्रकारेण 'सु' सुष्ठु 'ब्रवाणि' उच्चारयाणि, प्रार्थयानि तन्नाशाय । अनेन मनोवचसोः स्थैर्यं प्रार्थ्यते । आगत्य च 'एभिः' एतैः 'इन्दुभिः' सोमैः 'वर्द्धसि' वर्द्धस्व । स्तूयमाना हि देवता वर्द्धन्ते ।

आध्यात्मिकम् । हे 'अग्ने' परमात्मन् ! 'एहि' आगच्छ,

(क) ऋग्वेदे, अष्ट० ४ । अध्या० ५ । व० २४ ॥ 'वर्द्धसी'त्यत्र 'वर्द्धास' इति पाठः ।

(ख) असुर्यं मनोवचसोरासुरत्वम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अस्माकं हृदि विराजस्व। 'ते' तुभ्यम् 'ऊ' इत्येताः 'इतराः' मनोवचसोः असावधानाः 'गिरः' स्तुतिरूपा वाचः 'इत्था' अनेन प्रकारेण 'सु ब्रवाणि' साधूच्चारयाणि, प्रार्थयानि तन्नाशाय। अनेन मनोवचसोः स्थैर्यं प्रार्थ्यते। आगत्य च 'एभिः' एतैः 'इन्दुभिः' ध्यानाभ्यासरसैः, यज्ञैः वा 'वर्धसि' प्रकाशितो भवेति।

निरुक्तम्। इत्थासुथेत्येन व्याख्यातम्॥ ५।५।२॥ गौरितिवाङ्नामसु॥ २।२३।१॥ गिरा गीत्या स्तुत्या॥ ६।२४।१॥ इन्दुरिति यज्ञ नाम॥ ३।१९।५॥ इन्दुरिन्धे क्लिनत्ते र्वा॥१०।४१।२॥

अथाष्टमी।

आ ते वत्स इत्यृचः काण्वो वत्स ऋषिः। काण्वं साम (वत्सस्य काण्वस्य। आ० ब्रा०) गायत्री। अग्निः। विनियोगस्तु (आष्कारणिधनं काण्वं प्रतिष्ठाकामाय। ता० म० ब्रा० ८।२।१) इति दुरितनाशकामयज्ञस्य प्रतिष्ठायाम्।

१ २ ३ १ २र ३ १ २ ३ १ २
आ ते वत्सो मनो यमत् परमाच्चित् सधस्थात्।
२ ३ १ २ ३ २
अग्ने त्वां कामये गिरा॥ ८॥ (क)

पदपाठः। आ अ०। ते ६। मनः २। यमत् क्रि०। परमात् ५। चित् अ०। सधस्थात् ५। अग्ने सं०। त्वाम् २। कामये क्रि०। गिरा ३।

अन्वयः। वत्सः ते मनः परमात् चित् सधस्थात् गिरा आयमत्। [हे] अग्ने! त्वां कामये।

आधियाज्ञिकम्। 'वत्सः' यजनशीलः 'ते' तव 'मनः' प्रवृत्तिं 'परमात्' उत्कृष्टात् 'चित्' अपि 'सधस्थात्' सहस्थानात् व्योमवत्

(क) ऋग्वेदे, अष्ट ५। अध्या० ८। व० ३६। 'कामये' इत्यत्र 'कामया' इति पाठः। यजुः, अध्या० १२। मं० ११५।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वव्यापकात् [परमे व्योमन्। ऋ० २।३।२१] 'गिरा' वेदवाग्-रूपया स्तुत्या 'आयमत्' आगमयति आकर्षति। हे 'अग्ने'! 'त्वां' 'कामये' त्वदीयं मनः मय्येव नियच्छामीति॥ धेनुः सर्वमन्यद् विहाय पुत्रप्रेम्णा वत्से एव यथा मनो दधाति न तथान्यत्र कुत्रापि। वत्स एव सर्वदा तन्मनः आकर्षति। अतोऽत्र मन्त्रे वत्सशब्देन यजनशीलो बोध्यते इत्यन्ये।

आध्यात्मिकम्। 'वत्सः' उपासकः 'ते' तव 'मनः' 'परमात्' उत्कृष्टात् 'चित्' अपि 'सधस्थात्' सहस्थानात् व्योमवत् सर्वव्यापकात् 'गिरा' स्तुत्या 'आयमत्' आकर्षति। हे 'अग्ने' परमात्मन्! 'त्वां' 'कामये' त्वदीयं मनः मय्येव नियच्छामीति।

निरुक्तम्। मनो मनोतेः॥ ४।५।१॥ सधस्थे सहस्थाने॥ ३।१५।२॥

अथ नवमी।

त्वामग्ने पुष्करादित्यृचो भरद्वाज ऋषिः। आर्षेयं साम, अग्निश्चर्षिः (अग्नेश्चार्षेयम्। आ० ब्रा०) गायत्री। अग्निः। विनियोगस्तु मन्त्रार्थगम्यो यज्ञेऽरण्योः सकाशादग्नेर्निर्मन्थनम्।

१ २ ३ १ २ ३ १ २र ३ १ २
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत।
३ १र २र ३ १ २
मूर्ध्नो विश्वस्य वाघतः॥ ९॥ (क)

पदपाठः। त्वाम् २। अग्ने सं०। पुष्करात् ५। अधि अ०। अथर्वा १। निरमन्थत क्रि०। मूर्ध्नः ५। विश्वस्य ६। वाघतः ५।

अन्वयः। [हे] अग्ने। [यथा] अथर्वा विश्वस्य वाघतः मूर्ध्नः पुष्करात् अधि त्वां निरमन्थत [तथाहं यज्ञार्थमरण्योः त्वां निर्मन्थामि]।

(क) ऋग्वेदे, अष्ट० ४। अध्या० ५। व० २३।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आधियाज्ञिकम्। हे 'अग्ने'! यथा 'अथर्वा' निश्चलः परमात्मा 'विश्वस्य' चराचरस्य सर्वस्य जगतः 'वाघतः' वाहकात् 'मूर्द्धः' मूर्द्धवद्वारकात् सर्वाधारभूतात् 'पुष्करात्' (क) आकाशात् 'अधि' अन्तः 'त्वां' 'निरमन्थत' उत्पादितवान्, अहमृत्विगपि तथैव यज्ञार्थमरण्योः सकाशात्त्वां निर्मन्थामि।

आध्यात्मिकम्। हे 'अग्ने' परमात्मन्! 'अथर्वा' संशयरहितः उपासकः [अपि संराधने प्रत्यक्षानुमानाभ्याम्। वेदान्ते, अध्या० ३। पा० २। सू० २४] 'विश्वस्य' चराचरस्य सर्वस्य जगतः 'वाघतः' वाहकात् 'मूर्द्धः' मूर्द्धवद्वारकात् सर्वाधारभूतात् 'पुष्करात्' परमात् स्थानात् हृदयाकाशात् [तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। ऋग्वेदे, अष्ट० १। अध्या० २। व० ७] ईश्वरः सर्वभूतानां हृद्देशे ऽर्जुन तिष्ठति। गीता, अध्या० १८। श्लो० ६१] 'अधि' अन्तर्मनसि 'त्वां' 'निरमन्थत' उत्पादितवान्, श्रवणमनननिदिध्यासनैर्विविच्य प्रत्यक्षीकृतवान् [श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः। मत्वा च सततं ध्येय एते दर्शनहेतवः] तथाहमपि हृद्देशे त्वामनुभवामि।

निरुक्तम्। पुष्करमित्यन्तरिक्षनाम ॥ २।१०।३ ॥ अथर्वाणो ऽथनवन्तः। थर्वतिश्चरतिकर्मा तत्प्रतिषेधः ॥११।१८।१॥

अथ दशमी।

अग्ने विवस्वदित्यृचो वामदेवऋषिः। सौमित्रं वानूपं साम, वाध्र्यश्वः सुमित्रो वाऽनूप ऋषिः (वाध्र्यश्वस्य वाऽनूपस्य। आ० ब्रा०) गायत्री। अग्निः। विनियोगस्तु (पशूनां भूमानमश्नुत आनूपेन

(क) तैत्तिरीय ब्राह्मणे, कां० १। प्र० १ अ० ३। एवमस्ति :—

आपो वा इदमग्रे सलिलमासीत्। तेन प्रजापतिरश्राम्यत्। कथमिदꣳ स्यादिति। सोऽपश्यत्पुष्करपर्णं तिष्ठत्। सोऽमन्यत। अस्ति वै तत्। यस्मिन्निदमधितिष्ठतीति। स वराहो रूपं कृत्वोपन्यमज्जत्। स पृथिवीमध आर्च्छत्। तस्या उपहत्योदमज्जत्। तत्पुष्करपर्णेऽप्रथयत्। यदप्रथयत्। तत्पृथिव्यै पृथिवीत्वम्॥ इत्यतः पुष्करे = पुष्करपर्णे सा०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तुष्टुवानः। ता० म० ब्रा० १३।३।१७) इति पशुवृद्धिकाम-यज्ञायाग्निस्तुती।

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २
अग्ने विवस्वदाभरास्मभ्यमूतये महे।
३ १र २र ३ १
देवो ह्यसि नो दृशे ॥ १० ॥

पदपाठः। अग्ने सं०। विवस्वत् २। आभर क्रि०। अस्मभ्यम् ४। ऊतये ४। महे ४। देवः १। हि अ०। असि क्रि०। नः ६। दृशे ४।

अन्वयः। [हे] अग्ने! [त्वं] महे ऊतये विवस्वत् अस्मभ्यम् आभर। हि नः दृशे देवः असि।

आधियाज्ञिकम्। हे 'अग्ने! त्वं 'महे' महते 'ऊतये' रक्षणाय 'विवस्वत्' स्वर्गादिलोकेषु विशेषेण निवासस्य हेतुभूतं यज्ञादिकं कर्म 'अस्मभ्यम्' 'आभर' आहर सम्पादय। 'हि' यतः 'नः' अस्मकं 'दृशे' दर्शनाय 'देवः' प्रकाशकः 'असि'।

आध्यात्मिकम्। हे 'अग्ने' परमात्मन्! 'त्वं' 'महे' 'ऊतये' रक्षणाय 'विवस्वत्' स्वर्गादिपुण्यलोकेषु विशेषेण निवासस्य हेतुभूतं यज्ञादिकं कर्म 'अस्मभ्यम्' 'आभर' आहर। 'हि' यतः 'नः' अस्माकं 'दृशे' दर्शनाय 'देवः' प्रकाशकः 'असि' सदैव विराजमानोऽसि तथाप्यविद्यावृतबुद्धयो वयं त्वां न पश्यामः।

निरुक्तम्। ऊतिरवनात् ॥ ५।३।२ ॥ महो महान् ॥ ८।२५।१ ॥ दृशे दर्शनाय ॥ १२।१५।३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ व्याकरणम् ।

अग्निः (४)—'अगि गतौ भ्वा० प० से० अङ्गति, अस्मात् 'अङ्गे र्नं लोपश्च' उ० ४।५० इति नि प्रत्ययो नुमो नलोपश्च। अङ्गति गच्छति (गतिर्ज्ञानम्) जानातीत्यग्निः १मा १व०।

अग्निम् (३)—अग्निशब्दस्य २या १व०।

अग्ने (१,२,५,६,७,८,९,१०)—अग्निशब्दस्य सं० १व०।

अतिथिम् (५)—'अत' सातत्यगमने भ्वा० प० से० अतति, अस्मात् 'ऋतन्यञ्जि' उ० ४।२ इति इथिन्। अतति सततं गच्छति भ्राम्यति वा ऽतिथिः। न विद्यते आगमनतिथिरस्येति च व्युत्पत्त्यन्तरम्। तम् २या १व०।

अथर्वा (९)—अ+थर्व चरणे+वनिप् 'स्नामदि०' उ० ४।११३ इति। वलोपो विकल्पेन। न थर्वति न चरतीति अथर्वा निश्चलः। यद्वा अथ—ऋ गतौ+वनिप्। अथ लोकमङ्गलाय ऋच्छति गच्छतीति अथर्वा—१मा १व।

अधि (९)—'डुधाञ्' धारणपोषणयोर्दाने च जु० उ० अनि० दधाति, धत्ते, अस्मात् 'उपसर्गे घोः किः' ३।३।९२ इति किः 'व्यत्ययो बहुलम्' ३।१।८५ इत्यनुपसर्गेऽपि। ततो नञ्। 'प्राग्रीश्वरान्निपातः' १।४।५६ इत्यव्ययसंज्ञा।

अराते: (६)—'रा' दाने अ० प० अनि० राति, अस्मात् क्तिन्। नास्ति राति र्दानं यस्येत्यराति-र्न किमपि दाता। यद्वा न रातिरदानमित्यराति:। तस्याः ५मी० १व०।

असि (१०)—'अस' भुवि अ० प० से० अस्ति, अस्य लटि मध्यम पु० १व०।

अस्मभ्यम् (१०)—'अस' क्षेपणे दि० प० से० अस्यति, अस्मात् 'युष्यसिभ्यां मदिक्' उ०१।१३९ इति मदिक्। अस्यति क्षिपतीत्यस्मच्छब्दस्य ४ र्थी बहु०।

अस्य (३)—'इदि' परमैश्वर्ये भ्वा० प० से० इन्दति, अस्मात् 'इन्देः कमिन्नलोपश्च' उ० ४।१५७ इति कमिन् नलोपश्च। इन्दति दीप्ते द्योतते इति इदम्। पुंसि अयम्। स्त्रियामियम्। ६ष्ठी १व० 'हलिलोपः ७।२।११३ इति इदो लोपः।

आ भर (१०)—'हृञ्' हरणे भ्वा० उ० अनि० हरति, हरते, आङ्पूर्वस्यास्य 'आहर' इत्यत्र 'हृग्रहोर्भश्छन्दसि' वा० ३।१।८४ इति हस्य भः।

आ यमत् (८)—'यम' उपरमे भ्वा० प० अनि० यच्छति, आङ्पूर्वादस्य धातोः 'छन्दसि लुङ्-लङ् लिटः' ३।४।६ इति लडर्थे लङ्। 'बहुलं छन्दसमाङ्योगेऽपि' ६।४।७५ इत्यडभावः॥

आ याहि (१)—'या' प्रापणे अ० प० अनि० याति, आङ्पूर्वस्यास्य धातोः लोटि सेर्हिः मध्यम पु० १व०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आहुतः (४)—'हु' दानादनयो जु० प० अनि० जुहोति, आङ्पूर्वादिति धातोर्निष्ठातः। १मा० १व०।

इतरः (७)—'इण्' गतौ अ० प० अनि० एति, अस्मात् 'निष्ठा' ३।२।१०२ इति क्तः इतः। रा धातोः [अरातेः] 'आतोऽनुपसर्गे कः' ३।२।३ इति कः। इतं गतं पृथग्भूतमन्यंरातिरिति इतरः। स्त्रियामितरास्राः २या बहु०।

इत्था (७)—इदं शब्दात् [अस्य] 'था हेतौ च च्छन्दसि' ५।३।२६ इति था प्रत्ययः। 'स्वरादि०' १।१।३७ इति अव्ययसंज्ञा।

इन्दुभिः (७)—'ऊन्दी' क्लेदने रु० प० से० उनत्ति, अस्मात् 'उन्दे रिच्चादेः' उ० १।२ इति उकारस्य इकारः उप्रत्ययश्च। उनत्ति क्लेदयतीति इन्दुस्तैः ३या बहु०।

इव (५)—'इवि' व्याप्तौ भ्वा० प० से० इन्वति, अस्मात् 'इगुपध०' ३।१।१३५ इति कः। 'व्यत्ययो बहुलम्' ३।१।८५ इति धातोरिदित्त्वेऽपि न नुम्। 'स्वरादि०' १।१।३७ इत्यव्ययसंज्ञा। इन्वति लक्षणं व्याप्नोति इति इव उपमार्थः।

उत (६)—उङ् शब्दे भ्वा० आ० अनि० अवते, अस्मान्निष्ठातः। अव्ययसंज्ञा।

ऊ (७)—उङ् धातोः [उत] क्विप्। अवते शब्दायते इति उ। अव्ययसंज्ञा। 'निपातस्य च' ६।३।१३६ इति दीर्घः।

ऊतये (१०)—'अव' रक्षणे भ्वा० प० से० अवति, अस्मात् 'ऊति यूति०' ३।३।९७ इति क्तिन्। 'ज्वरत्वरस्रिव्यविमवामुपधायाश्च' ६।४।२० इत्यूठ्। तस्मै ४र्थी १व०।

एभिः (७)—पु'सि इद शब्दस्य [अस्य] ३या बहु०।

एहि (७)—आङ् पूर्वात् इण् धातोः [इतराः] लोटि मध्यम पु० १व।

कामये (८)—'कमु' कान्तौ भ्वा० आ० से० कामयते, अस्य लटि उत्तम पु० १व०।

गिरः (७)='गॄ' निगरणे तु० प० से० गिरति, अस्मात् क्विप्। 'ऋत इद्धातोः' ७।१।१०० इतीकारः। रपरः। गिरतीति गीस्ता० २या बहु०।

गिरा (८)—गीःशब्दस्य ३या १व०।

गृणानः (१)—'गॄ' शब्दे क्र्या० प० से० गृणाति, 'पादीनां ह्रस्वः' ७।३।८० इति ह्रस्वः। 'सटः शतृशानचा०' ३।२।१२४ इति शानच्। 'क्र्यादिभ्यः श्ना' ३।१।८१ इति श्ना। गृणानः १मा १व०।

चित् (८)—'चिञ्' चयने स्वा० उ० अनि० चिनोति, चिनुते, अस्मात् क्विप्। 'ह्रस्वस्य पिति०' ६।१।७१ इति तुक्। अव्ययसंज्ञा।

जङ्घनत् (४)—'हन' हिंसागत्योः अ० प० अनि० हन्ति, अस्य यङ्लुकि द्वित्व मनुनासिक लोपः 'अनुदात्तोपदेश०' ६।४।३७ इति। 'नुगतोऽनुनासिकान्तस्य' ७।४।८५ इति नुक्। चुत्वकुत्वे। 'लिङ्यर्थे लेट्' ३।४।७। 'इतश्च लोपः०' ३।४।९७ इति तिप इ लोपः। 'लेटोऽडाटौ' ३।४।९४ इति अट्। जङ्घनत्—हन्यात्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जने (२)—'जनी' प्रादुर्भावे दि० आ० अनि० जायते, अस्मात् 'नन्दिग्रहि०' ३।१।१३४ इत्यच्। जायते जनयतीति वा जनस्तस्मिन् ७मी १व०।

ते (७)—'युष्' सेवायाम् सौत्रो धातुः योषति, अस्मात् 'युष्यसिभ्यां मदिक्' उ० १।१३९ इति मदिक्। योषति सेवते इति युष्मच्छब्दस्य ४र्थी १व० तुभ्यमित्यस्य स्थाने 'तेमयावेकवचनस्य' ८।१।२२ इति ते आदेशः।

ते (८)—युष्मच्छब्दस्य ६ष्ठी १व० तवेत्यस्य स्थाने ते आदेशः।

त्वम् (२,६)—युष्मच्छब्दस्य १मा १व० सौ 'त्वाहौ सौ' ७।२।९४ इति त्वादेशः। 'ङे प्रथमयोः' ७।१।२८ इति सोरम्। 'शेषे लोपः' ७।२।९० इत्यन्त्य लोपः। 'अमि पूर्वः' ६।१।१०७ इति पूर्वरूपम्॥

त्वाम् (८,९)—युष्मच्छब्दस्य २या १व०।

दूतम् (३)—'दु' गतौ भ्वा० प० वे० दवति, 'टुदु' उपतापे स्वा० प० अनि० दुनोति, आभ्याम् 'दुतनिभ्यां' उ० ३।९० इति क्तः धातोः दीर्घश्च। दवति गच्छति, दुनोति उपतापयति शत्रून् वा दूतस्तम् २या १व०।

दृशे (१०)—'दृशिर्' प्रेक्षणे भ्वा० प० अनि० पश्यति, अस्मात् क्विप्। पश्यतीति दृश्यते ऽनया वा दृक् तस्मै ४र्थी १व०। यद्वा 'दृशे विख्ये च' ३।४।११ इति तुमर्थे निपातः। दृशे=द्रष्टुम्।

देवः (१०)—'दिवु' क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु दि० प० से० दीव्यति, अस्मात् 'हलश्च' ३।३।१२१ इति घञ् 'व्यत्ययो बहुलम्' ३।१।८५ इति व्यत्ययेन कर्तरि। दीव्यतीति देवः १मा १व०। यद्वा पचाद्यच्।

देवेभिः (२)—देव शब्दस्य ३या बहु० 'बहुलं छन्दसि' ७।१।१० इति पाविको भिस ऐसभावः।

द्रविणस्युः (४)—'द्रु' गतौ भ्वा० प० वे० द्रवति, अस्मात् 'द्रुदक्षिभ्यामिनन्' उ० २।५० इति इनन्। द्रवति सर्वत्र गच्छतीति द्रविणं धनम्। 'दुरस्युर्द्रविणस्यु०' ७।४।३६ इति क्यचि निपातः। आत्मनो द्रविणमिच्छतीति द्रविणस्युः। 'व्यत्ययो बहुलम्' ३।१।८५ इत्यर्थव्यत्ययः। यजमानस्य धनमिच्छुरिति।

द्विषः (६)—'द्विष्' अप्रीतौ अ० उ० अनि०, द्वेष्टि, द्विष्टे, अस्मात् क्विप्। द्वेष्टि यः सः द्विट् तस्मात् ५मी १व०।

न (५)—'णह' बन्धने दि० उ० अनि० नह्यति, नह्यते, अस्मात् ड। अव्ययसंज्ञा।

नः (६)—अस्मच्छब्दस्य [अस्मभ्यम्] २या बहु० अस्मान् इत्यस्यस्थाने 'बहुवचनस्य वस्नसौ' ८।१।२१ इति नसादेशः।

नः (१०)—अस्मच्छब्दस्य [अस्मभ्यम्] ६ष्ठी बहु० अस्माकमित्यस्यस्थाने नसादेशः।

निरमन्थत (९)—'मन्थ' विलोडने भ्वा० प० से० मन्थति, निः पूर्वस्यास्य लुटि प्रथम० १व० व्यत्ययेनात्मनेपदम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निषत्सि (१)—'षद्लृ०' विसरणगत्यवसादनेषु भ्वा० प० अनि० सीदति, अस्य लोटि मध्यम० १व० 'सेर्ह्यपिच्च' ३।४।८७ 'वा छन्दसि' ३।४।८८ इत्युभयसंज्ञावत्त्वात् आर्धधातुककर्तृकः श्वभावः। सत्सि। नि—सत्सि, षत्वं पूर्वमुक्तम्।

परमात् (८)—'पॄ' पालनपूरणयोः जु० प० अनि० पिपर्त्ति, अस्मात् 'ऋदोरप्' ३।३।५७ इत्यप् परः। 'माङ्' माने जु० आ० अनि० मिमीते, अस्मात् क्विप्। परा मा यस्य स परमस्तस्मात् ५मी १व०।

पाहि (६)—'पा' रक्षणे अ० प० अनि० पाति, अस्य लोटि मध्यम पु० १व० हिः।

पुष्करात् (९)—'पुष्' पुष्टौ भ्वा० प० से० पोषति, दि० प० अनि० पुष्यति, क्र्या० प० से० पुष्णाति, एभ्यः 'पुषः किच्च' उ० ४।४ इति करन्। कित्वान्न गुणः। पुष्यतीति पुष्करं तस्मात् ५मी १व०।

प्रियम् (५)—'प्रीङ्' प्रीतौ दि० आ० अनि० प्रीयते, 'प्रीञ्' तर्पणे कान्तौ च क्र्या० उ० अनि० प्रीणाति, प्रीणीते, अस्मात् 'इगुपध०' ३।१।१३५ इति कः। प्रीणातीति प्रियस्तम् १या १व०।

प्रेष्ठम् (५)—प्रियशब्दात् 'अतिशायने तमबिष्ठनौ' ५।३।५५ इतीष्ठन्। 'प्रियस्थिर...प्र स्थ०' ६।४।१५७ इति प्रियशब्दस्य प्रादेशः। अतिशयेन प्रिय इति प्रेष्ठस्तम् २या १व०।

बर्हिषि (१)—'ष्ठहि' ह्रस्वे शब्दे च भ्वा० प० से० ष्ठहति, अस्मात् 'ष्ठहेर्नलोपश्च' उ० २।१०९ इति इसि प्रत्ययो नुमो नलोपश्च। ष्ठहति वर्द्धते ज्ञानं यत्र तद्बर्हिस्तेषु ७मी बहु०।

मनः (८)—'मन' ज्ञाने दि० आ० अनि० मन्यते, अस्मात् 'सर्वधातुभ्यो०' उ० ४।१८९ इत्यसुन्। मन्यते इति मनस्तम् २या १व०।

महे (१०)—'मह' पूजायाम् भ्वा० प० से० महति, चु० उ० से० महयति, ते, आभ्यां क्विप्। महति पूजयतीति मट् तस्मै ४र्थी १व०।

महीभिः (६)—मह धातोः 'सर्वधातुभ्यो०' उ० ४।१८९ इत्यसुन् महति महयति पूजयतीति महस्तैः ३या० बहु०।

मर्त्यस्य (६)—'मृङ्' प्राणत्यागे तु० प० लुङ् लिङ् शिस्तु आ० वे०, अस्मात् 'अघ्न्यादयश्च' उ० ४।११२ इति यकि निपातः। ६ष्ठी १व०।

मानुषे (२)—'मनु' अवबोधने त० आ० अनि० मनुते, अस्मात् 'शृस्वृस्निहि०' उ० १।१० इति उः। मनुतेऽवबुध्यते इति मनुः। 'मनोर्जातावञ्यतष्ठक् च' ४।१।१६१ इति अञ् युक् च। मनोर्जात्यापत्यं मानुषस्तस्मिन् ७मी १व०।

मिनम् (५)—'ञिमिदा' स्नेहने भ्वा० आ० से० मेदते, दि० प० से० मेद्यति, 'डुमिञ्' प्रक्षेपणे स्वा० उ० अनि० मिनोति, मिनुते, एभ्यः 'अमि चिमि०' उ० ४।१६४ इति क्नः। यद्वा मितात् चायते। 'मेङ्' पालने भ्वा० आ० अनि० चायते, 'सुपि स्थः' ३।२।४ सुपीति योगो विभज्यते, सुपि उपपदे आदन्तात्कः स्यात्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मूर्द्धा: (८)—'मूर्छ' बन्धने भ्वा० प० से० मूर्छति, अस्य 'श्वनुक्षन्' उ० १।१५९ इति कनिन्नन्तो निपातः। मूर्छति बध्नाति स मूर्द्धा। वस्य धः। तस्मात् ५मी १व०। मुच्यतेर्वा।

यज्ञस्य (३)—'यज' देवपूजासङ्गतिकरणदानेषु भ्वा० उ० अनि० यजति, ते, अस्मात् 'यजयाच०' ३।३।९० इति नङ्। यजनं यज्ञस्तस्य ६ष्ठी १व०।

यज्ञानाम् (२)—यज्ञशब्दस्य ६ष्ठी बहु०।

रथम् (५)—'रमु' क्रीडायाम् भ्वा० आ० अनि० रमते, अस्मात् 'इनि कुपि०' उ० २।२ इति कथन्। रमते यस्मिन् येन वा रथस्तम् २या १व०।

वः (५)—युष्मच्छब्दस्य [ते] व्यत्ययेन त्वामित्यस्य स्थाने 'बहुवचनस्य वस्नसौ' ८।१।२१ इति वसादेशः।

वस्त्रः (८)—'वस' निवासे भ्वा० प० अनि० वसति, आच्छादने अ० आ० से० वस्ते, 'वद' व्यक्तायां वाचि भ्वा० प० से० वदति, एतेभ्यः 'इतृवदि०' उ० ३।६२ इति सः। वसेः तस्य तः। वसति, वस्ते, वदति स वस्त्रः १मा १व०।

वर्द्धसि (७)—'वृधु' वृद्धौ भ्वा० आ० से० वर्द्धते, 'व्यत्ययो बहुलम्' ३।१।८५ इति व्यत्ययेन परस्मैपदम्।

विपन्यया (४)—'पन' व्यवहारे स्तुतौ च भ्वा० प० से० पनति, विपूर्वादस्मात् 'ऋहलोर्ण्यत्' ३।१।१२४ 'मितां ह्रस्वः' ६।४।९२। टाप्। विपन्या व्यवहारः स्तुतिर्वा तया ३या १व०।

विवस्वत् (१०)—'वस' धातोः [वत्सः] विपूर्वात् क्विप्। 'तदस्यास्त्यस्मिन्०' ५।२।९४ इति मतुप्। २या १व०।

विश्ववेदसम् (३)—'विष्लृ' व्याप्तौ जु० उ० अनि० वेवेष्टि, वेविष्टे, 'विश' प्रवेशने तु० प० अनि० विशति, आभ्यां 'अशू प्रुषि०' उ० १।१५१ इति क्वन्। वेवेष्टि सर्वं विशति सर्वत्रेति विश्वः (म्)। 'विद' ज्ञाने अ० प० अनि० वेत्ति, 'विद' सत्तायाम् दि० आ० अनि० विद्यते, 'विदृ' लाभे तु० उ० अनि० विन्दति, ते, एभ्यः विहि भुजिभ्यां०' उ० ४।२३८ इति विश्वोपपदेऽसिः। 'गतिकारकोपपदयोः पूर्वपद-प्रकृतिस्वरत्वञ्च' उ० ४।२२७। विश्वं सर्वं वेत्ति, विन्दति, विद्यस्मिन् विद्यते वा विश्ववेदसम् २या १व०। विश्वं सर्वं वेदो धनं यस्येति बहुव्रीहिर्वा।

विश्वस्य (९)—विश्वशब्दस्य ६ष्ठी १व० पुंसि।

विश्वस्याः (६)—विश्वशब्दस्य ६ष्ठी १व० स्त्रियाम्।

विश्वेषाम् (२)—विश्वशब्दस्य ६ष्ठी बहु० पुंसि।

वीतये (१)—'वी' गतिव्याप्तिप्रजनकान्त्यसनखादनेषु अ० प० अनि० वेति, अस्मात् 'मन्त्रे हवेषपचमनविदभूवी०' ३।३।९६ इति क्तिन् वीतिस्तस्मै ४र्थी १व०।

वृणीमहे (३)—'वृङ्' संभक्तौ क्र्या० आ० से० वृणीते, अस्य लटि उत्तम० बहु०।

वृत्राणि (४)—'वृतु' वर्त्तने भ्वा० आ० से० वर्त्तते, वरणे दि० आ० अनि० वृत्यते, आभ्यां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

'स्फायितञ्चि०' उ० २।१३ इति रक्। वर्त्तते सर्वत्र इत्यते वा इत्रः (म्) तानि २या बहु०।

वेद्यम् (५)—विदृलृधातोः विद ज्ञाने इत्यतो वा [विश्ववेदसम्] 'ऋहलोर्ण्यत्' ३।१।१२४ इति ण्यत्। वेत्तुं ज्ञातुं वा योग्यं वेद्यम् २या १व०।

शुक्रः (४)—'ईशुचिर' पूतीभावे दि० उ० से० शुचति, ते, अस्मात् 'ऋजेन्द्र०' उ० २।२८ इति रन् निपात्यते शुचेश्च कः। शुचति पूतीभवतीति शुक्रः १मा १व०।

शु ब्रवाणि (७)—सु पूर्वात् 'ब्रूञ्' व्यक्तायां वाचि अ० उ० अनि० ब्रवीति, ब्रूते, अस्य लोटि उत्तम० १व०। 'सुञः' ८।३।१०७ पूर्वपदस्थात् निमित्तात्परस्य सुञः निपातस्य सस्य षः।

सधस्थात् (८)—सह तिष्ठन्ति यत्र देवाः स सहस्थस्तस्मात् सहस्थात् इत्यस्य 'सधमादस्थयोश्छन्दसि' ६।३।९६ इति सहस्य सधादेशः स्यात्।

समिद्धः (४)—सम्पूर्वात् 'ञिइन्धी' दीप्तौ क० आ० से० इन्धे, इति धातोः 'जीतः क्तः' ३।२।१८७ इति वर्त्तमाने क्तः १मा १व०।

सुक्रतुम् (३)—'डु कृञ्' करणे त० उ० अनि० करोति, कुरुते, अस्मात् 'कृञः कतुः' उ० १।७६ इति कतुः। क्रियते इति क्रतुः कर्म। सु क्रतुः = सुक्रतुस्तम् २या १व०। शोभनः क्रतुर्यस्येति बहुव्रीहिर्वा।

स्तुषे (५)—'ष्टुञ्' स्तुतौ अ० उ० अनि० स्तौति, स्तुते, अस्य लेटि उत्तमैकवचने 'सिब्बहुलं लेटि' ३।१।३४ इति सिप्। यद्वा तिङां तिङो भवन्तीत्युत्तमैकवचनस्य व्यत्ययेन मध्यमैकवचनादेशः।

हव्यदातये (१)—जुहोतेः [आहुतः] 'अचो यत्' ३।१।९७ इति हव्यम्। 'डुदाञ्' दाने जु० उ० अनि० ददाति, दत्ते, 'दाण्' दाने भ्वा० प० अनि० यच्छति, एताभ्यां 'स्त्रियां क्तिन्' ३।३।९४ इति क्तिनि 'छन्दस्युभयथा' ३।४।११७ इति पक्षे सार्वधातुकत्वात् 'घुमास्था०' ६।४।६६ इत्यार्धधातुकनिमित्तो न ईकारः दातिः। हव्यस्य दातिर्हव्यदातिस्तस्यै ४र्थी १व०।

हि (१०)—'ओहाक्' त्यागे जु० प० अनि० जहाति, अस्मात् क्विप्। 'घुमास्था०' ६।४।६६ इतीकारः। व्यत्ययादनभ्यासस्यापि 'ह्रस्वः' ७।४।५९ इति ह्रस्वः। अव्ययसंज्ञा।

हितः (२)—दधातेः [अधि] 'निष्ठा' ३।२।१०२ इति क्तः। 'दधातेर्हिः' इति धातोर्ह्यादेशः। १मा १व०।

होता (१,२) जुहोतेः [आहुतः] 'खुलृचौ' ३।१।१३३ इति 'बहुलं छन्दसि' ६।१।३४ इति सम्प्रसारणं यद्वा 'नप्तृनेष्टृत्वष्टृहोतृ०' उ० २।८५ इति साधुः। १मा १व०।

होतारम् (३)—होतृ शब्दस्य २या १व०।

इति प्रथमदशतिः प्रथमखण्डश्च।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रथमम् (आग्नेयं) पर्व। प्रथमोऽध्यायः। प्रथमः प्रपाठकः। द्वितीयः खण्डः। द्वितीया दशतिः।

अथ प्रथमा।

नमस्ते अग्न इत्यृच आङ्गिरसो विरूप ऋषिः। संवर्गं साम, अग्निर्ऋषिः (अग्नेः संवर्गः। आ० ब्रा०) गायत्री। अग्निः। विनियोगस्तु अग्निस्तुतौ प्रार्थनायां च।

१ २ ३ १ २ ३ १ २ ३ १ २
ॐ नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः।

१ २ ३ १ ३
अमै रमित्र मर्दय ॥ ११ ॥ (क)

पदपाठः। नमः १। ते ४। अग्ने सं०। ओजसे ४। गृणन्ति क्रि०। देव सं०। कृष्टयः १। अमैः ३। अमित्रम् २। अर्दय क्रि०।

अन्वयः। [हे] देव! अग्ने! ते नमः [अस्तु]। कृष्टयः ओजसे [त्वां] गृणन्ति। [त्वं च] अमैः अमित्रम् अर्दय।

आधियाज्ञिकम्। हे 'देव' प्रकाशमय! अग्ने! 'ते' तुभ्यं 'नमः' नमस्कारोऽन्नं वास्तु। 'कृष्टयः' मनुष्या उपासका इति 'ओजसे' आत्मबल-प्राप्तये त्वां 'गृणन्ति' स्तुवन्ति। त्वं च 'अमैः' बलैः स्वकीय-प्रभावैः, रोगादिभयैर्वा 'अमित्रं' बहिःशत्रून् 'अर्दय' नाशय।

आध्यात्मिकम्। हे 'देव' प्रकाशमय 'अग्ने' परमात्मन्! 'ते' तुभ्यं 'नमः' अस्तु। 'कृष्टयः' मनुष्या उपासका इति 'ओजसे' आत्मबल-प्राप्तये [य आत्मदा बलदा यस्य विश्व उपासते। यजुः,

(क) ऋग्वेदे, अष्ट० ६। अध्या० ५। व० २५।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

२५।३३] त्वां 'गृणन्ति' स्तुवन्ति। त्वं च 'अमैः' बलैः स्वकीयप्रभावैः रोगादिभयैर्वा 'अमित्रं' वहिरन्तश्शत्रून् 'अर्दय' नाशय।

निरुक्तम्। नम इति अन्ननामसु ॥ ३।९।४ ॥ ओज इति बलनामसु ॥ ३।९।७ ॥ कृष्टयो मनुष्यनाम ॥ ३।७।१ ॥ अमं भयं बलं वा ॥-१०।२१।१ ॥ अर्दयति वधकर्मसु ॥ ३।१०।४ ॥

अथ द्वितीया।

दूतं वो विश्ववेदसमित्यृचो गोतमवंश्यो वामदेव ऋषिः। वैश्वमनसं साम, विश्वमना चर्षिः (वैश्वमनसं च। आ० ब्रा०) गायत्री। अग्निः। विनियोगस्तु अग्निं दूत (३मं०) मितिवत्।

३१ २ ३१२ ३ २ ३१२
दूतं वो विश्ववेदसं हव्यवाहममर्त्यम्।
१२ ३ २
यजिष्ठमृञ्जसे गिरा ॥ १२ ॥ (क)

पदपाठः। दूतम् २। वः २। विश्ववेदसम् २। हव्यवाहम् २। अमर्त्यम् २। यजिष्ठम् २। ऋञ्जसे क्रि०। गिरा ३।

अन्वयः। दूतं विश्ववेदसं हव्यवाहम् अमर्त्यं यजिष्ठं वः (=त्वाम्) [अग्निं] गिरा ऋञ्जसे (=ऋञ्जे) [अहम् ऋत्विगिति]।

आधियाज्ञिकम्। 'दूतं' देवानां दौत्ये विनियुक्तं 'विश्ववेदसं' सर्वधनं 'हव्यवाहं' देवेभ्यो हविषां वोढारम् 'अमर्त्यम्' अमरणधर्माणं 'यजिष्ठम्' अतिशयेन यष्टारं 'वः' त्वां, वचनव्यत्ययः अग्निमिति 'गिरा' स्तुतिरूपया वाचा 'ऋञ्जसे' प्रसाधयामि, पुरुषव्यत्ययः, वर्त्तयामि अहमृत्विगिति।

आध्यात्मिकम्। 'दूतं' सर्वदुःखनाशकं 'विश्ववेदसं' सर्वधनं, सर्वज्ञं वा 'हव्यवाहं' हव्यस्य दातव्यस्य शुभकर्मफलस्य प्रापकम्

(क) ऋग्वेदे, अष्ट० ३। अध्या० ५। व० ८।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

'अमर्त्यम्' अविनाशिनं 'यजिष्ठम्' अतिशयेन सङ्गमनीयं प्राप्तव्यं 'वः' त्वां परमात्मानमिति 'गिरा' स्तुतिरूपया वाचा 'ऋञ्जसे' परिचरामि अहमुपासक इति।

निरुक्तम्। ऋञ्जतिः प्रसाधनकर्मा ॥ ६।२१।३ ॥

अथ तृतीया।

उप त्वा जामय इत्यृचो भार्गवः प्रयोगो बार्हस्पत्योऽग्निर्वा ऋषिः। आभं औष्टीयं च साम, आभः शुष्टश्चर्षिः (आभाश्चौष्टीये द्वे। आ० ब्रा०) गायत्री। अग्निः। विनियोगस्तु विश्वजिति वह्निष्यवमानस्य नवस्तोत्रे (उपत्वा जामयो गिर इत्युपवतो प्रतिपद्भवति स्तोमस्य रूपम्। ता० म० ब्रा० १६।५।१)

१२ ३ २ ३ २ ३ ३ १ २
उपत्वा जामयो गिरो देदिशती र्हविष्कृतः।
३ १र २र
वायोरनीके अस्थिरन् ॥ १३ ॥ (क)

पदपाठः। उप अ०। त्वा २। जामयः १। गिरः १। देदिशतीः १। हविष्कृतः ४। वायोः ६। अनीके ७। अस्थिरन् क्रि०।

अन्वयः। हविष्कृतः जामयः [इव] देदिशतीः गिरः वायोः अनीके त्वा [परमात्मानम्] उपास्थिरन्।

आधियाज्ञिकम्। 'हविष्कृतः' उपासकार्थम्, उपासकानां हितार्थं वा 'जामयः' बन्धुभूताः इव, यथा बन्धवोऽनुकूलाचरणैर्बन्धूनां सुखानि सम्पादयन्ति तथा 'देदिशतीः' पुनः पुनरुपदिशन्त्यः [दिशिरुच्चारणक्रियः। महाभाष्ये, १।१।१] 'गिरः' वेदवाचः 'वायोः' 'अनीके' सुष्ठूच्चार्यमाणत्वाद्वायुमण्डले 'त्वा' त्वां परमात्मानम् 'उपास्थिरन्' उपतिष्ठन्ते। याभिर्वेदवाग्भिर्यज्ञादिकं निष्पाद्यते तास्तत्सम्पाद्यानन्ते वायुमण्डले (अनन्ताकाशे) परमात्मानं गच्छन्ति।

(क) ऋग्वेदे, अष्ट० ६। अध्या० ७। व० १।१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ता० म० ब्रा० अस्य मन्त्रस्य प्रयोजनं विशेषेण दर्शितम्, 'प्राणैर्वा एष व्यृध्यत इत्याहुयः सर्वं ददाति सर्वान् स्तोमान् सर्वाणि पृष्ठान्युपैतीति यद् वाथव्या भवति प्राणानाए समृद्ध्यै ॥ १६।५।२ ॥

निरुक्तम् । ...जामि र्जमते र्वास्याद् गतिकर्मणः ॥ ३।६।१॥

अथ चतुर्थी ।

उपत्वाग्ने इत्यृचो वैश्वामित्रो मधुच्छन्दा ऋषिः । वैश्वामित्रं साम, विश्वामित्रश्चर्षिः (वैश्वामित्रं च । आ० ब्रा०) गायत्री । अग्निः । विनियोगस्तु प्रातःसायंसवने ।

१ २ ३ १ २ ३ २ ३ २ ३ २
उपत्वाग्ने दिवे दिवे दोषा वस्तर्धियावयम् ।
२ ३ १ २ ३ १ २
नमो भरन्त एमसि ॥ १४ ॥ (क)

पदपाठः । उप अ० । त्वा २ । अग्ने सं० । दिवे, दिवे अ० । दोषावस्तः अ० । धिया ३ । वयम् १ । नमः २ । भरन्तः १ । एमसि क्रि० ।

अन्वयः । [हे] अग्ने ! वयं दिवे दिवे दोषावस्तः धिया नमः भरन्तः त्वा उपएमसि ।

आधियाज्ञिकम् । हे 'अग्ने' ! 'वयम्' ऋत्विज इति 'दिवेदिवे' विज्ञानस्य प्रकाशाय, प्रतिदिनं वा 'दोषावस्तः' रात्रावहनि 'धिया' धारणवत्या बुद्ध्या 'नमः' हवीरूपमन्नं 'भरन्तः' स्रुवादिषु धारयन्तः 'त्वा' त्वाम् 'उपएमसि' प्राप्नुमः ।

आध्यात्मिकम् । हे 'अग्ने' परमात्मन् ! 'वयम्' उपासका इति 'दिवे दिवे' विज्ञानस्य प्रकाशाय 'दोषावस्तः' रात्रावहनि 'धिया' धारणवत्या बुद्ध्या 'नमः' नमस्कारं 'भरन्तः' कुर्वन्तः 'त्वा' त्वाम् 'उप एमसि' उपगच्छामः प्राप्नुमः उपासीमहीति ।

(क) ऋग्वेदे, अष्ट० १ । अध्या० १ । व० २ ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निरुक्तम् । दिवेदिवे इत्यहर्नाम ॥ २।२०।२ ॥ दोषा रात्रिनामसु ॥ २।१८।१ ॥ वस्तोः अहर्नामसु ॥ २।२०।२ ॥ धीरिति प्रज्ञानाम ॥ ३।१३।१७ ॥

अथ पञ्चमी ।

जराबोध इत्यृचोऽजीगर्त्तवंश्यः शुनःशेप ऋषिः । जराबोधीयं साम, अग्निश्चर्षिः (अग्नेर्जराबोधीये । आ० ब्रा०) गायत्री । अग्निः । विनियोगस्तु (जराबोधीयं भवत्यन्नाद्यस्यावरुध्यै । ता० म० ब्रा० १४।५।२७) इत्यन्नादिरक्षणाय लाभाय वाग्निस्तुती ।

१ २ ३ १ २ ३ २ २ ३ १ २
जराबोध तद्विविड्ढि विशे विशे यज्ञियाय ।
१ १ ३ १ २ ३ २
स्तोमꣳ रुद्राय दृशीकम् ॥ १५ ॥ (क)

पदपाठः । जराबोध सं० । तत् २ । विविड्ढि क्रि० । विशेविशे ४ । यज्ञियाय ४ । स्तोमम् २ । रुद्राय ४ । दृशीकम् २ ।

अन्वयः । [हे] जराबोध [अग्ने] विशे विशे तत् विविड्ढि । यज्ञियाय रुद्राय [तुभ्यं] दृशीकं स्तोमं [कुर्म्म इति] ।

आधियाज्ञिकम् । हे 'जराबोध' जरया स्तुत्या बोध्यमान अग्ने ! 'विशेविशे' सर्वप्रजाहितार्थं 'तत्' देवयजनं 'विविड्ढि' प्रविश । 'यज्ञियाय' यज्ञार्हाय पूजनीयाय 'रुद्राय' दुष्टानां रोदयित्रे [यो वै रुद्रः सोऽग्निः । श० ब्रा०, ५।२।३।१३] तुभ्यं 'दृशीकं' दर्शनीयं 'स्तोमं' स्तुतिसमूहं कुर्म इति ।

आध्यात्मिकम् । हे 'जराबोध' जरया स्तुत्या बोध्यमान अग्ने परमात्मन् ! 'विशेविशे' सर्वप्रजाहितार्थं 'तत्' मनः 'विविड्ढि' प्रविश [मनो वै देववाहनम् । श० ब्रा०, १।१।५।२ ॥ मनसा वा इदꣳ सर्वमाप्तम् । श० ब्रा०, १।६।२।२२] 'यज्ञियाय' यज्ञार्हाय पूज-

(क) ऋग्वेदे, अष्ट० १ । अध्या० २ । व० २३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नीयाय 'रुद्राय' दुष्टानां रोदयित्रे, रुतं वेदात्मकं शब्दं कल्पादौ राति ददातीति तस्मै ज्ञानप्रदाय वा तुभ्यं 'दृशीकं' दर्शनीयं 'स्तोमं' स्तुतिसमूहं कुर्म्म इति।

निरुक्तम्। एवं व्याख्यातम्, 'जरा स्तुतिर्जरतेः स्तुतिकर्मणः, तां बोध तया बोधयितरिति वा, तद् विविड्डि तत्कुरु मनुष्यस्य मनुष्यस्य यजनाय स्तोमं रुद्राय दर्शनीयम्॥ १०।८।१॥

रुद्रो रौतीति सतः, रोरूयमाणो द्रवतीति वा, रोदयतेर्वा, 'यद्रुदत्तद्रुद्रस्य रुद्रत्वम्' इति काठकम् 'यदरोदीत्तद्रुद्रस्य रुद्रत्वम्' इति हारिद्रविकम्॥ १०।५।२॥

अथ षष्ठी।

प्रति त्यं चारुमित्यृचः काण्वो मेधातिथिर्ऋषिः। मारुतं साम, अग्निश्चर्षिः (मारुतं च। आ० ब्रा०) गायत्री। अग्निः। विनियोगस्तु उक्थस्तुतौ (मारुतं भवति। ता० म० ब्रा० १४।१२।८)

२ ३ १ २र ३१ २ ३ २ ३ १ २
प्रति त्यं चारु मध्वरं गोपीथाय प्रहूयसे
३ १ २ ३ १ २
मरुद्भि रग्न आगहि॥ १६॥ (क)

पदपाठः। प्रति अ०। त्यम् २। चारुम् २। अध्वरम् २। गोपीथाय ४। प्रहूयसे क्रि०। मरुद्भिः ३। अग्ने सं०। आगहि क्रि०।

अन्वयः। [हे] अग्ने! त्यं चारुम् अध्वरं प्रति गोपीथाय [त्वं] प्रहूयसे। [अतः] मरुद्भिः [सह] आगहि।

आधियाज्ञिकम्। हे 'अग्ने'! 'त्यं' तं 'चारु' विधिवदनुष्ठीयमानम् 'अध्वरं' हिंसारहितं यज्ञम् [अध्वरो वै यज्ञः। श० ब्रा० १।३।३।३८] 'प्रति' 'गोपीथाय' सोमपानाय त्वं 'प्रहूयसे' प्रकर्षेण आह्वयसे। अतः 'मरुद्भिः' मरुद्गणैः सह 'आगहि आगच्छ। वायुसखोऽग्निः प्रसिद्धमिति।

(क) ऋग्वेदे, अष्ट० १। अध्या० १। व० ३६।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आध्यात्मिकम् । हे 'अग्ने' अच्यते प्राप्यते सत्क्रियते वा वेदादिभिः शास्त्रैर्विद्वद्भिश्चेत्यग्निः परमेश्वरस्तत्संबुद्धौ 'त्वं' तं 'चारु' विधिवदनुष्ठीयमानम् 'अध्वरं' हिंसारहितं यज्ञं 'प्रति' 'गोपीथाय' ध्यानाभ्यासरसप्राप्तये त्वं 'प्रह्वयसे' प्रकर्षेणाह्वयसे ध्यायसे इति । अतः 'मरुद्भिः' मितराविभिः सूक्तवाग्भिः सह 'आगहि' आगच्छ, साक्षाद्भव ।

निरुक्तम् । चारु चरतेः ॥ ८।१५।१ ॥ चारु रुचेर्विपरीतस्य ॥ ११।५।४ ॥ अध्वर इति यज्ञ नाम । ध्वरतिः हिंसाकर्मा तत्प्रतिषेधः ॥ १।८।१ ॥ एवं व्याख्यातम्, 'तं प्रति चारुमध्वरं सोमपानाय प्रह्वयसे सोऽग्ने मरुद्भिः सहागच्छेति ॥ १०।३६।१ ॥ मरुतो मितराविणो वा, मितरोचिनो वा, महद्द्रवन्तीति वा ॥ ११।१३।३ ॥

अथ सप्तमी ।

अश्वं न त्वा वारवन्तमित्यृचोऽजीगर्त्तवंश्यः शुनःशेप ऋषिः । त्रीणि सामानि । प्रथम तृतीययोः भार्गवं नाम भृगुश्चर्षिः । द्वितीयं वारवन्तीयमिन्द्रश्चर्षिः (भार्गवे द्वे । आ० ब्रा०) गायत्री । अग्निः । विनियोगस्तु अग्निष्टोमयागे (वारवन्तीयमग्निष्टोमसामकार्यम् । ता० म० ब्रा० ५।३।८)

२ ३ २ ३ १ २ ३ १ २ ३ १ २र
अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः ।
३ १ २ ३ १ २
सम्राजन्तमध्वराणाम् ॥ १७ ॥ (क)

पदपाठः । अश्वम् २ । न अ० । त्वा २ । वारवन्तम् २ । वन्दध्यै अ० । अग्निम् २ । नमोभिः ३ । सम्राजम् २ । तम् २ । अध्वराणाम् ६ ।

अन्वयः । अध्वराणां सम्राजं, वारवन्तम् अश्वं न, तं त्वा अग्निं नमोभिः वन्दध्यै [प्रवृत्ताः] ।

(क) ऋग्वेदे, अष्ट० १ । अध्या० २ । व० २२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आधियाज्ञिकम् । 'अध्वराणां' हिंसारहितानां यज्ञानां 'सम्राजं' सम्यक् प्रकाशकं 'वारवन्तं' बालवन्तम् 'अश्वं' 'न' इव, यथाश्वः पुच्छादिबालैर्दंशमशकादीन् परिहरति तथाग्निर्ज्वालयास्मद्विरोधिनः परिहरति, अतोऽश्ववत्, 'तं' 'त्वा' त्वाम् 'अग्निं' 'नमोभिः' अन्नैः स्तुतिभिर्वा 'वन्दध्यै' वन्दितुं प्रवृत्ता वयमृत्विज इति।

आध्यात्मिकम् । 'अध्वराणां' हिंसारहितानां यज्ञानां 'सम्राजं' सम्यक् प्रकाशकं 'वारवन्तं' बालवन्तम् 'अश्वं' 'न' इव, परमेश्वरो बाधकान् कामक्रोधादीन् स्वसामर्थ्यैः परिहरति अतोऽश्ववत्, 'तं' प्रसिद्धं 'त्वा' त्वाम् 'अग्निं' परमात्मानं 'नमोभिः' नमस्कारैः स्तुतिभिश्च 'वन्दध्यै' वन्दितुं प्रवृत्ता वयमुपासका इति।

निरुक्तम् । 'अश्वं न त्वा वारवन्तम्' अश्वमिव त्वां बालवन्तम्। बाला दंशवारणार्था भवन्ति ॥ १।२०।४ ॥

अथाष्टमी ।

और्वभृगुवच्छुचिमित्यृचः काण्वो मेधातिथिर्ऋषिः। सामुद्रं साम, और्ववंश्यो वैधारय ऋषिः (और्वस्य। आ० ब्रा०) गायत्री। अग्निः। विनियोगस्तु अग्न्याह्वाने।

३ १ २र ३ १ २र
और्वभृगुवच्छुचि मप्नवानवदाहुवे।
३ १ २ ३ १ २
अग्निꣳ समुद्रवाससम् ॥ १८ ॥ (क)

पदपाठः। और्वभृगुवत् अ०। शुचिम् २। अप्नवानवत् अ०। आहुवे क्रि०। अग्निम् २। समुद्रवाससम् २।

अन्वयः। और्वभृगुवत् अप्नवानवत् शुचिं समुद्रवाससम् अग्निम् आहुवे।

(क) ऋग्वेदे, अष्ट० ६। अध्या० ७। व० ९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आधियाज्ञिकम् । 'और्वभृगुवत्' यथाऽहिताग्नयो यज्ञविद्यावेत्तारः ज्ञानकाण्डिनः 'अप्नवानवत्' यथा श्रौतकर्मकाण्डिनस्तथा 'शुचिं' शुद्धं 'समुद्रवाससम्' आकाशे व्याप्तम् 'अग्निम्' 'आहुवे' आहितं करोमि । अनेन परमात्मोपदिशति हे मनुष्याः! यथाऽऽहिताग्नयो यज्ञविद्यावेत्तारः ज्ञानकाण्डिनः श्रौतकर्मकाण्डिनश्च यथार्थतया यज्ञं कर्त्तुं शक्नुवन्ति तथा यूयमप्यनुतिष्ठत ॥ यद्वा 'समुद्रवाससं' वेदवाचि स्थितं [वाग्वै समुद्रः । ता० म० ब्रा० ६।४।७॥ अग्निर्वाग्भूत्वा मुखं प्राविशत् । ऐतरेयोपनिषदि, खं० २] अनेन वाक्स्फूर्त्तिः प्रतिपद्यते ।

आध्यात्मिकम् । 'और्वभृगुवत्' यथा ज्ञानकाण्डिनः 'अप्नवानवत्' यथा श्रौतकर्मकाण्डिनः तथा 'शुचिं' शुद्धस्वरूपं 'समुद्रवाससं' वेदवाचि स्थितं [ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधिविश्वे निषेदुः । ऋग्वेदे, अष्ट० २ । अध्या० ३ । व० २१] 'अग्निं' परमात्मानम् 'आहुवे' आह्वयामि ।

निरुक्तम् । [और्वो वै जमदग्निः]। जमदग्नयः प्रजमिताग्नयो वा प्रज्वलिताग्नयो वा तैरभिहुतो भवति ॥ ७।२४।८ ॥ शुचिः शोचतेर्ज्वलति कर्मणः ॥ ६।१।१ ॥ समुद्र इत्यन्तरिक्षनाम ॥ २।१०।३ ॥

अथ नवमी ।

अग्निमिन्धानो मनसेत्यृचो मेधातिथिर्ऋषिः । असङ्गं साम, अत्रिर्ऋषिः (अत्रेश्च । आ० ब्रा०) गायत्री । अग्निः । विनियोगस्तु प्रातः सवनेऽग्निदीपने ।

३ १ २ ३ १ २र ३ १२ ३ १ २
अग्निमिन्धानो मनसा धियꣳ सचेत मर्त्यः ।
३ १ २ ३ १ २
अग्निमिन्धे विवस्वभिः ॥ १९ ॥ (क)

(क) ऋ० ६।७।१२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पदपाठः। अग्निम् २। इन्धानः १। मनसा ३। धियम् २। सचेत क्रि०। मर्त्यः १। अग्निम् २। इन्धे क्रि०। विवस्वभिः ३।

अन्वयः। मर्त्यः अग्निम् इन्धानः मनसा धियं सचेत। विवस्वभिः अग्निम् इन्धे।

आधियाज्ञिकम्। 'मर्त्यः' मनुष्यः 'अग्निम्' 'इन्धानः' काष्ठैः प्रज्वलयन् 'मनसा' एव श्रद्दधानः 'धियं' कर्म यज्ञादिकं 'सचेत' कुर्वीत। 'विवस्वभिः' ऋत्विभिः 'अग्निम्' 'इन्धे' प्रज्वलयेत्।

आध्यात्मिकम्। 'मर्त्यः' मनुष्यः 'अग्निं' परमात्मानम् 'इन्धानः' ध्यानादिना मनसि प्रकाशयन् 'मनसा' मननेन 'धियं' प्रज्ञां 'सचेत' सम्यक् प्राप्नुयात्। 'विवस्वभिः' प्रकाशहेतुभिर्ध्यान-धारणासमाधिभिः 'अग्निं' प्रकाशस्वरूपं परमात्मानम् 'इन्धे' उपासीत।

अथ दशमी।

आदित्प्रत्नस्य रेतस इत्यृचः काण्वो वत्स ऋषिः। निधनकामं साम, प्रजापतिश्चर्षिः (प्रजापतेश्च निधनकामम्। आ० ब्रा०) गायत्री। अग्निः। विनियोगस्तु (निधनवता स्तुवन्ति वीर्यं वै गायत्री वीर्यं निधनं वीर्येणैव तद्वीर्यं ए समर्द्धयति। ता० म० ब्रा० ७।३।१३) इति वीर्यप्राप्तयेऽग्निस्तुतौ।

१उ ३ २ ३ १ २ ३ १ २ ३ २
आदित् प्रत्नस्य रेतसो ज्योतिः पश्यन्ति वासरम्।
३ २उ ३ १ २ ३ २
परो यदिध्यते दिवि ॥ २० ॥ (क)

(क) ऋग्वेदे, अष्ट० ५। अध्या० ८। व० १४॥ 'दिवि' इत्यत्र 'दिवा' इति पाठान्तरम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पदपाठः । आत् अ० । इत् अ० । प्रत्नस्य ६ । रेतसः ६ । ज्योतिः १ । पश्यन्ति क्रि० । वासरम् २ । परः १ । यत् १ । इध्यते क्रि० । दिवि ७ ।

अन्वयः । परः दिवि यत् ज्योतिः इध्यते, आत् इत् (=तदेव) प्रत्नस्य रेतसः वासरं [ज्योतिः] [जनाः] पश्यन्ति ।

आधियाज्ञिकम् । 'परः दिवि' द्युलोकादपि परस्तात् 'यत्' 'ज्योतिः' 'इध्यते' दीप्यते, भाति 'आत् इत्' तदेव 'प्रत्नस्य' सनातनस्य 'रेतसः' ज्योतिषां बीजभूतस्य परमात्मनः 'वासरं' नियामकं, यज्ञाग्निरूपं, रूपान्तरीभूतं सूर्यरूपेण राजमानं च 'पश्यन्ति' ऋत्विग्यजमानादयो यज्ञवेद्यां पश्यन्ति । अयं भावः—परमात्मनः सूक्ष्मं यज्जगति रस्ति तस्यैवांशीभूतमिदं ज्योति र्यज्ञे वह्निरूपेण दिवि सूर्यरूपेण च सर्वे प्रत्यक्षं कुर्वन्ति । याज्ञिकोऽग्निर्नसाधारणः । सूर्यश्च परमस्य ज्योतिष एवांशीभूतं प्रत्यक्षं ज्योतिरिति दिक् [आदित्यो वा एष एतन्मण्डलं तपति...य एषोऽन्तरादित्ये हिरण्मयः पुरुषः । तैत्तिरीयारण्यके, १०।१३]

आध्यात्मिकम् । 'परः दिवि' द्युलोकादपि परस्तात् 'यत्' 'ज्योतिः' 'इध्यते' दीप्यते, भाति 'आत् इत्' तदेव 'प्रत्नस्य' सनातनस्य 'रेतसः' ज्योतिषां बीजभूतस्य परमात्मनः 'वासरं' नियामकं ज्योतिः 'पश्यन्ति' विद्वांसो ज्ञानदृष्ट्या पश्यन्ति । अयं भावः—सूर्यो द्युस्थानः । नि० ७।५।२ । द्युलोके सूर्यस्य ज्योतिः प्रकाशते इति प्रसिद्धम् । द्युलोकात्परतो यत्र सूर्यादिज्योतिषां गतिर्नास्ति तत्रापि ज्योतिषां ज्योतिर्भूतस्याखण्डज्योतिषः परमात्मनो ज्योतीराजते [न तत्र सूर्यो भाति न चन्द्रतारकं, नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं, तस्य भासा सर्वमिदं विभाति । कठोपनिषदि अ० २ वल्ली ५] तज्जगतिर्विद्वांसोऽध्यात्मदृष्ट्या पश्यन्ति ।

निरुक्तम् । प्रत्नमिति पुराणनाम ॥ ३।१९।२३ ॥ वासराणि वेसराणि विवासनानि गमनानीति वा ॥ ४।७।१ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ व्याकरणम् ।

अग्निम् (१७, १८, १९, १९)—[१म दशति:] ।

अग्ने (११, १४, १६)—[१म द०] ।

अध्वरम् (१६)—'ध्वृ' हृङ्गने [कौटिल्ये] भ्वा० प० अनि० ध्वरति, अस्मात् पचाद्यच्। ध्वर: । तत: नञ् । नास्ति ध्वर: कौटिल्यं यस्मिन् सोऽध्वरस्तम् २या १व० ।

अध्वराणाम् (१७)—अध्वरशब्दस्य ६ष्ठी बहु० ।

अनीके (१३)—'अन' प्राणने अ० प० से० अनिति, अस्मात् 'अनिहृषीभ्यां किच्च' उ० ४।१७ इति ईकन् किच्चान्न वृद्धि: । अनिति जीवयतीत्यनीकं तस्मिन् ७मी १व० ।

अप्नवानवत् (१८)—'आप्लृ' व्याप्तौ स्वा० प० अनि० आप्नोति, अस्मात् 'आप: कर्माख्या०' उ० ४।२०८ इत्यसुन् ङ्खी नुट् च । अप्न: कर्म नि० ३।१।१ । 'वन' संभक्तौ भ्वा० आ० से० वनते अस्मात् घञ् वान: । अप्नसि कर्मणि वान: संभक्तिर्यस्य सोऽप्नवान: । ततो वति: । अव्ययम् ।

अमर्त्यम् (१२)—नञ्+मर्त्य: [मर्त्यस्य १म द०] तममर्त्यम् २या १व० ।

अमित्रम् (११)—नञ्+मित्रम् [मित्रम् १म द०] अमित्र: तम् २या १व० ।

अमै: (११)—'अम' रोगे चु० प० से० आमयति, अस्मात् पचाद्यच्, तै: ३या बहु० ।

अर्दय (११)—'अर्द' हिंसायाम् चु० प० से० अर्दयति, अस्य लोटि मध्यम० १व० ।

अश्नम् (१७)—'अशू' व्याप्तौ सङ्घाते च स्वा० आ० से० अश्नुते, 'अश' भोजने क्र्या० प० से० अश्नाति, आभ्याम् 'अशू प्रुषि०' उ० १।१५१ इति क्नन् । अश्नुते व्याप्नोति, अश्नाति भक्षयति वाश्नस्तम् २या १व० ।

आगहि (१६)—'गाङ्' गतौ अ० आ० अनि० गाते, आङ् पूर्वस्यास्य लोण्मध्यमैकवचने व्यत्ययेन परस्मैपदं ङ्खश्च ।

आत् (२०) अतधातो: [अतिथिन्] व्यत्ययेन खि: । अव्ययसंज्ञा ।

आह्वे (१८)—आङ्पूर्वस्य 'ह्वेञ्' स्पर्द्धायां शब्दे च भ्वा० उ० अनि० ह्वयति, ते, धातो: व्यत्ययेन सम्प्रसारणवत् लटि उत्तमैकवचने उवङादेश: ।

इत् (२०)—इण् धातो: [इतरा: १द] क्विप्, तुक्, अव्ययसंज्ञा च ।

इध्यते (२०)—इन्धी धातो: [समिद्ध: १द] कर्मणि वाच्ये । प्रथम पु० १व० ।

इन्धान: (१९)—इन्धीधातो: शानच् । १मा १व० ।

इन्धे (१८)—इन्धीधातो: लटि उत्तम पु० १व० ।

उप अस्थिरन् (१३)—उपेत्यव्ययं सामीप्ये । 'उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वाच्यम्' वा० १।३।२५ इति उपपूर्वात्तिष्ठते: 'ष्ठा' गतिनिवृत्तौ भ्वा०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प० अनि० तिष्ठति, आत्मनेपदम्। लुङि, प्रथम पु० बहु० 'मन्त्रेघस०' २।४।८० इति च्लेर्लुक्. 'स्थाघ्वो०' १।२।२७ इतीत्वं, व्यत्ययेन 'झस्यरन्' ३।४।१०५।

उप एमसि (१४)—उपपूर्वात् इण् धातोः [इतराः १द] मसि 'इदन्तोमसि' ७।१।४६ इति मस इमागमः। इमसि। आ+इमसि=एमसि।

ऋञ्जसे (१२)—'ऋजि' भर्जने भ्वा० से० ऋञ्जते, अस्मात्तम पु० १व० व्यत्ययेन लटि मध्यम पु० १व०। धातूनामनेकार्थत्वात्साधुः।

ओजसे (११)—'उञ्ज' आर्जवे तु० प० से० उञ्जति, अस्मात् 'उव्जेर्वलेवलोपश्च' उ० ४।१९२ इत्यसुन् वलोपश्च। ४र्थी १व०।

और्वभृगुवत् (१८)—'ऊर्णुञ्' आच्छादने अ० उ० से० ऊर्णोति, ऊर्णौति, ऊर्णुते, अस्मात् 'महति ह्रस्वश्च' उ० १।३१ इति कुप्रत्ययो तु लोपो ह्रस्वश्च। उर्वः। 'तस्येदम्' ४।३।१२० इत्यण्। और्वः। 'भस्ज' पाके तु० उ० अनि० भृञ्जति, ते, अस्मात् 'प्रथिमृदिभस्जां०' उ० १।२८ इति कुः। भृगुः। और्वो यो भृगुः स और्वभृगुः। 'तेन तुल्यं०' ५।१।११५ इति वतिः। अथवा उर्वी पृथिवी नि० २।५।२ तत्र भवा और्वाः पृथिवीस्थाः। भृगव इति पदं नाम, तेन च ज्ञानादयोऽर्थाः—और्वा ये भृगवः=पृथिवीस्था ये ज्ञानकाण्डिनस्तद्वत्। अव्ययपदम्।

क्रष्टयः (११)—'कृष' विलेखने भ्वा० प० अनि० कर्षति, तु० उ० अनि० कृषति, ते, अस्मात् 'निष्ठा' ३।२।१०२ इति क्तः। कृष्टं कर्म तदस्यास्तीति क्रष्टिः 'लुगकारेकाररेफाश्च वक्तव्याः' वा० ४।४।१२८ इत्यनेनेकारः। १मा बहु०।

गिरः (१३)—[१द]।

गिरा (१२)—[१द]।

गृणन्ति (११)—गृधातोः [गृणानः १द] लटि प्रथम पु० बहु०।

गोपीथाय (१६)—'पातृ०' उ० २।७ इति थक् 'पा' पाने भ्वा० प० अनि पिबति, पिबतीति पीयते वा पीथः। 'निशीथगोपीथा०' उ० २।९ इति निपात्यते। गोः पीथः पानं=गोपीथः। यद्वा 'पा' रक्षणे [पाहि १द] इति धातोः, गां वाणीं पाति रक्षतीति गोपीथो वेदज्ञस्तस्मै ४र्थी १व०।

चारुम् (१८) 'चर' गतौ भ्वा० प० वे० चरति, अस्मात् 'इसनिजनिचरि०' उ० १।३ इति ञुण्। चरतीति चारुस्तम् २या १व०।

जरावीध (१५)—'जॄष्' वयोहानौ भ्वा० प० से० जूषिति, दि० प० से० जीर्यति, आभ्यां 'षिद्भिदा०' ३।३।१०४ इत्यङ् 'ऋदृशोऽङि गुणः' ७।४।१६। टाप्। बुध, अवबोधने दि० आ० अनि० बुध्यते, अस्मात् 'हलश्च' ३।३।१२१ इति घञ् बोधः। जरया स्तुत्या (धातूनामनेकार्थत्वात्) बोधो यस्य सं० १व०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नामयः (१३)—याति [आयाहि १द] कार्याणि प्रापयतीति यामिः 'नियो मिः' उ० ४।४१ इति आदे र्यस्य जत्वं जामिस्ताः १मा बहु०।

ज्योतिः (२०)—'द्युत' दीप्तौ भ्वा० आ० से० द्योतते, अस्मात् 'द्युतेरिसिन्नादेश्च जः' उ० २।११० द्योतते प्रकाशते तज्ज्योतिस्तत् १मा १व०।

तत् (१५) 'तनु' विस्तारे त० उ० से० तनोति, तनुते, अस्मात् क्विप्+तुक्। 'गमादीनामिति वक्तव्यम्' वा० ६।४।४० इत्यनुनासिकलोपः। 'त्यजितनिवजिभ्यो डित्' उ० १।१३२ अदेर्डित्वाट्टिलोपः। सर्वनामसंज्ञा। तत् २या १व० क्लीबे।

तम् (१७)—तच्छब्दस्य पुंसि २या १व०।

ते (११)—[ते १द]।

त्यम् (१६) 'त्यज' वयोहानौ भ्वा० प० अनि० त्यजति, अस्मात् 'त्यजितनि०' उ० १।१३२ इति। सर्वनामसंज्ञा।

त्वा (१३, १४, १७)—त्वामित्यस्य [त्वाम् १द] 'त्वामौ द्वितीयायाः' ८।१।२३ इति त्वादेशः। २या १व०।

दिवि (२०)—दिवु [दिवः १द] धातोः क्विप्। ७मी १व०।

दिवे दिवे (१४)—दिवु धातोः [दिवः १द] का प्रत्ययः दिवा। वीप्सायां द्वित्वम्। 'सुपां सुलुक्०' ७।१।३९ इति शे भावः॥ यद्वा दिव्'शब्दस्य सप्तम्याः शेभावः।

दूतम् (१२)—[१द]

दृशीकम् (१५)—दृश [दृशे १द] धातोः 'अलीकादयश्च' उ० ४।२५ इति कीकन्प्रत्ययान्तो निपातः। २या १व०।

दिदिशतीः (१३)—'दिश' दाने तु० प० अनि० दिशति, अस्मात् यङ्लुगन्तात् शतृप्रत्ययः ततः 'उगितश्च' ४।१।६ इति ङीप्। १मा १व०।

धियम् (१९)—'ध्यै' चिन्तायाम् भ्वा० प० अनि० ध्यायति, अस्मात् 'अन्येभ्योऽपि दृश्यते' ३।२।१७८ इति क्विप् अनुवर्त्य 'ध्यायतेः सम्प्रसारणञ्च' वा० इति क्विप् सम्प्रसारणं च। 'इलः' ६।४।२ अङ्गावयवाद्इलः परं यत्सम्प्रसारणं तदन्ताङ्गस्य दीर्घः स्यात्। ध्यायतीति धीस्ताम् २या १व०।

धिया (१४)—धी शब्दस्य ३या १व०।

न (१७)—[१द]।

नमः (११, १४)—'णमु' प्रह्वत्वे शब्दे भ्वा० प० वे० नमति, अस्मात् 'सर्वधातुभ्योऽसुन्' उ० ४।१८९ इत्यसुन्। २या १व०।

नमोभिः (१७)—नमस् शब्दस्य ३या बहु०।

परः (२०)—[परमात् १द]।

पश्यन्ति (२०)—दृशधातोः [दृशे १द] लटि प्रथम पु० बहु०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रति (१६)—'प्रा' पूरणे अ० प० अनि० प्राति, 'प्रथ' प्रख्याने भ्वा० आ० से० प्रथते, आभ्यां बाहुलकाडडतिः। अव्ययसंज्ञा। आभिमुख्ये।

प्रवस्य (२०)—'नथ पुराणे प्रात्' वा० ५।४।२५ इति पुराणवाचिनः प्रशब्दात् न प्रत्ययः प्रवः (म्) तस्य ६ष्ठी १व०।

प्रहयसे—(२६) प्र पूर्वात् हेधातोः [आडुवे] कर्मणिवाच्ये मध्यम पु० १व०।

भरन्तः (१४)—भृधातोः [आभर १द] शतृप्रत्ययः हस्य भः। १मा बहु०।

मनसा (१९)—मनस्शब्दस्य [मनः १द] ३या १व०।

मरुद्भिः (१९)—मृङ् धातोः [मर्त्यस्य १द] 'मृगो रुतिः' उ० १।९४ इत्युतिप्रत्ययः। म्रियन्ते मारयन्ति वा मरुतस्तैः ३या बहु०।

मर्त्यः (१९)—मर्त्यशब्दस्य [मर्त्यस्य १द] १मा १व०।

यत् (२०)—यज धातोः [यज्ञस्य १द] 'त्यजिसनियजि०' उ० १।१३२ इत्यदिः। डित्वाट्टिलोपः। सर्वनामसंज्ञा। १मा १व०।

यजिष्ठम् (११)—यज धातोः [यज्ञस्य १द] पचाद्यच् 'अतिशायने०' ५।३।५५ इतीष्ठन्। 'यस्येति च' ६।४।१४८ इत्यलोपः। तम् २या १व०।

यज्ञियाय (१५)—यज्ञशब्दात् [यज्ञस्य १द] 'तदर्हति' ५।१।६३ इत्यस्याधिकारे 'यज्ञर्त्विग्भ्यां घखञौ' ५।१।७१ इति घः। 'आयनेय०' ७।१।२ इति घस्येय् आदेशः। यज्ञमर्हतीति यज्ञियस्तस्मै ४र्थी १व०।

रुद्राय (१५)—'रुदिर्' अश्रुविमोचने अ० प० से० रोदिति, अस्मात् 'रोदेर्णिलुक् च' उ० २।२२ इति रक् णेश्च लुक्। रोदितीति रुद्रः॥ रुतं वेदात्मकं शब्दं कल्पादौ ब्रह्मणे राति। रुत्+रा, दाने 'आतोऽनुपसर्गे कः' ३।२।३ इतिकः।

रेतसः (२०)—'री' गतिरेषणयोः क्रया० प० अनि० रिणाति, अस्मात् 'सुरिभ्यां तुट् च' उ० ४।२०२ इत्यसुन् तुडागमश्च। रेतसस्य ६ष्ठी १व०।

वः (१२)—[१द०]।

वन्दध्ये (१७)—'वदि' अभिवादनस्तुत्योः भ्वा० आ० से० वन्दते, अस्मात् 'तुमर्थे सेसेन्०' ३।४।९ इति तुमर्थे अध्ये प्रत्ययः। वन्दध्ये=वन्दितुम्। अव्ययपदम्।

वयम् (१४)—अस्मच्छब्दस्य [अस्मभ्यम् १द०] १मा बहु०।

वसाः (१४)—वस आच्छादने [वस्त्रः १द०] धातोः व्यत्ययेन कर्त्तरि तीसुन्, वस्तीः, व्यत्ययेन श्रीकारलोपः। यद्वा दोषावस्तः=दोषा रात्रेः तमसः इत्यर्थः वस्ता आच्छादयिता, तत्सम्बुद्धौ। वस आच्छादने+ट्रच्, सं०।

वायोः (१३)—'वा' गतिगन्धनयोः अ० प० से० वाति, अस्मात् 'छवापा०' उ० १।१ इति उः। युक्। वातीति वायुस्तस्य ६ष्ठी १व०।

वारयन्तम् (१७)—'वृञ्' वरणे स्वा० उ० से० वृणोति, वृणुते, अस्मान्नन्तादघञ्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

'तदस्यास्त्यस्मिन्०' ५।२।९४ इति मतुप्। वाराः सन्ति अस्य स वारवान्, २या १व०।

वासरम् (२०)—'वस' स्नेहच्छेदापहरणेषु चु० प० से० वासयति, अस्मात् 'अर्त्तिकमि०' उ० ३।१३२ इत्यरः। २या १व०।

विवस्वभिः (१९)—विवस्वच्छब्दस्य [विवस्वत् १द] ३या बहु०। व्यत्ययेन दलोपः।

विविष्टि (१५)—विशते [विश्ववेदसम् १द] यङ्लुगन्ताल्लोण्मध्यमैकवचने 'हुझल्भ्यो हेर्धिः' ६।४।१०१ इति हेर्धिः।

विशे विशे (१५)—विशतेः [विश्ववेदसम् १द] क्विप्। 'व्रश्च०' ८।२।३६ इति षत्वं, जश्त्वचर्त्वे। 'सर्वस्य द्वे' ८।१।१ इत्यनुवर्त्य 'नित्यवीप्सयोः' ८।१।४ इति वीप्सायां द्वित्वम्। ४र्थी १व०।

विश्ववेदसम् (१३)—[१द]।

सचेत (१९)—'षच' सेचने सेवने च भ्वा० आ० से० सचते, धातोः लिङि प्रथम पु० १व०।

समुद्रवाससम् (१८)—सम्पूर्वात् उन्दीक्लेदने [इन्दुभिः १द] धातोः 'स्फायितञ्चि०' उ० २।१३ इतिरक्। चन्द्रोदये सम्यक् उन्दन्ति क्लिद्यन्ति आपो यत्र। सम् समीचीनाः उद्रा जलचरविशेषा अस्मिन्निति वा। सह मुद्रया मर्य्यादया वर्त्तते इति वा। समुत्पद्य भूतानि द्रवन्ति लयं गच्छन्ति अस्मिन्निति वा। 'वसेर्णित्' उ० ४।२१८ इति 'वस' आच्छादने इति धातोऽसुन् वासः। समुद्रे वासो यस्य तम् २या १व०।

सम्राजम् (१७)—सम् पूर्वात् 'राजृ' दीप्तौ भ्वा० उ० से० राजति, ते, धातोः क्विप्। 'मो राजि समः क्वौ' ८।३।२५ इति समो मस्य मकारः। सम्यक् राजते प्रकाशते इति सम्राट् तम् २या १व०।

सोमम् (१५)—षुधातोः [सुवे १द०] 'अर्त्तिसु०' उ० १।१४० इति मन्। सौति येन स सोमस्तम् २या १व०।

इति द्वितीयदशतिः द्वितीयखण्डश्च।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रथमम् (आग्नेयं) पर्व। प्रथमोऽध्यायः। प्रथमः प्रपाठकः। तृतीयः खण्डः। तृतीया दशतिः।

अथ प्रथमा।

भार्गवः प्रयोग ऋषिः बार्हस्पत्योऽग्निर्ऋषिर्वा। पञ्चसामानि, तेषां त्रयाणां गेयगानानां सिन्धुचित्तिर्ऋषिः सैन्धुचित्तं च नाम (सैन्धुचितानि त्रीणि। आ० ब्रा०) गायत्री। अग्निः। विनियोगस्तु (अग्निं वो वृधन्तमिति। अवर्धन्त ह्येतर्हि यजमानमेव तया वर्धयन्ति। ता० म० ब्रा० १२।१२।१, २) इति वृद्धिकामयज्ञेऽग्निस्तुतौ।

३ १ २ ३ १ २ ३ १ २ ३ २
अग्निं वो वृधन्तमध्वराणां पुरूतमम्।
२ ३ २ ३ १ २
अच्छा नप्त्रे सहस्वते ॥ २१ ॥ (क)

पदपाठः। अग्निम् २। वः २। वृधन्तम् २। अध्वराणाम् ६। पुरूतमम् २। अच्छा अ०। नप्त्रे ४। सहस्वते ४।

अन्वयः। [हे मनुष्याः!] वः (=यूयम्) अध्वराणां नप्त्रे (=नप्तारं) सहस्वते (=सहस्वन्तं) वृधन्तं (=वर्धमानं) पुरूतमम् अग्निम् अच्छा [गच्छत]।

आधियाज्ञिकम्। हे मनुष्याः! 'वः' यूयं, विभक्तिव्यत्ययः 'अध्वराणां' हिंसारहितानां यज्ञानां 'नप्त्रे' बन्धुं, विभक्तिव्यत्ययः 'सहस्वते' बलवन्तं, विभक्तिव्यत्ययः 'वृधन्त' ज्वालाभिर्वर्द्धमानं 'पुरूतमम्' अतिशयेन बहुम् 'अग्निम्' 'अच्छा' अभि गच्छत।

आध्यात्मिकम्। हे मनुष्याः! 'वः' यूयम् 'अध्वराणां' हिंसारहितानां यज्ञानां 'नप्त्रे' बन्धुं तद्वदनुकूलमिति 'सहस्वते'

(क) ऋ०, अष्ट० ६। अध्या० ७। व० १०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बलवन्त मनन्तशक्तिमन्तं 'पुरुतमं' पुरून् बहून् दुष्टगुणान् तमयति तं दोषापकर्षकम् 'अग्निं' परमात्मानम् 'अच्छा' अभि गच्छत सुष्ठूपासीध्वम् ।

निरुक्तम् । पुरु बहुनामसु ॥ ३।१३।१ ॥ अच्छाभेराभु-मिति शाकपूणिः ॥ ५।२८।२ ॥ सह इति बलनाम ॥ ३।९।७ ॥

अथ द्वितीया ।

बार्हस्पत्यो भरद्वाज ऋषिः । त्रीणि सामानि गेयगानानि । द्वयोः अग्निर्ऋषिः हर इति नाम च । तृतीयस्य वामदेव ऋषिः वामदेव्यमिति नाम च (अग्ने हरसी इहवद्वामदेव्यं तृतीयम् । आ० ब्रा०) । गायत्री । अग्निः । विनियोगस्तु सत्पूर्णफलायतन-प्रजालाभे (ये वामदेव्येन स्तुत्वोत्तिष्ठन्ति ते सतः सदभ्युत्तिष्ठन्ति पूर्णात्पूर्णमायतनादायतनमन्तरिक्षायतना हि प्रजा ॥ ता० म० ब्रा० ४।८।१३)

३ २ ३ १ २ ३ २ ३ २ ३ २ ३ २ १ ३
अग्निस्तिग्मेन शोचिषा यꣳ सद् विश्वं न्यत्रिणम् ।
३ १ २ ३ २
अग्निर्नो वꣳसते रयिम् ॥ २२ ॥ (क)

पदपाठः । अग्निः १ । तिग्मेन ३ । शोचिषा ३ । यंसत् क्रि० । विश्वम् २ । नि अ० । अत्रिणम् २ । अग्निः १ । नः ४ । वंसते क्रि० । रयिम् २ ।

अन्वयः । अग्निः तिग्मेन शोचिषा विश्वम् अत्रिणं निं-यंसत् । [अपि च] अग्निः नः रयिं वंसते ।

आधियाज्ञिकम् । 'अग्निः' 'तिग्मेन' तीक्ष्णेन 'शोचिषा' तेजसा 'विश्वं' सर्वम् 'अत्रिणं' हिंसकं रोगादिकं तद्धेतुभूतं च

(क) ऋ०, अष्ट० ४ । अध्या० ५ । व० २६ ॥ 'य ꣳ सत्' इत्यत्र 'यासत्', 'वंसते' इत्यत्र 'वनते' ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

'नियंसत्' निहन्तु, नाशयतु। अपि च 'अग्निः' 'नः' अस्मभ्यं 'रयिं' धनं 'वंसते' ददातु।

आध्यात्मिकम्। 'अग्निः' परमात्मा 'तिग्मेन' तीक्ष्णेन 'शोचिषा' तेजसा 'विश्वं' सर्वम् 'अत्रिणं' हिंसकमज्ञानादिकं 'नियंसत्' नाशयतु। अपि च 'अग्निः' स एव परमात्मा 'नः' अस्मभ्यं 'रयिं' धनं 'वंसते' ददातु।

निरुक्तम्। तिग्मं तेजतेरुत्साहकर्मणः ॥ १०।६।२ ॥ शोचिरिति ज्वलतो नाम ॥ २।२८।४ ॥

अथ तृतीया।

गोतमवंश्यो वामदेव ऋषिः। द्वयोः साम्नोः अग्नि ऋषिः यामसमिति नाम (यामे द्वे। आ० ब्रा०) गायत्री। अग्निः। विनियोगस्तु अनपजय्यममुष्यलोकस्याधिपत्यप्राप्तौ (यामं भवति॥ एतेन वै यमोऽनपजय्यममुष्यलोकस्याधिपत्यमाप्नुतानपजय्यममुष्य-लोकस्याधिपत्यमश्नुते यामेन तुष्टुवानः॥ एतेन वै यमो यमꣳ स्वर्गंलोकमगमयत् स्वर्गस्य लोकस्यानुख्यात्यै स्वर्गात् लोकान्नच्यवते तुष्टुवानः स्तोमः॥ ता० म० ब्रा० ११।१०।२०, २१, २२)

१ २ ३ २ ३२ ३ २ ३ १ २ ३ १र २र
अग्ने मृड़ महाꣳ अस्यय आ देवयुं जनम्।
३ १ २ ३ २ ३ १ २
द्वयेथ बर्हिरासदम् ॥ २३ ॥ (क)

पदपाठः। अग्ने सं०। मृड़ क्रि०। महान् १। असि क्रि०। अयः १। आ अ०। देवयुम् २। जनम् २। द्वयेथ क्रि०। बर्हिः २। आसदम् २।

(क) ऋ, अष्ट० ३। अध्या० ५। व० ९॥ 'महा ꣳ अस्यय आ' इत्यत्र 'महां असि य इमा' इतिपाठः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अन्वयः। [हे] अग्ने मृड। [यस्त्वम्] अयः बर्हिः आसदम् देवयुं जनम् आ इयेथ [स त्वं] महान् असि।

आधियाज्ञिकम्। हे 'अग्ने'! 'मृड' अस्मान् धनदानेन सुखय। यस्त्वम् 'अयः' गन्ता, प्राप्तिशीलः 'बर्हिः' उत्तमासनम् 'आसदं' य आसीदति तं यज्ञार्थमिति 'देवयुं' देवानां कामयितारं 'जनं' यजनशीलम् 'आ इयेथ' सम्यक् प्राप्नोषि स त्वं 'महान्' असि'।

आध्यात्मिकम्। हे 'अग्ने' परमात्मन्! 'मृड' अस्मान् ज्ञानदानेन सुखय। यस्त्वम् 'अयः' गन्ता, सर्वव्यापकः 'बर्हिः' 'आसदम्' उत्तमासनं य आसीदति तमुपासनार्थमिति, शुभगुणसम्पन्नं वा 'देवयुम्' आत्मनो दिव्यगुणानां कामयितारं 'जनं' यजनशीलमुपासकम् 'आ इयेथ' सम्यक् प्राप्नोषि स त्वं 'महान्' 'असि'।

निरुक्तम्। अयते इति गतिकर्मा ॥ ३।९।१४ ॥

अथ चतुर्थी।

मित्रावरुणवंश्यो वसिष्ठ ऋषिः। राक्षोघ्नं साम ऋषिश्चाग्निः (अग्ने राक्षोघ्ने। आ० ब्रा०) गायत्री। अग्निः। विनियोगस्तु स्वस्त्ययनेष्टेः प्रथमाज्यभागस्यानुवाके।

२ ३ १ २ ३ १ २ ३ १ २ ३ २
अग्ने रक्षा णो अꣳ हसः प्रति स्म देव रीषतः।
१ २ ३ १ २
तपिष्ठैरजरो दह ॥ २४ ॥ (क)

पदपाठः। अग्ने सं। रक्षा क्रि०। नः २। अंहसः ५। प्रति अ०। स्म अ०। देव सं०। रीषतः २। तपिष्ठैः ३। अजरः १। दह क्रि०।

अन्वयः। [हे] अग्ने! नः अंहसः रक्षा। [हे] देव! अजरः [त्वं] रीषतः तपिष्ठैः [तेजोभिः] प्रतिदह स्म (=पादपूरणार्थकः)।

(क) ऋ०, अष्ट० ५। अध्या० २। व० २०॥ 'स्म' इत्यत्र 'स्म' इति पाठः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आधियाज्ञिकम्। हे 'अग्ने'! 'नः' अस्मान् 'अंहसः' पापात् 'रक्षा' रक्ष, पाहि। हे 'देव' द्योतमान! 'अजरः' अग्निस्त्वं 'रीषतः' हिंसतो दुःखदातॄन् 'तपिष्ठैः' अतिशयेन तापकैस्तेजोभिः 'प्रतिदह' निःशेषेण भस्मीकुरु।

आध्यात्मिकम्। हे 'अग्ने' पापनाशक परमात्मन्! 'नः' अस्मान् 'अंहसः' पापात् 'रक्षा' रक्ष, पाहि। हे 'देव' स्वीयविभूतिभिर्द्योतमान! 'अजरः' जरारहितः, सदा समभावेन वर्त्तमानस्त्वं 'रीषतः' हिंसतो दुःखदातॄन् रोगादीन् कामक्रोधादींश्च 'तपिष्ठैः' अतिशयेन तापकैस्तेजोभिः 'प्रतिदह' निःशेषेण भस्मीकुरु।

निरुक्तम्। अंहो हन्ते र्निरूढोपधाद्विपरीतात्॥ ४।२५।४॥ तपिष्ठैस्तमतमैः तप्ततमैः प्रपिष्टतमैरिति वा॥ ६।१२।१॥

अथ पञ्चमी।

भरद्वाज ऋषिः। राक्षोघ्नं साम ऋषिश्चाग्निः (अग्नेः राक्षोघ्ने। आ० ब्रा०) गायत्री। अग्निः। विनियोगस्तु पूर्ववत्।

१ २ ३ १र २र ३ १ ३ १ २
अग्ने युङ्क्ष्वा हि ये तवाश्वासो देव साधवः।
३ १ २ ३ १ २
अरं वहन्त्याशवः॥ २५॥ (क)

पदपाठः। अग्ने सं०। युङ्क्ष्वा क्रि०। हि अ०। ये १। तव ६। अश्वासः १। देव सं०। साधवः १। अरम् अ०। वहन्तिः क्रि०। आशवः १।

अन्वयः। [हे] देव अग्ने! ये साधवः आशवः तव अश्वासः अरं [त्वां] वहन्ति, हि [तान् रथे] युङ्क्ष्वा।

(क) ऋ०, अष्ट० ४। अध्या० ५। व० २९॥ 'युङ्क्ष्वा' इत्यत्र 'युक्ष्वा' 'आशवः' इत्यत्र 'मन्यवे'।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आधियाज्ञिकम्। हे 'देव' द्योतमान 'अग्ने'! 'ये' 'साधवः' साधनभूताः 'आशवः' आशुकारिणः 'तव' 'अश्वासः' अश्वा-ज्वालारूपाः [अग्निरश्वोभूत्वा देवेभ्यो हविरवहत्। ऐत० ब्रा०] 'अरं' पर्य्याप्तं त्वां 'वहन्ति' प्रापयन्ति, 'हि' नूनं तान् रमणसाधन-यज्ञरूपरथे 'युङ्ग्धि' योजय [देवरथो वा एष यद्यज्ञः। ऐत० ब्रा०। २।५।५।]

आध्यात्मिकम्। हे 'देव' दिव्यगुणयुत 'अग्ने' परमात्मन्! 'ये' 'साधवः' साधनभूताः 'आशवः' आशुकारिणः 'तव' 'अश्वासः' अश्वोभूता व्यापका गुणाः 'अरं' पर्य्याप्तं त्वां 'वहन्ति' प्रापयन्ति 'हि' नूनं तान् भवद्रमणसाधनेऽस्मच्छरीररूपरथे 'युङ्ग्धि' योजय [आत्मानं रथिनं विद्धि, शरीरं रथमेव तु। तै० उ० भृगु व०, २ अ०]

निरुक्तम्। आशुरिति क्षिप्रनाम ॥ ३।९।१५ ॥

अथ षष्ठी।

वसिष्ठ ऋषिः। वैश्वमनसं साम, ऋषिश्च विश्वमनाः (वैश्वमनसं च। आ० ब्रा०) गायत्री। अग्निः। विनियोगस्तु अग्निन्दूत (३ मं०) मितिवत्।

१ २ ३ १ २ ३ २
नि त्वा नक्ष्य विश्पते द्युमन्तं धीमहे वयम्।
३ १ २
सुवीर मग्न आहुत ॥ २६ ॥ (क)

पदपाठः। नि अ०। त्वा २। नक्ष्य सं०। द्युमन्तम् २। धीमहे क्रि०। वयम् १। सुवीरम् २। अग्ने सं०। आहुत सं०।

(क) ऋ०, अष्ट० ५। अध्या० २। व० १९॥ 'धीमहे वय'मित्यत्र 'देव धीमहे' इति पाठः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अन्वयः। [हे] नक्ष्य विश्पते आहुत अग्ने! द्युमन्तं सुवीरं त्वा वयं निधीमहि।

आधियाज्ञिकम्। हे 'नक्ष्य' उपगन्तव्य, प्राप्तव्य! 'विश्पते' प्रजानां पालक! 'आहुत' समन्ताद्विभिराहुत! 'अग्ने'! 'द्युमन्तं' दीप्तिमन्तं 'सुवीरं' कल्याणस्तोतृकं 'त्वा' त्वां 'वयम्' ऋत्विजः 'निधीमहि' नितरामाहितं कुर्मः।

आध्यात्मिकम्। हे 'नक्ष्य' उपगन्तव्य, प्राप्तव्य! 'विश्पते' प्रजानां पालक! 'आहुत' सम्यग्धयात! 'अग्ने' परमात्मन्! 'द्युमन्त' दीप्तिमन्तं, ज्योतिर्मयं 'सुवीरं' कल्याणस्तोतृकं 'त्वा' त्वां 'वयम्' उपासकाः 'निधीमहि' नितरां ध्यायेम।

निरुक्तम्। नक्षतिर्गतिकर्मा ॥ ३।९।१४ ॥ नक्षतिर्व्याप्तिकर्मा ॥ ३।१०।२ ॥ सर्वस्य पातारं वा पालयितारं वा विश्पतिम् ॥ ४।२६।१ ॥ द्युमदिति ज्वलतिकर्मा ॥ २।२८।३ ॥ द्युमान् द्योतनवान् ॥ ६।१९।१ ॥ सुवीरा वीरवन्तः कल्याणवीरा वा ॥ १।७।१ ॥

अथ सप्तमी।

आङ्गिरसो विरूप ऋषिः। आर्षेयं साम, अग्निश्चर्षिः (अग्नेश्चार्षेयम्। आ० ब्रा०) गायत्री अग्निः। विनियोगस्तु दर्शपूर्णमासेष्टेः आग्नेयक्रतोरनुवाके।

३ २ ३ २ ३ २ ३ १र २र ३ २ ३ २
अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्।
३ १र २र
अपाꣳ रेताꣳसि जिन्वति ॥ २७ ॥ (क)

पदपाठः। अग्निः १। मूर्द्धा १। दिवः ६। ककुत् १। पतिः १। पृथिव्याः ६। अयम् १। अपाम् ६। रेतांसि २। जिन्वति क्रि०।

(क) ऋ०, ६।३।३९ ॥ य० १३।४।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अन्वयः। मूर्द्धा ककुत् दिवः पृथिव्याः [च] पतिः अयम् अग्निः अपां रेतांसि जिन्वति।

आधियाज्ञिकम्। 'मूर्द्धा' शिरोवच्छ्रेष्ठः 'ककुत्' महान् 'दिवः' प्रकाशवतः सूर्य्यादेः 'पृथिव्याः' प्रकाशरहितस्य जगतःच 'पतिः' पालकः 'अयम्' प्रत्यक्षः 'अग्निः' 'अपाम्' 'रेतांसि' स्थावरजङ्गमात्मकानि भूतानि 'जिन्वति' प्रीणयति, यज्ञाहुतिद्वारेणेति।

आध्यात्मिकम्। 'मूर्द्धा' शिरोवच्छ्रेष्ठः 'ककुत्' महान् 'दिवः' प्रकाशवतः सूर्य्यादेः 'पृथिव्याः' प्रकाशरहितस्य जगतः च 'पतिः' पालकः 'अयं' प्रसिद्धः, हृद्देशेऽनुभूयमानः 'अग्निः' परमात्मा 'अपां' व्यापनशीलायाः प्रकृतेस्तत्कार्य्याणाञ्च, प्राणानां, जलानां, कर्म्मणां वा 'रेतांसि' वीर्य्याणि, सारभूतानि स्थावरजङ्गमात्मकानि भूतानि 'जिन्वति' प्रीणयति, रचयितुं जानाति।

निरुक्तम्। आप आप्नोतेः॥ ९।२६।२॥ जिन्वतिर्गतिकर्मा ॥३।९।१४॥ [गतिर्ज्ञानमतो जानाति रचयितुमिति] जिन्वतिः प्रीतिकर्मा ॥६।२२।६॥ ककुह इति महन्नाम ॥३।१३।५॥

अथाष्टमी।

शुनःशेप ऋषिः। सोम साम, ऋषिस्तु नोक्तः (सोम साम। आ० ब्रा०) गायत्री। अग्निः। विनियोगस्तु राज्याधिपत्ययशोलाभे (यथा वा इमा अन्या ओषधय एवꣳसोम आसीत् स तपोऽतप्यत स एतत् सोमसामापश्यत् तेनराज्यमाधिपत्यमगच्छत् यशोऽभवत् राज्यमाधिपत्यङ्गच्छति यशोभवति सोम साम्ना तुष्टुवानः। ता० म० ब्रा० ११।३।९)

३ २ ३ २ ३ १ २ ३ १ २ ३१र २र

इममूषु त्वमस्माकꣳ सनिं गायत्रं नव्याꣳ सम्।

१ २ ३ २ ३ १ २

अग्ने देवेषु प्रवोचः॥ २८॥ (क)

(क) ऋ० १।२७।२२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पदपाठः । इमम् २ । ऊ अ० । सु अ० । त्वम् १ । अस्माकम् ६ । सनिम् २ । गायत्रम् २ । नव्यांसम् २ । अग्ने सं० । देवेषु ७ । प्रवोचः क्रि० ।

अन्वयः । [हे] अग्ने ! त्वम् अस्माकम् इमं सनिं नव्यांसं गायत्रम् ऊ (=च) देवेषु सु प्रवोचः ।

आधियाज्ञिकम् । हे 'अग्ने' 'त्वम्' 'अस्माकम्' 'इमं' 'सनिं' हविर्दानं 'नव्यांसं' नवतरं 'गायत्रं' स्तुतिरूपं वचः 'ऊ' च 'देवेषु' देवानामग्रे 'सु' सुष्ठु 'प्रवोचः' प्रोक्तवान् ।

आध्यात्मिकम् । हे 'अग्ने' अनन्तविद्यामय परमेश्वर ! 'त्वम्' 'अस्माकम्' 'इमं' 'सनिं' कर्मफलानां संविभक्तारं 'नव्यांसं' नित्यनवबोधप्रदं 'गायत्रं' गायत्री प्रगाथा येषु तं वेदचतुष्टयं 'देवेषु' सृष्ट्यादौ जातेषु पुण्यात्मसु अग्निवायुादित्याङ्गिरस्सु 'सु' सुष्ठु 'प्रवोचः' प्रोक्तवान् [पूर्वेषामपि गुरुः कालेनानवच्छेदात् । योग० पा० १।२६] [तेभ्यस्तप्तेभ्यस्त्रयो वेदा अजायन्ताग्नेऋग्वेदो वायोर्यजुर्वेदः सूर्यात् सामवेदः श० ब्रा० ११।२।५।८ ॥ यान् मन्त्रानपश्यत् स आङ्गिरसो वेदोऽभवत् । गोपथ ब्रा० ॥ अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् । दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम् ॥ श्रुतीरथर्वाङ्गिरसीः कुर्य्यादित्यविचारयन् ॥ मनुः अ० १।२३ ॥ अ० ११।३३] ।

निरुक्तम् । गायत्रं गायतेः स्तुतिकर्मणः ॥ १।८।१ ॥ नव्यमिति नवनाम ॥ ३।१९।२५ ॥

अथ नवमी ।

अग्निवंश्यो गोपवन ऋषिः । एकं साम गौपवनं, गोपवनश्चर्षिः (गौपवनश्च । आ० ब्रा०) विनियोगस्तु व्योमविश्वदेवस्तुतपञ्चशारदीयप्रकरणे आज्यशस्त्रे ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१ २ ३ १ ३ १र २र
तं त्वा गोपवनो गिरा जनिष्ठदग्ने अङ्गिरः ।
१ २ ३ १ २
स पावक श्रुधी हवम् ॥ २९ ॥ (क)

पदपाठः । तम् २ । त्वा २ । गोपवनः १ । गिरा ३ । जनिष्ठत् क्रि० । अग्ने सं० । अङ्गिरः सं० । सः १ । पावक सं० । श्रुधी क्रि० । हवम् २ ।

अन्वयः । [हे] अग्ने ! तं त्वा गोपवनः गिरा जनिष्ठत् । [हे] पावक ! अङ्गिरः ! स [त्वं] हवं श्रुधी ।

आधियाज्ञिकम् । हे 'अग्ने' यज्ञाग्ने ! 'तं' पूर्वोक्तं 'त्वा' त्वां 'गोपवनः' गोभिर्वेदवाग्भिः पवनं शोधनं यस्य स स्वाध्यायशीलो वेदज्ञः 'गिरा' स्तुतिरूपया वाचा 'जनिष्ठत्' जनयति वर्द्धयति । हे 'पावक' शोधक ! 'अङ्गिरः' अङ्गारवन् प्राणप्रिय वा ! 'सः' एवंविधः त्वं 'हवम्' आह्वानं, स्तोत्रमिति 'श्रुधी' शृणु, अस्माकमनुग्रहीतुमङ्गीकुरु ।

आध्यात्मिकम् । हे 'अग्ने' परमात्मन् ! 'तं' प्रसिद्धं 'त्वा' त्वां 'गोपवनः' स्वाध्यायशीलो वेदज्ञः [स्वाध्यायादिष्टदेवता सम्प्रयोगः । योग० पा० २।४४] 'गिरा' स्तुत्या 'जनिष्ठत्' वर्द्धयति [स्तूयमाना हि देवता वर्द्धन्ते] । हे 'पावक' पवित्रकर्त्तः ! 'अङ्गिरः' अङ्गानां रस ! प्राणप्रिय ! सर्वत्रगन्तः वा 'सः' एवंविधः त्वं 'हवम्' आह्वानं, स्तोत्रमिति 'श्रुधी' शृणु, अस्माकमनुग्रहीतुमङ्गीकुरु च ।

निरुक्तम् । अङ्गारेष्वङ्गिराः । अङ्गारा अङ्गनाः (अञ्चनाः) ॥ ३।१७।१ ॥ गौरिति वाङ्नाम ॥ २।२३।१ ॥ हवं ह्वानम् ॥ १०।२।१ ॥ श्रुधी शृणु ॥ १०।२।१ ॥

(क) ऋ० ६।५।२३ ॥ 'त' मित्यत्र 'यं' 'जनिष्ठत्' इत्यत्र 'चनिष्ठत्' ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ दशमी ।

गौतमो वामदेवऋषिः । एकं सूर्यसाम, वसुरोचिः सूर्यवर्चा ऋषिः । गायत्री । अग्निः । विनियोगस्तु पशुपर्यग्निकरणकार्ये, प्रातरनुवाकप्रकरणे आग्नेयक्रतोराश्विनशस्त्रे ।

२ ३ १ २ ३ २ ३ २ ३ १
परिवाजपतिः कविरग्नि र्हव्यान्यक्रमीत् ।
२ ३ १ २ ३ १ २
दधद्रत्नानि दाशुषे ॥ ३० ॥ (क)

पदपाठः । परि अ० । वाजपतिः १ । कविः १ । अग्निः १ । हव्यानि २ । अक्रमीत् क्रि० । दधत् १ । रत्नानि २ । दाशुषे ४ ।

अन्वयः । वाजपतिः कविः दाशुषे रत्नानि दधत् अग्निः हव्यानि परि अक्रमीत् ।

आधियाज्ञिकम् । 'वाजपतिः' अन्नस्वामी (ख) [अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपजायते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः । मनुः, अ० ३।७६] 'कविः' क्रान्तदर्शी 'दाशुषे' हविर्दत्तवते यजमानाय 'रत्नानि' रमणीयानि धनानि 'दधत्' प्रयच्छन् 'अग्निः' 'हव्यानि' हवींषि 'परि अक्रमीत्' परिक्रामति, व्याप्नोति ।

आध्यात्मिकम् । 'वाजपतिः' अन्नस्वामी 'कविः' क्रान्तदर्शी 'दाशुषे' सर्वस्व दात्रे उपासकाय 'रत्नानि' रमणीयानि धनानि 'दधत्' प्रयच्छन् 'अग्निः' परमात्मा 'हव्यानि' दातुं ग्रहीतुं वा योग्यानि वस्तूनि 'परिअक्रमीत्' परिक्रामति, व्याप्नोति ।

निरुक्तम् । वाज इत्यन्ननाम ॥ ३।८।४ ॥ कविर्मेधावी क्रान्तदर्शनो भवति कवते र्वा ॥ १२।१३।१ ॥ दाशुषे दत्तवते ॥ ११।११।१ ॥ रत्नमिति धननाम ॥ ३।८।८ ॥

(क) ऋ० ३।५।१५ ॥ (ख) परिवाजपतिः कविरित्येष हि वाजानां पतिः । ऐत० ब्रा० पं० २।अ० १। ख ५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथैकादशी ।

काण्वः प्रस्कण्व ऋषिः । एकं सूर्य्यसाम, वसुरोचिः सूर्यवर्चा ऋषिः । गायत्री । सूर्य्यः । विनियोगस्तु आश्विनशस्त्रप्रकरणे सौर्यक्रतौ ।

२ ३ २ ३ १ २ ३ १ २ ३ १ २
उदु त्यं जातवेदसं देवं वहन्ति केतवः ।
३ १र २र ३ १ २
दृशे विश्वाय सूर्य्यम् ॥ ३१ ॥ (क)

पदपाठः । उत् अ० । उ अ० । त्यम् २ । जातवेदसम् २ । देवम् २ । वहन्ति क्रि० । केतवः १ । दृशे अ० । विश्वाय ४ । सूर्य्यम् २ ।

अन्वयः । केतवः त्यं जातवेदसं देवं सूर्य्यं विश्वाय दृशे उद्वहन्ति 'उ इति पादपूरणः' ।

आधियाज्ञिकम् । 'केतवः' सूर्य्यरश्मयः 'त्यं' तं 'जातवेदसं' जातधनं, प्राणिनां वेदितारं वा 'सूर्य्यं' सर्वस्य प्रेरकमादित्यं 'विश्वाय' 'दृशे' विश्वं द्रष्टुं, सर्वेषां प्राणिनां सन्दर्शनाय 'उद्वहन्ति' उत्कृष्टं प्रकाशयन्ति विज्ञापयन्ति ।

आध्यात्मिकम् । 'केतवः' ईश्वरस्य सृष्टिरचनादिविविधा गुणाः 'त्यं' तं 'जातवेदसं' प्राणिनां वेदितारं 'सूर्य्यं' सर्वस्य प्रसवितारं परमात्मानं 'विश्वाय' 'दृशे' सर्वेषां प्राणिनां सन्दर्शनाय 'उद्वहन्ति' उत्कृष्टं प्रकाशयन्ति, विज्ञापयन्ति ।

निरुक्तम् । 'उद्वहन्ति तं जातवेदसं रश्मयः केतवः सर्वेषां भूतानां दर्शनाय सूर्य्यमिति' ॥ १२।१५।१ ॥ जातवेदाः कस्मात् ॥ जातानि वेद । जातानि वैनं विदुः । जाते जाते विद्यत इति वा । जातवित्तो वा जातधनः । जातविद्यो वा जातप्रज्ञानः ।

(क) ऋ० १।४।७ ॥ य० ३३।३१ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यत्तज्जातः पशूनविन्दतेति तज्जातवेदसो जातवेदस्त्वमिति ब्राह्मणं तस्मात् सर्वानृतून् पशवोऽग्निमभिसर्पन्तीति च ॥ ७।१८।२ ॥ सूर्य्यः सर्त्तेर्वा। सुवतेर्वा। स्रीर्य्यते र्वा ॥ १२।१४।२ ॥

अथ द्वादशी।

काण्वो मेधातिथि ऋषिः। कावं साम, वसुरोचि ऋषिः (कावञ्च वसुरोचिषः। आ० ब्रा०) गायत्री। अग्निः। विनियोगस्तु (कावं भवति ॥ लोकविन्दु साम विन्दते लोकं कावेन तुष्टुवानः। ता० म० ब्रा० ११।५।२४, २५) अभिलषितस्थानप्राप्तौ।

३ २ ३ १र २र ३ १ २ ३ २
कविमग्नि मुपस्तुहि सत्यधर्म्माणमध्वरे।
३१ २ ३ १ २
देव ममीवचातनम् ॥ ३२ ॥ (क)

पदपाठः। कविम् २। अग्निम् २। उपस्तुहि क्रि०। सत्यधर्म्माणम् २। अध्वरे ७। देवम् २। अमीवचातनम् २।

अन्वयः। [हे स्तोतः] कविं सत्यधर्म्माणम् अमीवचातनं देवम् अग्निम् अध्वरे उप स्तुहि।

आधियाज्ञिकम्। हे स्तोतः! 'कविं' क्रान्तदर्शिनं 'सत्यधर्म्माणं' सत्योधर्म्मो यस्य तं 'अमीवचातनम्' अमीवानां रोगाणां चातनं नाशकं 'देवं' द्योतमानम् 'अग्निम्' 'उपस्तुहि' उपेत्य स्तुतिं कुरु।

आध्यात्मिकम्। हे स्तोतः! 'कविं' क्रान्तदर्शिनं 'सत्यधर्म्माणं' सत्यो धर्म्मो न्यायो यस्य तं 'अमीवचातनम्' अमीवानामविद्यादिदोषाणां नाशकं 'देवं' दिव्यगुणोपेतम् 'अग्नि' परमात्मानम् 'उपस्तुहि' उपेत्य स्तुतिं कुरु।

(क) ऋ० १।१।२३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निरुक्तम् । सत्यं कस्मात् सत्सु त्रायते सत्प्रभवं भवतीति वा ॥ ३।१३।१९ ॥ एतेः कारितं च यकारादिश्चान्तकरणमस्तेः शुद्धं च सकारादिं च ॥ १।१३।३ ॥

अथ त्रयोदशी ।

अम्बरीषनृपतेः पुत्रः सिन्धुद्वीपस्त्वष्टृपुत्रस्त्रिशिरा वा ऋषिः, त्रित आप्त्यो वा । (सूर्य्यवर्चसः सामनी द्वे, वसुरोचिषो वा, पारावतेः, काशीते वा, कापोते वा, वासुमान्दे वा । आ० ब्रा०) द्वे सामनी, काशीतं, कापोतं, वासुमन्दं वा नाम । सूर्य्यवर्चा, पारवतः पुत्रो वसुरोचिः, काशीतः, कापोतः, वसुमन्दो वा ऋषिः । गायत्री । आपः । विनियोगस्तु प्रातरनुवाकप्रकरणे आश्विनशस्त्र ।

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २
शन्नो देवीरभिष्टये शन्नो भवन्तु पीतये ।
२उ ३ १ २
शंयो रभिस्रवन्तु नः ॥ ३३ ॥ (क)

पदपाठः । शम् अ० । नः ६ । देवीः २ । अभिष्टये ४ । शम् अ० । नः ६, ४ । भवन्तु क्रि० । पीतये ४ । शंयोः अ० । अभिस्रवन्तु क्रि० । नः ६, ४ ।

अन्वयः । देवीः (=देव्यः) [आपः] नः अभिष्टये शं भवन्तु । नः पीतये शं [भवन्तु] । नः शंयोः अभिस्रवन्तु [च] ।

आधियाज्ञिकम् । 'देवीः' देव्यः, विभक्तिव्यत्ययः, आपः 'नः' अस्माकम् 'अभिष्टये' यज्ञाय 'शं' सुखकराः 'भवन्तु' । यद्वा 'शं' सुखं 'भवन्तु' भावयन्तु । 'नः' अस्माकं 'पीतये' पानाय 'शं' सुखकराः भवन्तु । 'नः' अस्माकं उपरि 'शंयोः' सुखम् 'अभिस्रवन्तु' अत्यर्थं सिञ्चन्तु । यद्वा 'शंयोः' शं शमनं रोगाणामिति योः यापनं भयानामिति 'अभिस्रवन्तु' ।

(क) ऋ० ७।६।५ ॥ 'शन्नो' इत्यत्र 'आपो' इति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आध्यात्मिकम् । 'देवीः' देव्यः दिव्याः [आपः] परमात्मनो-व्यापकप्रकाशशक्तयः 'शं' कल्याणं 'भवन्तु' भावयन्तु प्रयच्छन्तु, 'नः' अस्मभ्यं 'पीतये' पूर्णानन्दभोगेन तृप्तये 'शं' कल्याणं प्रयच्छन्तु । 'नः' अस्मभ्यं 'शंयोः' सुखम् 'अभिस्रवन्तु' सर्वतः सिञ्चन्तु ।

निरुक्तम् । इष्टिरिति यज्ञनाम ॥ ३।१९।५ ॥ . पीतये पानाय ॥ १२।४।१ ॥ शंयुः (सुखंयुः) शमनं च रोगाणां, यावनं च भयानाम् ॥ ४।२१।२ ॥ स्रवतीति गतिकर्मा ॥ ३।९।१४ ॥ शमिति सुख नाम ॥ ३।१३।११ ॥

अथ चतुर्दशी ।

कविपुत्र उशना ऋषिः । (गोराङ्गिरसस्य सामनी द्वे गोतमस्य वा मनाज्ये । आ० ब्रा०) द्वे सामनी मनाज्यमिति नाम, आङ्गिरसो गुर्ऋषिर्गौतमो वा । गायत्री । अग्निः । विनियोगस्तु प्रातरनुवाकप्रकरणे आग्नेयक्रतोः आश्विनशस्त्रे ।

१ २ ३ १र २र ३ १ २
कस्य नूनं परीणसि धियो जिन्वसि सत्पते ।
१ २ ३ १ २ ३ १ २
गोषाता यस्य ते गिरः ॥ ३४ ॥ (क)

पदपाठः । कस्य ६ । नूनम् अ० । परीणसि ७ । धियः २ । जिन्वसि क्रि० । सत्पते सं० । गोषाता ७ । यस्य ६ । ते ६ । गिरः १ ।

अन्वयः । [हे] सत्पते ! [अग्ने] [त्वं] कस्य परीणसि (=परीणसः) धियः नूनं जिन्वसि ? यस्य ते (=त्वद्विषयिण्यः) गिरः गोषाता (=गोषातौ) [भवन्ति]

(क) ऋ० ६।६।६ ॥ 'परीणसि' इत्यत्र 'परीणसः' इति, 'सत्पते' इत्यत्र 'दम्पते' ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आधियाज्ञिकम्। हे 'सत्पते' सतां सज्जनानां यजनशीलानां पते पालक! अग्ने! त्वं 'कस्य' कीदृस्य जनस्य 'परीणसि परीणसः विभक्तिव्यत्ययः, बहूनि 'धियः' कर्म्माणि 'नूनं' निश्चितं जिन्वसि' प्रीणयसि, पूरयसीति? अस्योत्तरमाह, 'यस्य' यजनशीलस्य 'ते' त्वद्विषयिण्यः 'गिरः' स्तुतयः 'गोषाता' गोषातौ गवां सोमानामाज्याहुतीनां वा सातौ सम्भजने दाने भवन्ति तस्यैव। यः स्तुतिभिः सह सोमाहुतीराज्याहुतीर्वा [आज्याहुतिरेव सोमाहुतिः। श० ब्रा०] तुभ्यं ददाति तस्मै त्वं परितुष्यसि।

आध्यात्मिकम्। हे 'सत्पते' सतां सज्जनानामुपासकानां पालक परमात्मन्! त्वं 'कस्य' कीदृशस्य जनस्य 'परीणसि' बहूनि 'धियः' कर्म्माणि 'नूनं' निश्चितं 'जिन्वसि' प्रीणयसि पूरयसीति? अस्योत्तरमाह, 'यस्य' उपासकस्य 'ते' त्वद्विषयिण्यः 'गिरः' स्तुतयः पञ्चमहायज्ञाद्यनुष्ठानेन 'गोषाता' गवां ब्रह्मवर्चसां सातौ लाभे भवन्ति तस्यैव। [यज्ञेन यज्ञमयजन्त देवा स्तानि धर्म्माणि प्रथमान्यासन्। तेह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः। य० ३१।१६] [स्वकर्म्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः। गी० अ० १८। श्लो ४६] यद्वा 'धियः' प्रज्ञाः 'परीणसि' परीणसः बह्वीः 'जिन्वसि' प्रीणयसि, बुद्धेस्तृप्तिकारको भवसीति [तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्। ऋ० १।६।१५॥ 'धियं' 'जिन्वम्' यो बुद्धेस्तृप्तिकर्त्ता तम्]।

निरुक्तम्। परीणसेति बहुनाम॥ ३।१३।१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ व्याकरणम् ।

अग्निः (२२, २२, २७, ३०)—[१द] ।

अग्निम् (२१, ३२)—[१द] ।

अग्ने (२३, २४, २५, २६, २८, २९)—[१द] ।

अङ्गिरः (२९)—अगि धातोः [अग्निः १द] 'अङ्गते रसि रि रुडागमश्च' उ० ४।२३६ इत्यसि-रि रुडागमश्च । अङ्गति गच्छति प्राप्नोति जानाति वा सोऽङ्गिरास्तस्य सं० १व० ।

अच्छा (२१)—नञ्+'छो' छेदने दि० प० अनि० छ्यति,+क । 'निपातस्य च' ६।३।१२६ इति दीर्घः ।

अजरः (२४)—नास्ति जरा [जराबोध २द] यस्य सोऽजरः १मा १व० ।

अत्तिम् (२२)—'अद' भक्षणे अ० प० अनि० अत्ति, अस्मात् 'अदेस्त्तिनिश्च' उ० ४।६८ अत्ति भक्षयति विनाशयतीति अत्ती तम् २या १व० ।

अध्वराणाम् (२१)—[२६] ।

अध्वरे (३२)—७मी १व० ।

अपाम् (२७)—'आप्लृ' व्याप्तौ स्वा० प० अनि० आप्नोति,+क्विप् 'आप्नोतेर्ह्रस्वश्च' उ० २।५८ नित्यबहुवचनत्वं स्त्रीत्वं च । आप्नोतीत्यापस्तासाम् ६ष्ठी बहुव० ।

अभिष्टये (३३)—अभि+'इष्' गतौ दि० प० से० इष्यति, इच्छायाम् तु० प० से० इच्छति, यजतेर्वा [यज्ञस्य १द] भावे क्तिन् । 'यङ्ङिज्या०' ६।१।१६ एषां किति ङिति च सम्प्रसारणं स्यात् । 'ग्रहज्यावयिव्यधवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च' ६।१।१६ इति षत्वे ष्टुत्वम् । 'शकन्ध्वादिषु०' वा० १।१।६४ इति पररूपत्वे सवर्णदीर्घाभावः । अभिष्टिस्तस्यै ४र्थी १व० ।

अभिस्रवन्तु (३३)—नञ्+'भा' दीप्तौ अ० प० अनि० भाति,+कि, अव्ययसंज्ञा । 'स्रु' गतौ भ्वा० प० अनि० स्रवति, लोटि प्रथम पु० १व० ।

अमीवचातनम् (३२)—अमधातोः [अमेः २द०] 'शेवय०' उ० १।१५४ इति वन् प्रत्यये इडा-गमे च निपातनात्साधुः । यद्वा अमेरीवः । 'चते' याचने भ्वा० उ० से०चतति, ते, अस्माद्धिंसार्थाच्चिजन्ताद्व्यादिलाघुः, योरनादेशः, 'योरनिटि' ६।४।५१ इति योर्लोपः । अमीवं रोगं चातयति नाशयतीत्यमीवचातनस्तम् २या १व० ।

अयः (२३)—इण्धातोः [इतराः १द०] 'पुंसि संज्ञायां घः' ३।३।११८ इति घः । एति गच्छतीत्ययः १मा १व० । 'अय' गतौ भ्वा० आ० से० अयते, इति धातोः कर्त्तरि पचाद्यच् वा ।

अयम् (२७)—पुंसि १मा १व० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अरम् (२५)—'ऋ' गतिप्रापणयोः भ्वा० प० अनि० ऋच्छति, अ० प० अनि० इयर्त्ति, आभ्यां पचाद्यच्। अव्ययसंज्ञा।

अश्वासः (२५)—अश्वशब्दात् [अश्वम् २द०] जसि 'आज्जसेरसुक्' ७।१।५० अवर्णान्तादङ्गात्परस्य जसोऽसुक् स्यात्।

असि (२३)—[१द०]

अस्माकम् (२८)—६ष्ठी बहु व०।

अंहसः (१४)—'अम' गत्यादिषु भ्वा० प० से० अमति, अस्मात् 'अमेर्हुक् च' उ० ४।२१३ इत्यसुन् हुक् च। अमन्ति प्राप्नुवन्ति दुःखान्यनेन तत् अंहः पापः तस्मात् पुंसी १व०।

आ इयेथ (२३)—आ पूर्वादिण्धातोः 'छन्दसि लुङ् लिटः' ३।४।६ धात्वर्थानां संबन्धे सर्वकालेष्वेते वा स्युः, इति सामान्ये लिट्। 'व्यवहिताय' १।४।८२ इति साधुः।

आशवः (२५)—अश्धातोः [अश्वम् २द०] 'क्नवापा०' उ० १।१ इति उः। १मा बहुव०।

आसदम् (२३)—आङ् पूर्वात् सीदतेः [निषत्सि १द०] अच्। य आसीदति तम् २या १व०।

आहुत (२०)—सं० १व०।

इमम् (२८)—२या १व० पुंसि।

उ (३१)—[ऊ १द०] पादपूरणार्थम्।

उत् (३१)—ऊर्ध्वेऽव्ययम्।

उपस्तुहि (३२)—उपपूर्वात् ष्टुञ् धातोः लोटि उत्तमपु० १व० हिः।

ऊ (२८)—[१द०]।

ककुत् (२७)—कंसुखं कौति, 'कु' शब्दे अ० प० अनि० कौति, क्विप्+तुक्, पृषोदरादित्वात्साधुः। यद्वा ककुहः महान्। हस्य त्।

कविः (३०)—'कुङ्' शब्दे भ्वा० आ० अनि० कवते, तु० प० अनि० कुवति, आभ्याम् 'अच इः' उ० ४।१३९ इति इः कवते शब्दं करोति उपदिशति वा स कविः १मा १व०।

कविम् (३२)—२या १व०।

कस्य (३४)—'कै' शब्दे भ्वा० प० अनि०, कायति, अस्मात् 'कायतेर्डिमिः' उ० ४।१५८। कायति शब्दयतीति किम्, कौ वा तस्य ६ष्ठी १व०।

केतवः (३१)—'चायृ' पूजानिशामनयोः भ्वा० आ० से० चायते, अस्मात् 'चायः कौ' उ० १।७४ इति कौभावः धातोः तु प्रत्ययश्च। चायते पूजयति निशामयति श्रावयति वा स केतुस्ते १मा बहु व०।

गायंचम् (२२)—'गै' शब्दे भ्वा० प० अनि० गायति, शतृप्रत्ययः=गायन्, तं चायते, 'त्रैङ्' पालने भ्वा० आ० अनि० त्रायते, अस्मात् 'आतोऽनुपसर्गे कः' ३।२।३ इति कः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यद्वा गानं गायः, भावे घञ्, युक्। गायेन गानेन वायते—कः सुपीति योगविभागात्। २या १व०।

गिरः (३४)—[१द०]

गिरा (२९)—[१द०]

गोपवनः (२९)—'गम्लृ' गतौ भ्वा० प० अनि० गच्छति, अस्मात् 'गमेर्डोः' उ० २।६७ इति डोः, डित्वाट्टिलोपः। गच्छतीति गौः। 'पूञ्' पवने क्र्या० उ० से० पुनाति पुनीते, अस्मात् 'ल्युट् च' ३।३।११५ इति ल्युट्। 'युवोरनाकौ' ७।१।१ इति योरनादेशः। पुनातीति पवनम्। गोभिः पवनं यस्य स गोपवनः १मा १व०।

गोषाता (३४)—'षण' सम्भक्तौ भ्वा० प० से० सनति, 'षणु' दाने त० उ० से० सनोति, सनुते, आभ्यां क्तिन्। जन सन खनां सञ् झलोः' ६।४।४२ एषामाकारोऽन्तादेशः स्याज्झलादौ सनि झलादौ किति च॥ यद्वा 'ऊति यूति०' ३।३।९७ इति 'षी' अन्तकर्मणि दि० प० अनि० स्यति, अस्मात् क्तिनि 'द्यति स्यति०' ७।४।४० इतीत्वे प्राप्ते इत्वाभावो निपात्यते। गवां सातिः=गोसातिः=गोषातिः 'पूर्वपदात्' ८।३।१०३ पूर्वपदस्थान्निमित्तात्परस्य सस्य षो वा, तस्यां गोषातौ इति भूते 'सुपां सुलुक्०' ७।१।३९ इति डा।

जनम् (२३)—२या १व०।

जनिष्ठत् (२९)—जनधातोः लुङि 'अजनिष्ट' स्थाने अडभावो वर्णव्यत्ययश्च।

जातवेदसम् (३१)—जन+क्तः=जातं वेत्ति, विन्दति, जातेषु प्राणिषु विद्यते वा जातवेदास्तम्। जातो वेदो धनं यस्य वा [विश्ववेदवत् १द०]

जिन्वति (२७)—'जिवि' प्रीणनार्थः भ्वा० प० से०। इदित्वान्नुम् लट्, तिप्।

जिन्वसि (३४)—लटः मध्यम पु० १व० सिप्।

णः (२४)—[नः १द०] 'नश धातुस्थो रुषुभ्यः' ८।४।२७ इति णत्वम्।

तव (२५)—६ष्ठी १व०।

तपिष्ठैः (२४)—'तप' सन्तापे भ्वा० प० अनि० तपति, ऐश्वर्ये वा दि० आ० अनि० तप्यते, आभ्यामिष्ठन् 'अतिशायने तमबिष्ठनौ' ५।३।५५ इति। अतिशयेन तपति तप्यते वा तपिष्ठस्तैः ३या बहुव०।

तिग्मेन (२२)—'तिज' निशाने भ्वा० आ० से० तितिक्षते, चु० प० से० तेजयति, आभ्यां 'युजिरुजितिजा०' उ० १।१४६ इति मक् कवर्गश्च, तिग्मं तेन ३या १व०।

ते (३४)—[१द०]

त्वम् (३१)—[१द०]

त्वम् (२८)—[१द०]

त्वा (२६, २९)—[२द०]

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दधत् (३०)—धा धातोः [अधि १८०] शतृः। यद्वा 'घोर्लोपो लेटि वा' ७।२।७० धा+लेट्+तिप्=धा+त् ('इतश्चलोपः परस्मैपदेषु' ३।४।९७ लेटस्त्रिङामिती लोपो वा स्यात् परस्मैपदेषु ति—त्), शप् ('व्यत्ययो बहुलम्' ३।१।८५), सु, द्वित्वम्, अट् (लेटोऽडाटौ' ३।४।९४ लेटः अट् अट् एतौ आगमौ स्तः, तौ च पितौ), आलोपः।

दाशथे (३०)—'दाश' दाने भ्वा० उ० से० दाशति, ते, अस्मात् 'दाशान् सहान्०' ६।१।१२ एते क्वसन्ता निपात्यन्ते। ४थौ० १व०।

दिवः (२७)—६ष्ठी १व०।

देव (२४)—[२८०]

देवयुम् (२३)—देव+या प्रापणे+कुः 'सृगयुादयश्च' उ० १।३७ इति। देवान् विदुषो याति स तम् २या १व०।

देवम् (३०, ३२)—२या १व०।

देवीः (३३)—स्त्रियाम् २या बहु व० व्यत्ययेन प्रथमास्थाने।

देवेषु (२८)—७मी बहु व०।

द्युमन्तम् (२६)—'द्यु' अभिगमने अ० प० अनि० द्योति,+मतुप्, तम् २या १व०।

दृशे (३१)—[१८०]

धियः (३४)—धीशब्दस्य २या बहु व०।

नः (३३, ३३, ३३)—[१८०]

नत्य (२६)—'णच' गतौ भ्वा० प० से० नचति,+यत्। सं० १व०।

नप्त्रे (२१)—न+'पत' पतने+ष्टच् 'नप्तृनेष्टृ०' उ० २।९५ इति साधुः। नञः प्रकृतिभावः पतेरच्छब्दलोपश्च निपातनात्। व्यत्ययेन द्वितीयार्थे चतुर्थी।

नव्यांसम् (२८)—'णु' स्तुतौ अ० प० से० नौति, अस्मात् 'ऋदोरप्' ३।३।५७ ऋवर्णान्तादुवर्णान्ताद्प्। नवशब्दादीयसुनि ईकारलोपः छान्दसः। २या १व०।

निधीमहि (२६)—नि+दधीमहि ('धा' लिङ् आ०) व्यत्ययेन दलोप एकारश्च।

नियंसत् (२२)—नि+'यम' उपरमे भ्वा० प० अनि० यच्छति, लेटि सिबागमः।

पतिः (२७)—पा रक्षणे धातोः 'पातेर्डतिः' उ० ४।५७ इति डतिः। पाति रक्षतीति पतिः १मा १व०।

परीणसि (३४)—परि+'णस' कौटिल्ये भ्वा० आ० से० नसते,+क्विप्। व्यत्ययेन २या स्थाने ७मी।

पर्य्यक्रमीत् (३१)—परिपूर्वात् 'क्रमु' पादविक्षेपे भ्वा० प० से० क्रामति, धातोः लुङि प्रथम पु० १व०।

पावक (२९)—पूञ्धातोः [गोपवनः] 'खुल्ल्टचौ' ३।१।१३३ इति ण्वुल्। 'युवोरनाकौ' ७।१।१ इत्यकः णित्वादृद्धिः। सं० १व०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पीतये (३३)—'पा' पाने धातोः [गोपीथाय २द०] 'स्थागापापचीभावे' ३।३।२५ इति क्तिन्। 'घुमास्था०' ६।४।६६ इतीत्वम्। पीतिस्तस्मै ४थ्यौ १व०।

पुरुतमम् (२१)—'पृ' धातोः [परमात् १द०] 'पृ भिदि०' उ० १।२३ इति कुः। पिपर्त्ति पालयति पूरयति वा स पुरुः। 'अतिशायने तमबिष्ठनौ' ५।३।५५ इति तमप्। व्यत्ययेनोकारस्य दीर्घः। तम् २या १व०।

पृथिव्याः (२७)—प्रथ धातोः [प्रति २द०] 'प्रथेः षिवन्०' उ १।१५० इति। तस्याः ६ष्ठी १व०।

प्रतिदहस्व (२४)—प्रति पूर्वात् 'दह' भस्मीकरणे भ्वा० प० अनि० दहति, धातोः लोटि मध्यम पु० १व०। स्व पादपूरणे 'णिङ्' ईषद्दसने भ्वा० आ० अनि० स्वयते, 'अन्येष्वपि०' ३।२।१०१ इति ङः। यद्वा षी धातोः [गोषाता] ड प्रत्ययः। अव्ययम्।

प्रवीचः (२८)—प्र+'वच' परिभाषणे अ० प० अनि० वक्ति,+लुङ् (अवीचः)—व्यत्ययेन परस्मैपदे सवर्णदीर्घाभावः।

बर्हिः (२३)—[बर्हिषि १द०] २या १व०।

बहन्ति (२५, ३१)—'वह' प्रापणे भ्वा० उ० अनि० वहति, ते, लटि प्रथम पु० बहुव०।

भवन्तु (३३)—'भू' सत्तायाम् भ्वा० प० से०, लोटः प्रथम पु० १व०।

महान् (२३)—महधातोः [महि १द०] 'वर्त्तमाने०' उ० २।८४ एते निपात्यन्ते शतृवच्चैषां कार्य्यं स्यात्, उगित्वान्नुम्। 'सान्तमहतः०' ६।४।१० इति दीर्घः। मह्यते पूज्यते इति महान् १मा १व०।

मूर्द्धा (२७)—[मूर्द्धः १द०] १मा १व०।

मृड (२३)—'मृड' सुखने तु० प० से० लोटः मध्यम पु० १व०।

यस्य (३४)—यच्छब्दस्य [२६] पुंसि ६ष्ठी १व०।

युङ्क्ष्व (२५) 'युजिर्' योगे रु० उ० अनि० युनक्ति, युङ्क्ते, धातोः लोटः मध्यम पु० १व० 'द्व्यचोऽतस्तिङः' ६।३।१३५ मन्त्रे दीर्घः।

ये (२५)—यच्छब्दस्य पुंसि १मा बहु व०।

रक्षा (२४)—'रक्ष' पालने भ्वा० प० से० लोटि, दीर्घः।

रत्नानि (३०)—रम्धातोः [रथम् १द०] 'रमेस्त च' उ० ३।१४ एषान्ताद्रमेर्नप्रत्ययो मस्य तथादेशः। रमयति हर्षयतीति रत्नं तानि २या बहु व०।

रयिम् (२२)—रीधातोः [रेतसः २द०] 'अच इः' 'उ० ४।१३९ इति इः, रियाति गच्छति जनाञ्जनमिति रयिर्धनं तम् २या १व०।

रेतांसि (२७)—[रेतसः २द०] २या बहु व०।

वः (२१)—युष्मच्छब्दस्य [ते १द०] २या बहु व० व्यत्ययेन, यूयमित्यत्र।

वयम् (२६)—[२द०]।

वाजपतिः (३०)—'वज' गतौ भ्वा० प० से० अस्मात् 'अकर्त्तरि च कारके संज्ञायाम्' ३।३।१९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कर्तृभिन्ने कारके षष्ठ् स्यात्। 'चजोः कुघिण्यतोः' ७।३।५२ चस्य जस्य च कुत्वं स्यात् घिति ण्यति च प्रत्यये परे, इति कुत्वे प्राप्ते 'अजिव्रज्योश्च' ७।३।६० न कुत्वम्। 'चकारस्यानुक्तसमुच्चयार्थत्वाद् वजेरपिकुत्वप्रतिषेधः सिद्धो भवति' इति न्यासकारः। वज्यते निगम्यते सर्वैरिति वाजोऽन्नम्। वाजानां पतिः वाजपतिः १मा १व०।

विश्पते (२६)—विशां [विशे २द०] प्रजानां पतिः विश्पतिस्तस्य सं० १व०।

विश्वम् (२२)—[विश्ववेदसम् १द०] पुंसि २या १व०।

विश्वाय (३१)—व्यत्ययेन असर्वनामता। ४र्थी १व०।

हवन्तम् (२१)—हवु [वह्वसि १द०] धातोर्व्यत्ययेन शटः, तं २या १व०।

वंसते (२२)—'वन' सम्भक्तौ भ्वा० प० अनि० वनते, लिटि सिवागमः।

शम् (३३)—'शमु' उपशमे दि० प० से० शाम्यति, धातोर्विन्, निपातनाद्वा। अव्ययम्।

शंयोः (३३)—शाम्यतेः 'कंशंभ्यां बभयुस्तितुतयसः' ५।२।१३८ इति युस्, तयोः। यद्वा शंयोरेवाव्ययम्।

शोचिषा (२२)—शुच् धातोः [शुक्रः १द०] 'अर्त्तिशुचि०' उ० २।१०८ इति इसिः शोचिस्तेन ३या १व०।

शुधी (२९)—'शु' श्रवणे भ्वा० प० अनि०, अस्य लोटो मध्यमैकवचने श्रणु 'छन्दस्युभयथा' ३।४।११७ इत्युभयसंज्ञावत्त्वादार्धधातुके ततो न श्रु न च शु:। ततः 'शु श्रणु पृक्ष०' ६।४।१०२ इति हेर्द्धिः। 'अन्येषामपि०' ६।३।१३७ इति दीर्घः।

षु (२८)—[षु प्रवाणि १द०]।

सः (२९)—तच्छब्दस्य [२द०] 'तदोः स सावनन्त्ययोः' ७।२।१०६ इति सः, १मा १व०।

सन्त्यते (३४)—'अस' भुवि धातोः [असि १द०] लटः शबादेशः, 'असोरल्लोपः' ६।४।१११ अस्यास्तेयाकारस्य लोपः स्यात् सार्वधातुके क्ङिति, सन्तेषां पतिस्तस्य सं० १व०।

सनिम् (२८)—षणु दाने [गोधाता] धातोः 'खनिकष्य०' उ० ४।१४० इति इन्। सनोति ददातीति सनिस्तम् २या १व०।

सहस्वते (२१)—'षह' मर्षणे भ्वा० आ० से० सहते, धातोः 'सर्वधातुभ्योऽसुन्' उ० ४।१८९ इत्यसुन्। सहते मर्षयतीति सहो बलम्। ततः 'तदस्यास्त्यस्मिन्निति०' ५।२।९४ इति मतुप्। 'मादुपधायाः०' ८।२।९ इति मस्य वः। सहस्वान्तस्य ४र्थी १व० व्यत्ययेन द्वितीयास्थाने।

साधवः (२५)—'साध' संसिद्धौ स्वा० प० से० साध्नोति, धातोः 'क्लवापा०' उ० १।१ इति उः। १मा बहु०।

सुवीरम् (२९)—सुपूर्वात् 'वीर' विक्रान्तौ चु० आ० वीरयते, धातोः कः। यद्वा 'अत्र' गतिभेषणयोः भ्वा० प० से० अजति, धातोः वौ आदेशः, रक् प्रत्ययश्च 'स्फायितञ्चि०'

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उ० २।१३ इति। अजति गच्छति शत्रून् प्रति स वीरः। सु—वीरः सुवीरः तं २या १व०।

सूर्य्यम् (३१)—'सृ' गतौ भ्वा० प० अनि० सरति, 'षु' प्रेरणे तु० प० से० सुवति, आभ्यां 'राजसूय सूर्य्य०' ३।१।११४ इति क्यबन्तो निपातः। सरति, सुवति वा सूर्य्यस्तम् २या १व०।

सत्यधर्म्माणम् (३२)—'अस' भुवि+शतृ+यत्। 'धृङ्' अवस्थाने तु० आ० अनि० ध्रियते, धातोः 'अर्त्ति स्तुसुहुसृधृ०' उ० १।१४० इति मनिन्। ध्रियते सुखप्राप्तये सेव्यते स धर्म्मः। सत्यो धर्म्मो यस्य 'धर्म्मादनिच् केवलात्' ५।४।१२४ इत्यनिच् समासान्तः, तम् २या १व०।

हवम् (२९)—जुहोतेः [आहुतः १द०] ह्वयतेर्वा [आह्वे २द०] अप्। २या १व०।

हव्यानि (३०)—हव्यशब्दस्य [हव्यदातये १द] २या बहु०।

हि (२५)—[१द०]।

इति तृतीयदशतिः तृतीयखण्डस्य।

प्रथमम् (आग्नेयं) पर्व। प्रथमोऽध्यायः। प्रथमः प्रपाठकः। चतुर्थः खण्डः। चतुर्थी दशतिः।

अथ प्रथमा।

यज्ञा यज्ञा वो इत्यृचो बार्हस्पत्यस्तृणपाणिः शंयु ऋषिः। चत्वारि सामानि, द्वे सामनी भरद्वाजस्य सम्बन्धिनी उपह्वौ एतन्नामके, तृतीयं साम श्रौष्टीगवं श्रुष्टिगुर्नाम ऋषिः, चतुर्थं साम वैश्वानराख्यस्याग्नेः स्वभूतं यज्ञायज्ञीयं, भरद्वाजस्य ऋषेः सम्बन्धि वा (भरद्वाजस्योपह्वौ द्वौ श्रौष्टीगवं तृतीयमग्ने वैश्वानरस्य यज्ञायज्ञीयं भरद्वाजस्य वा। आ० ब्रा०) बृहती छन्दः (बृहती जागतस्त्रयश्च गायत्राः। पि० छ० सू०,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अध्या० ३ । सू० २६) (क) अग्नि देवता । (यज्ञा यज्ञा वो अग्नय इत्यग्निर्वै यज्ञो यज्ञ एव तद्यज्ञं प्रतिष्ठापयति ॥ ता० म० ब्रा० ११।५।२) यज्ञे यज्ञे संस्तुतेऽग्नौ यज्ञस्य प्रतिष्ठायां विनियोगः ।

३ १ २ ३ १ २ ३ १ २ ३ १ २ १ २ ३ २
यज्ञा यज्ञा वो अग्नये गिरा गिरा च दक्षसे । प्र प्र वय-
३ १ २ ३ १ २ ३ २ ३ १र २र
मम्रृतं जातवेदसं प्रियं मित्रं न शꣳसिषम् ॥३५॥ (ख)

पदपाठः । यज्ञा यज्ञा ७ । वः २ । अग्नये ४ । गिरा गिरा ३ । च अ० । दक्षसे ४ । प्र प्र अ० । वयम् १ । अम्रृतम् २ । जातवेदसम् २ । प्रियम् २ । मित्रम् २ । न अ० । शंसिषम् क्रि० ।

अन्वयः । [हे स्तोतारः] वः (=यूयं) यज्ञा यज्ञा दक्षसे अग्नये गिरा गिरा [स्तोत्रं कुरुत], वयं च अम्रृतं जातवेदसं मित्रं न प्रियं [तं] प्र प्र शंसिषम् ।

आधियाज्ञिकम् । हे स्तोतारः ! 'वः' यूयं, विभक्तिव्यत्ययः 'यज्ञा यज्ञा' प्रति यज्ञं 'दक्षसे' समर्थाय 'अग्नये' 'गिरा गिरा' स्तुतिरूपाभिः सर्व्वाभि र्वाग्भिः स्तोत्रं कुरुत । 'वयम्' ऋत्विजः 'च' अपि 'अम्रृतम्' अविनाशिनं 'जातवेदसं' जातधनं 'मित्रं न प्रियं' बन्धुमिवानुकूलं तं 'प्रप्रशंसिषम्' प्रशंसामः ।

आध्यात्मिकम् । हे स्तोतारः ! 'वः' यूयं 'यज्ञा यज्ञा प्रतियज्ञं 'दक्षसे' समर्थाय, महते 'अग्नये' परमात्मने 'गिरा गिरा' स्तुतिभिः पूजयत । 'वयम्' उपासकाः 'च' अपि 'अम्रृतम्' अविनाशिनं 'जातवेदसं' जातधनं, जातप्रज्ञं वा 'मित्रं न प्रियं' बन्धुवदनुकूलं तं 'प्रप्रशंसिषम्' प्रशंसामः ।

(क) यदा एको जागतः (द्वादशाक्षरः) पादः, त्रयश्च गायत्राः (अष्टाक्षराः), तदा उष्णिक् नाम छन्दो भवति ।

(ख) ऋ० अष्ट० ४ । अध्या० ८ । व० १ । एवं विधः पाठः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निरुक्तम्। दक्षतेरुत्साहकर्म्मणः॥ १।७।१॥ दक्षो बलनाम॥ ३।९।७॥ शंसतिः अर्चतिकर्म्मा॥ ३।१९।१॥ अमृतेऽमरणधर्म्माणौ॥ २।२०।१॥

अथ द्वितीया।

पाहि नो अग्न इत्यृचः प्रगाथपुत्रो भर्ग ऋषिः। साम त्रयं, कार्त्तयश नामकं, कार्त्तवेशनामकं वा, द्वितीयं नार्म्मेधं नृमेधो नाम ऋषिस्तत्संबन्धि, तृतीयं साम कार्त्तवेशनामकमेव (कार्त्तयशं च कार्त्तवेशं वा नार्मेधं च कार्त्तवेशं चैव। आ० ब्रा०) बृहती। अग्निः।

३ १ २ ३ ३ १ २ ३ २ २ ३ १ २ ३ २
पाहि नो अग्न एकया पाह्यूऽत द्वितीयया। पाहि
३ २ ३ १ २ ३ १ २ ३ १ २
गीर्भिस्तिसृभि रूर्जाम्पते पाहि चतसृभिर्वसो॥३६॥ (क)

पदपाठः। पाहि क्रि०। नः २। अग्ने सं०। एकया ३। पाहि क्रि०। उत अ०। द्वितीयया ३। पाहि क्रि०। गीर्भिः ३। तिसृभिः ३। ऊर्जाम्पते सं०। पाहि क्रि०। चतसृभिः ३। वसो सं०।

अन्वयः। [हे] ऊर्जाम्पते वसो अग्ने! एकया [अभिष्टुतः सन्] नः पाहि, उत द्वितीयया [अभिष्टुतः सन्] पाहि, तिसृभिः गीर्भिः [अभिष्टुतः सन्] पाहि, चतसृभिः [अभिष्टुतः सन्] पाहि [च]।

आधियाज्ञिकम्। हे 'ऊर्ज्जाम्पते अन्नपते 'वसो' धनप्रद 'अग्ने'! 'एकया' ऋग्वेदलक्षणया गिरा अभिष्टुतः सन् 'नः' अस्मान् 'पाहि' रक्ष, 'उत' अपि च 'द्वितीयया' यजुर्वेदलक्षणया गिरा अभिष्टुतः सन् 'पाहि' रक्ष, 'तिसृभिः' ऋग्यजुस्सामलक्षणाभिः 'गीर्भिः'

(क) ऋ० ६।४।३३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वाग्भिः अभिष्टुतः सन् 'पाहि' रक्ष, 'चतसृभिः' ऋग्यजुस्सामाथर्वलक्षणाभि र्गीर्भिः अभिष्टुतः सन् 'पाहि' रक्ष च।

आध्यात्मिकम्। हे 'ऊर्ज्जाम्पते' अन्नपते 'वसो' जगन्निवास अन्तर्यामिन् 'अग्ने' परमात्मन्! 'एकया' ऋग्वेदलक्षणया गिरा अभिष्टुतः सन् 'नः' अस्मान् 'पाहि' रक्ष; 'उत' अपि च 'द्वितीयया' यजुर्वेदलक्षणया गिरा अभिष्टुतः सन् 'पाहि' रक्ष; 'तिसृभिः' ऋग्यजुस्सामलक्षणाभिः 'गीर्भिः' वाग्भिः अभिष्टुतः सन् 'पाहि' रक्ष; 'चतसृभिः' ऋग्यजुस्सामाथर्वलक्षणाभिर्गीर्भिः अभिष्टुतः सन् 'पाहि' रक्ष च। यद्वा योगिमते, 'एकया' ताल्वादिस्थानैरुच्चार्यमाणया श्रोत्रविषयया वैखरी संज्ञया 'द्वितीयया' हृद्देशस्थया वैखरीमूलयाऽव्यक्तया मध्यमासंज्ञया 'तिसृभिः' वैखरीमध्यमापश्यन्तीभिः 'चतसृभिः' वैखरीमध्यमापश्यन्तीपराभिः अभिष्टुतः सन् पाहीति।

चतुर्विधा हि गिरो भवन्ति:—वैखरी, मध्यमा, पश्यन्ती, परेति। तत्र श्रोत्रविषया वैखरी मनुष्यमात्रैरुपयुज्यमाना। तस्या मूलं व्यक्रियमाणाया वाचः कारणं हृद्देशस्थाऽव्यक्ता मध्यमा। लोकव्यवहारातीता समाधावुपयुज्यमाना उच्चारणासमर्थस्यापि निसर्गज्ञानाधारभूता नित्या पश्यन्ती। परा तु यस्या 'अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरं' विद्यते। तया एव परया गिरा कल्पादौ परमात्मा ब्रह्माणं वेदमुपादिशत् 'पूर्वेषामपि गुरुः कालेनानवच्छेदात्' योगदर्शने पा० १।२६ इति वचनात्।

निरुक्तम्। ऊर्गिति अन्ननाम॥ ३।९।४॥ वसु धननामसु॥ ३।९।९॥

अथ तृतीया।

बृहद्भिरग्ने इत्यृचो बार्हस्पत्यस्तृणपाणिः शंयुः। द्वे सामनी भरद्वाजस्य पृश्निनो एतन्नामके (भरद्वाजस्य पृश्निनो द्वे। आ० ब्रा०) बृहती। अग्निः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
बृहद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा। भरद्वाजे
३ १ २ ३ १ २
समिधानो यविष्ठ रेवत्पावक दीदिहि ॥ ३७ ॥ (क)

पदपाठः। बृहद्भिः ३। अग्ने सं०। अर्चिभिः ३। शुक्रेण ३। देव सं०। शोचिषा ३। भरद्वाजे ७। समिधानः १। यविष्ठ सं०। रेवत् १। पावक सं०। दीदिहि क्रि०।

अन्वयः। [हे] देव यविष्ठ पावक अग्ने! [त्वं] शुक्रेण शोचिषा भरद्वाजे समिधानः बृहद्भिः अर्चिभिः रेवत् यथा स भवति तथा दीदिहि।

आधियाज्ञिकम्। हे 'देव' द्योतमान 'यविष्ठ' अतिशयेन महन् 'पावक' शोधक 'अग्ने'! त्वं स्वकीयेन 'शुक्रेण' शुद्धेन 'शोचिषा' तेजसा 'भरद्वाजे' अन्नस्य धातरि यजमाने 'समिधानः' समिध्यमानः 'बृहद्भिः' महद्भिः 'अर्चिभिः' प्रकाशगुणैः 'रेवत्' प्रशस्तैश्वर्यधनो यथा स भवति तथा 'दीदिहि' दीप्यस्व, तस्मै जनाय धनं देहीति।

आध्यात्मिकम्। हे 'देव' दिव्यगुणयुत 'यविष्ठ' अतिशयेन महन् 'पावक' पवित्रकर्त्तः 'अग्ने' परमात्मन्! त्वं स्वकीयेन 'शुक्रेण' शुद्धेन 'शोचिषा' तेजसा 'भरद्वाजे' विज्ञानादिधारके पुरुषार्थिनि जने 'समिधानः' देदीप्यमानः 'बृहद्भिः' महद्भिः 'अर्चिभिः' प्रकाशगुणैः 'रेवत्' प्रशस्तैश्वर्यविद्याविनयधनो यथा स भवति तथा 'दीदिहि' दीप्यस्व, तथाविधं ज्ञानधनं तस्मै पुरुषार्थिने जनाय देहीति।

निरुक्तम्। बृहदिति महतो नामधेयम्॥ १।७।१॥ अर्चिरिति ज्वलतो नाम॥ २।२८।४॥ शोचिरिति ज्वलतो नाम॥ २।२८।४॥ दीदयतीति ज्वलतिकर्म्मसु॥ २।२८।३॥

(क) ऋ० ४।८।२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ चतुर्थी ।

त्वे अग्ने स्वाहुत इत्यृचो मैत्रावरुणो वसिष्ठ ऋषिः । एकम् अङ्गिरसः पुत्रस्य उरोः साम (उरोराङ्गिरसस्य साम । आ० ब्रा०) बृहती । अग्निः । विनियोगस्तु प्रातरनुवाके आश्विनशस्त्रे ।

१ २ ३ १ २ ३ १ २ ३ २ ३ २
त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः । यन्तारो ये
३ १ २ ३ १ २ ३ १र २र ३ १ २
मघवानो जनानामूर्वं दयन्त गोनाम् ॥ ३८ ॥ (क)

पदपाठः । त्वे ६ । अग्ने सं० । स्वाहुत सं० । प्रियासः १ । सन्तु क्रि० । सूरयः १ । यन्तारः १ । ये १ । मघवानः १ । जनानाम् ६ । ऊर्वम् ८ । दयन्त क्रि० । गोनाम् ६ ।

अन्वयः । [हे] स्वाहुत अग्ने ! त्वे (=तव) सूरयः ये [च] मघवानः जनानां गोनां (=गवां) यन्तारः ऊर्वं [स्तुतीनां] दयन्त [ते] [तव] प्रियासः सन्तु ।

आधियाज्ञिकम् । हे 'स्वाहुत' सुष्ठु समन्तात्कृतहोम 'अग्ने' यज्ञदेव ! 'त्वे' तव 'सूरयः' स्तोतारः 'ये' च 'मघवानः' धनवन्तः 'जनानाम्' अस्मदीयानां मनुष्याणां 'यन्तारः' नेतारः, राजादयः 'गोनां' गवां वेदवाचां नेतारः, विद्वांसः, मनुष्यान् प्रति वेदोपदेशं कुर्वन्तः, 'ऊर्वं' समूहं स्तुतीनामिति 'दयन्त' प्रयच्छन्ति, स्तुवन्तीत्यर्थः ते तव 'प्रियासः' प्रियाः 'सन्तु' ।

आध्यात्मिकम् । हे 'स्वाहुत' मनसि योगानुष्ठानेन सम्यग्धृत 'अग्ने' यज्ञदेव परमात्मन् ! 'त्वे' तव 'सूरयः' स्तोतारः 'ये' च मघवानः' विद्यादिधनवन्तः 'जनानाम्' अस्मदीयानां मनुष्याणां 'यन्तारः' नेतारः, राजादयः 'गोनां' गवां वेदवाचां नेतारः

(क) ऋ० ५।२।२२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्चेति, मनुष्यान् प्रति वेदोपदेशं कुर्वन्तो विद्वांसः 'ऊर्वं' समूहं स्तुतीनामिति 'दयन्त' प्रयच्छन्ति, स्तुवन्तीत्यर्थः ते तव 'प्रियासः' प्रियाः 'सन्तु'।

निरुक्तम्। सूरिरिति स्तोतृनाम॥ ३।१९।४॥ यन्तारो याज्ञाकर्म्मसु॥ ३।१८।११॥ मघमिति धननामधेयं मंहतेर्दानकर्म्मणः॥ १।७।१॥ दयतिरनेककर्म्मा।...उपदयाकर्म्मा;...दानकर्म्मा वा विभागकर्म्मा वा; ... दहतिकर्म्मा; ... हिंसाकर्म्मा; दयमान (उड्डीयमान) इति॥ ४।१७।२॥

अथ पञ्चमी।

अग्ने जरितर्विश्पतिरित्यृचो बार्हस्पत्यो भरद्वाज ऋषिः। द्वे सामनी पौरुमद्गे, गोतम ऋषिः, आङ्गिरसः पुरुमद्गो वा (गोतमस्य पौरुमद्गे द्वे पुरुमद्गस्य वाङ्गिरसस्य। आ० ब्रा०) बृहती। अग्निः। विनियोगस्तु प्रातरनुवाके आश्विनशस्त्रे च।

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ १ २
अग्ने जरित र्विश्पति स्तपानो देव रक्षसः। अप्रोषिवान्
३ १ २ ३ २ ३ १ २ ३ २
गृहपते महाँ२ऽअसि दिवस्पायु र्दुरोणयुः॥३९॥ (क)

पदपाठः। अग्ने सं०। जरितः सं० विश्पतिः १। तपानः १। देव सं०। रक्षसः ६। अप्रोषिवान् १। गृहपते सं०। महान् १। असि क्रि०। दिवः ६। पायुः १। दुरोणयुः १।

अन्वयः। [हे] जरितः अग्ने! [त्वं] विश्पतिः, [हे] देव! [त्वं] रक्षसः तपानः [च], [हे] गृहपते! [त्वम्] अप्रोषिवान् महान् असि, दिवः पायुः दुरोणयुः [च] [असि]।

आधियाज्ञिकम्। हे 'जरितः' स्तोतः स्तुत्य! 'अग्ने' त्वं विश्पतिः विशां प्रजानां पतिः पालकः, हे 'देव' प्रकाशमान!

(क) ऋ० ६।४।३५। 'गृहपते' इत्यत्र 'गृहपतिः' पाठः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वं 'रक्षसः' दुष्टस्य 'तपानः' सन्तापकः च, हे 'गृहपते' गार्हपत्याग्ने ! त्वम् 'अप्रोषिवान्' यजमानगृहमत्यजन् 'महान्' 'असि', 'दिवः' द्युलोकस्य 'पायुः' पाता रक्षिता 'दुरोणयुः' दुरोणं गृहं यौति मिश्रयति स सदाग्न्यागारे स्थापितश्चासि ।

आध्यात्मिकम् । हे 'जरितः' स्तुत्य 'अग्ने' परमात्मन् ! त्वं 'विश्पतिः' प्रजापालकः, हे 'देव' दिव्यगुणोपेत ! त्वं 'रक्षसः' दुष्टस्य 'तपानः' सन्तापकः च, हे 'गृहपते' गृहस्थानां पालक ! त्वम् 'अप्रोषिवान्' गृहमत्यजन् भक्तहृदि सदा निवसन् 'महान्' महत्त्वयुक्तः 'असि,' 'दिवः' द्युलोकस्य 'पायुः' पाता रक्षिता 'दुरोणयुः' गृहे हृदयकन्दरे उपासकानामिति सदा वर्त्तमानश्चासि ।

निरुक्तम् । जरिता स्तोतृनाम ॥ ३।१९।४ ॥ रक्षो रक्षितव्यमस्मात् । रहसि क्षणोतीति वा ॥ रात्रौ नक्षत इति वा ॥ ४।१८।३॥ दुरोण इति गृहनाम दुरवा भवन्ति दुस्तर्पाः ॥ ४।५।१॥

अथ षष्ठी ।

अग्ने विवस्वदुषस इत्यृचः काण्वः प्रस्कण्व ऋषिः । द्वे सामनी माण्डवे जमदग्निगोत्रस्य मण्डोः एतन्नामकऋषेः मण्डो वा (मण्डोर्ज्जामदग्नस्य सामनी द्वे माण्डवे वा । आ० ब्रा०) बृहती । अग्निः । (अग्ने विवस्वदुषस इति सन्धिना स्तुयुः प्राणा वै त्रिवृत् स्तोमानां प्रतिष्ठा रथन्तरꣳसाम्नां प्राणाꣳश्चैवोपयन्ति प्रतिष्ठाञ्च ॥ ता० म० ब्रा० ९।३।४) नवस्तोत्रीयात्मकसन्धिस्तोत्रेण स्तोतुं मध्ये व्युष्टिः स्यादिति शङ्का यद्युदियात्तदाऽग्ने विवस्वदुषस इति प्रगाथेऽग्निदेवत्ये सन्धिना स्तोत्रेण त्रिवृत् स्तोमेन स्तुयुः ।

२ ३ १ २ ३ १ २ ३ १र २र २ ३ १ २
अग्ने विवस्वदुषस श्चित्रꣳ राधो अमर्त्य । आ दाशुषे
३ २ ३ २ ३ १ २ ३ १ २
जातवेदो वहा त्वमद्या देवाꣳ उषर्बुधः ॥ ४० ॥ (क)

(क) ऋ०, १।३।२८ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पदपाठः । अग्ने सं० । विवस्वत् २ । उषसः ६ । चित्रम् २ । राधः २ । अमर्त्य सं० । आ अ० । दाशुषे ४ । जातवेदः सं० । वहा क्रि० । त्वम् १ । अद्या अ० । देवान् २ । उषर्बुधः २ ।

अन्वयः । [हे] अमर्त्य जातवेदः अग्ने ! त्वम् उषसः विवस्वत् चित्रं राधः आवह, दाशुषे अद्या उषर्बुधः देवान् आ वह [च] ।

आधियाज्ञिकम् । हे 'अमर्त्य' अविनाशिन् 'जातवेदः' जातधन 'अग्ने' सूर्य्यात्मन् अग्ने ! 'त्वम्' 'उषसः' प्रातः कालस्य 'विवस्वत्' प्रकाशकं, तमोनाशकं 'चित्रम्' अद्भुतं 'राधः' धनं, तेजोरूपम् 'आवह' प्रापय ; 'दाशुषे' हविर्दत्तवते 'अद्या' अस्मिन्दिने 'उषर्बुधः' प्रातः प्रबुद्धान् 'देवान्' ज्ञानकर्म्मेन्द्रियाणीति आवह, तत्तत्कर्म्मकरणाय प्रापय, तानि सत्कर्म्मणि योजय इति ।

आध्यात्मिकम् । हे 'अमर्त्य' अविनाशिन् 'जातवेदः' सर्वधन, प्राणिनां वेदितः 'अग्ने' प्रकाशक परमात्मन् ! 'त्वम्' 'उषसः' प्रातःकालस्य 'विवस्वत्' प्रकाशकं 'चित्रम्' अद्भुतं 'राधः' धनं, सूर्य्यज्योतीरूपं, ब्राह्ममुहूर्त्ते उपासनाजनितं ज्ञानरूपं धनं वा [ब्राह्मे-मुहूर्त्ते बुध्येत धर्म्मार्थौ चानुचिन्तयेत् । कायक्लेशांश्च तन्मूलान् वेदतत्त्वार्थमेव च ॥ मनुः अ० ४।८२] 'आवह' प्रापय । 'दाशुषे' सर्वस्य दात्रे पुरुषार्थिने उपासकाय 'उषर्बुधः' प्रातः प्रबुद्धान् 'देवान्' दिव्यगुणान्, ज्ञानकर्म्मेन्द्रियाणि वा आवह च, तत्तत्कर्म्मकरणाय प्रापय च, तानि सत्कर्म्मणि योजयेति ।

निरुक्तम् । उषाः कस्मादुच्छतीति सत्या रात्रेरपरः कालः ॥ २।१८।४ ॥ चित्रं चायनीयं मंहनीयम् ॥ ४।४।१ ॥ राध इति धननाम राध्नवन्त्यनेन ॥ ४।४।१ ॥

अथ सप्तमी ।

त्वन्नश्चित्र इत्यृचो बार्हस्पत्यस्तृणपाणिः शंयु र्ऋषिः । गाथं सामं भरद्वाजस्यर्षिः (भरद्वाजस्य गाथम् । आ० ब्रा०) । बृहती । अग्निः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१ २ ३ २ ३ २उ ३ १ २ ३ २
त्वन्न श्चित्र ऊत्या वसो राधाꣳसि चोदय। अस्य
३ १र ३ २र ३ १ २ ३ २ ३ २ ३ १र २र
रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः॥४१॥ (क)

पदपाठः। त्वम् १। नः ४। चित्रः १। ऊत्या ३। वसो सं०। राधांसि २। चोदय क्रि०। अस्य ६। रायः ६। त्वम् १। अग्ने सं०। रथीः १। असि क्रि०। विदाः क्रि०। गाधम् २। तुचे ४। तु अ०। नः ६।

अन्वयः। [हे] वसो अग्ने! चित्रः त्वम् ऊत्या [सह] नः राधांसि चोदय, अस्य रायः त्वम् रथीः असि, [त्वञ्च] नः तुचे गाधं तु (=क्षिप्रं) विदाः।

आधियाज्ञिकम्। हे 'वसो' धनदातः 'अग्ने'! 'चित्रः' चायनीयः, पूजनीयः 'त्वम्' 'ऊत्या' रक्षया सह 'नः' अस्मभ्यं 'राधांसि' धनानि 'चोदय' प्रेरय, 'अस्य' लोके परिदृश्यमानस्य 'रायः' धनस्य 'त्वं' 'रथीः' प्रशंसितो नेता, दाता, प्रापको वा 'असि' भवसि; त्वञ्च 'नः' अस्माकं 'तुचे' अपत्याय, अपतनाय, समृद्धये इति 'गाधं' प्रतिष्ठाम्, आत्मनः स्थैर्यं 'तु' क्षिप्रं 'विदाः' लम्भय, देहि।

आध्यात्मिकम्। हे 'वसो' वासयितः, सर्वाधारभूत 'अग्ने' परमात्मन्! 'चित्रः' चायनीयः, पूजनीयः 'त्वम्' 'ऊत्या' रक्षया सह 'नः' अस्मभ्यं 'राधांसि' शुभकर्मफलरूपाणि कल्याणधनानि 'चोदय' प्रेरय; 'अस्य' लोके परिदृश्यमानस्य 'रायः' धनस्य, लोकमङ्गलस्य 'त्वं' 'रथीः' प्रशंसितो नेता, दाता, प्रापको वा 'असि'; त्वञ्च 'नः' अस्माकं 'तुचे' अपत्याय, अपतनाय, समृद्धये इति 'गाधं' प्रतिष्ठाम्, आत्मनः स्थैर्यं 'तु' क्षिप्रं 'विदाः' लम्भय, प्रापय।

निरुक्तम्। रायो धननामसु॥ ३।९।९॥ तुगित्यपत्यनाम॥ ३।१।३॥

(क) ऋ० ४।८।२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथाष्टमी ।

त्वमित्सप्रथा इत्यृचः प्रगाथपुत्रो भर्ग ऋषिः । सामद्वयं गौतमं नाम, गोतमऋषिः (गौतमे द्वे । आ० ब्रा०) बृहती । अग्निः । प्रातरनुवाके आश्विनशस्त्रे च विनियोगः ।

२उ ३ १ २ ३ १ २ ३ २ ३ २ १र २र
त्वमित्सप्रथा अस्यग्ने त्रात ऋतः कविः । त्वां विप्रासः
३ १ २ ३ १ २
समिधान दीदिव आविवासन्ति वेधसः ॥ ४२ ॥ (क)

पदपाठः । त्वम् १ । इत् अ० । सप्रथाः १ । असि क्रि० । अग्ने सं० । त्रातः सं० । ऋतः १ । कविः १ । त्वाम् २ । विप्रासः १ । समिधान सं० । दीदिव सं० । आ विवासन्ति क्रि० । वेधसः १ ।

अन्वयः । [हे] त्रातः अग्ने ! त्वं सप्रथाः ऋतः कविः असि ; [हे] समिधान ! दीदिव ! विप्रासः वेधसः त्वाम् इत् (=एव) आ विवासन्ति ।

आधियाज्ञिकम् । हे 'त्रातः' रक्षक 'अग्ने' ! 'त्वं' 'सप्रथाः' सर्वत्र पृथुः, विस्तृतः 'ऋतः' सत्यभूतः 'कविः' वाग्रूपेण उच्चारयिता 'असि' ; हे 'समिधान' सम्यग्दे दीप्यमान ! 'दीदिव' प्रकाशरूप ! 'विप्रासः' विप्राः मेधाविनः 'वेधसः' विधिवेत्तारः 'त्वाम्' 'इत्' एव 'आ विवासन्ति' सर्वतः परिचरन्ति ।

आध्यात्मिकम् । हे 'त्रातः' रक्षक 'अग्ने' परमात्मन् ! 'त्वं' 'सप्रथाः' सर्वत्र विस्तृतः 'ऋतः' सत्यभूतः यज्ञरूपो वा 'कविः' क्रान्तदर्शी 'असि' ; हे 'समिधान' स्वीयविभूतिभिः सम्यग्देदीप्यमान ! 'दीदिव' तेजस्विन् ! 'विप्रासः' मेधाविनः 'वेधसः' विधिवेत्तारः 'त्वाम्' 'इत्' एव 'आविवासन्ति' सर्वतः परिचरन्ति ।

(क) ऋ०, ६।४।३२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निरुक्तम्। सप्रथाः सर्वतः पृथुः ॥ ६।७।१२ ॥ ऋतं सत्यं वा यज्ञं वा ॥ ४।१९।८ ॥ विप्रासः मेधाविनः ॥ १०।१९।१ ॥ विवासतीति परिचरणकर्म्मा ॥३।१३।१०॥ वेधा इति मेधाविनाम ॥३।१९।२॥

अथ नवमी।

आ नो अग्ने इत्यृचः प्रगाथपुत्रो भर्गऋषिः। (अग्नेरायुः। आ० ब्रा०) एकमायुः साम, ऋषिश्चाग्निः। बृहती। अग्निः। (अथैष आयुः॥ आयुषा वै देवा असुरानायुवतायुते भ्रातृव्यं य एवं वेद॥ स्वर्गकामो यजेत॥ ता० म० ब्रा० १६।३।१, २, ३) आयुरारब्धे सोमयागे विनियोगः।

१ २ ३ १ २ ३ १ २ ३ १ २ १ २
आ नो अग्ने वयोदधꣳ रयिं पावक शꣳस्यम्। राखा
३ २ ३ १ २ ३ १ २
च न उपमाते पुरुस्पृहꣳ सुनीती सुयशस्तरम् ॥४३॥(क)

पदपाठः। आ अ०। नः ४। अग्ने सं०। वयोदधम् २। रयिम् २। पावक सं०। शंस्यम् २। राखा क्रि०। च अ०। नः ४। उपमाते सं०। पुरुस्पृहम् २। सुनीती ३। सुयशस्तरम् २।

अन्वयः। [हे] पावक अग्ने! वयोदधं शंस्यं रयिं नः आ [हर], हे उपमाते! नः सुनीती (=सुनीत्या) पुरुस्पृहं सुयशस्तरं च राखा।

आधियाज्ञिकम्। हे 'पावक' शोधक 'अग्ने'! 'वयोदधम्' आयोरन्नस्य च वर्धकं 'शंस्यं' प्रशंसनीयं 'रयिं' धनं 'नः' अस्मभ्यम् 'आ' हर, हे 'उपमाते' घृतप्रिय, यज्ञविधातः! 'नः' अस्मभ्यं 'सुनीती' सुनीत्या, शोभननयनेन 'पुरुस्पृहं' बहुभिः स्पृहणीयं 'सुयशस्तरम्' अत्यन्तशोभनकीर्त्तिधनं 'राखा' देहि।

(क) ऋ० ६।४।३४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आध्यात्मिकम्। हे 'पावक' पवित्रकर्त्तः 'अग्ने' परमात्मन्! 'वयोदधम्' आयोरन्नस्य च वर्धकं 'शंस्यं' प्रशंसनीयं 'रयिं' धनं 'नः' अस्मभ्यम् 'आ' हर, हे 'उपमाते' उपमिमीते सर्वत्र व्याप्तः सन् रचयति सर्वं तादृश! 'नः' अस्मभ्यं 'सुनीती' सुनीत्या, शोभननयनेन 'पुरुस्पृहं' बहुभिः स्पृहणीयं 'सुयशस्तरम्' अत्यन्तशोभनकीर्त्तिधनं 'रास्वा' देहि।

निरुक्तम्। वय इत्यन्ननाम ॥ ३।८।४ ॥

अथैकादशी।

यो विश्वा दयते इत्यृचः काण्वः सौभरिर्ऋषिः। साम चतुष्टयं, द्वे हरसी अग्नि ऋषिः, द्वे दैर्घश्रवसे दीर्घश्रवा ऋषिः (अग्ने हरसी द्वे दैर्घश्रवसे द्वे। आ० ब्रा०) बृहती। अग्निः। विनियोगस्त्वाग्नेयक्रतोः प्रातरनुवाकप्रकरणे।

२उ ३ १ २ ३ २ ३ १ २ ३र २र
यो विश्वा दयते वसु होता मन्द्रो जनानाम्।
३ १र २र ३ १ २ ३ १र २र ३ ३ १ २
मधो र्न पात्रा प्रथमान्यस्मै प्रस्तोमायन्त्वग्नये ॥४४॥ (क)

पदपाठः। यः १। विश्वा २। दयते क्रि०। वसु २। होता १। मन्द्रः १। जनानाम् ६। मधोः ६। न अ०। पात्रा २। प्रथमानि २। अस्मै ४। प्र अ०। स्तोमा १। यन्तु क्रि०। अग्नये ४।

अन्वयः। यः होता मन्द्रः विश्वा (=विश्वानि) वसु (=वसूनि) जनानां दयते [तस्मै] अस्मै अग्नये मधोः पात्रा (=पात्राणि) न प्रथमानि स्तोमा (=स्तोमानि) [स्तुतीनां] प्रयन्तु।

आधियाज्ञिकम्। 'यः' 'होता' होमनिष्पादकः 'मन्द्रः' हर्षकरः 'विश्वा' विश्वानि सर्वाणि 'वसु' वसूनि, धनानि 'जनानां'

(क) ऋ० ६।७।१४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जनेभ्यः 'दयते' प्रयच्छति तस्मै 'अस्मै' 'अग्नये' 'मधोः' सोमस्य 'पात्रा' पात्राणि 'न' इव 'प्रथमानि' मुख्यानि 'स्तोमा' स्तोमानि समूहाः स्तुतीनामिति 'प्रयन्तु' गच्छन्तु। यथा मधुररस-पानेन हृष्यति जनस्तथास्मत्कृतैराहुतिभिः स्तुतिसङ्घैश्च त्वमपि प्रसीद वर्द्धस्व च।

आध्यात्मिकम्। 'यः' 'होता' सुखस्य दाता 'मन्द्रः' हर्षकरः विश्वा' विश्वानि सर्वाणि 'वसु' वसूनि ज्ञानधनानि 'जनानां' जनेभ्य उपासकेभ्यः 'दयते' प्रयच्छति तस्मै 'अस्मै' 'अग्नये' परमात्मने 'मधोः' 'पात्रा' 'न' सोमस्य पात्राणीव 'प्रथमानि' मुख्यानि 'स्तोमा' स्तोमानि समूहाः स्तुतीनामिति 'प्रयन्तु' गच्छन्तु। यथा मधुररस-पानेन हृष्यति जनस्तथास्मत्कृतैः स्तुतिसमूहैस्त्वमपि प्रसीद।

निरुक्तम्। मन्द्रा मदना ॥ ११।२८।१ ॥ मधु सोममित्यौपमिकं माद्यतेः ॥ ४।८।१ ॥ मधु धमतेर्विपरीतस्य ॥ १०।३१।२॥ प्रथम इति मुख्यनाम प्रतमो भवति ॥ २।२२।१ ॥

अथ व्याकरणम्।

अग्नये (३५, ३६)—४थी १व०।

अग्ने (३६, ३७, ३८, ३९, ४०, ४१, ४२, ४३)—सं० १व०।

अद्या (४०)—'सद्यः परुत्०' ५।३ २२ इति निपातितम्, अन्यस्मिन्नहनीति अद्य। इदमीऽद्भावः। 'निपातस्य च' ६।३।१२७ इति दीर्घः।

अग्नीषिवान् (३९)—नञ्+प्र+वस निवासे+वनिप् 'अन्येभ्योऽपि०' ३।२।७५ इति। १मा १व०।

अमर्त्य (४०)—सं०।

अमृतम् (३५)—नञ्+मृङ् प्राणत्यागे+क्तन् 'तनि मृङ्भ्यां क्तिच्च' उ० ३।८८ इति। २या १व०।

अर्चिभिः (३७)—'अर्च' पूजायाम् भ्वा० प० से० अर्चति, अस्मात् 'अर्चिशुचि०' उ० २।१०८ इति इसिः। अर्च्यते इति। अर्चिर्भिः ३या बहु व०।

असि (३९, ४०, ४१)।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

'अस्मै (४४)—इदं [अस्य १द] शब्दस्य पुंसि ४र्थी १व०।

अस्य (४१)—।

आ (४३)—अ०।

आवहा (४०)—आ + वहप्रापणे लोट् मध्यम पु० १व०। 'वाचोऽतस्तिङः' ६।३।१३५ इति दीर्घः।

आ विवासन्ति (४२)—आ + वि + वसे र्णिच्। 'छन्दस्युभयथा' ३।४।११७ इति श्यपि आर्धधातुकत्वाण्णिलोपः। यद्वा वाधातोः [वायोः २द] अन्तर्भावितण्यर्थादागमयितुमिच्छतीत्यर्थे सन्, आह्वानेच्छा परिचर्यायां पर्यवस्यतीति विवासति शब्दः परिचर्यार्थे निघण्टौ पठितः, द्विर्भावः, अभ्यासस्य ह्रस्वः, 'सन्यतः' ७।४।७९ इतीत्वम्। लटि प्रथम पु० बहु व०।

इत् (४२)—[२द]।

उत (३६)—[१द]।

उपमाते (४३)—उप + माङ् माने शब्दे च [परमात् १द] + क्तिन्। सं० १व०।

उषर्बुधः (४०)—'उष' दाहे भ्वा० प० से० ओषति, अस्मात् 'उषः किच्च' उ० ४।२३४ इत्यसिः, कित्वान्न गुणः। ओषति उष्णी करोतीति उषः प्रातःकालः। उषसि बुध्यन्ते ये ते, उषः + बुध अवबोधने + इगुपधात्कः। २या बहुव०।

उषसः (४०)—६ष्ठी १व०।

ऊत्या (४१)—[ऊतये १द] ३या १व०।

ऊर्ज्जाम्पते (३६)—'ऊर्ज्ज' बलप्राणनयोः चु० उ० से० ऊर्ज्जयति, + क्विप्। ऊर्ज्जयति प्राणयति बलं ददाति इति ऊर्क् अन्नम्। ऊर्ज्जां पतिः सं० १व०।

ऊर्वम् (३८)—उरु इति बहुनाम नि० ३।१३।१। 'वाच्छन्दसि' ६।१।१०६ इति पूर्वरूपाभावपक्षाश्रयात् 'वोरुपधाया दीर्घइकः' ८।२।७६ इति दीर्घादेशः। २या १व०।

ऋतः (४२)—'ऋ' गतौ [अरम् ३द०], लु० प० अनि० इयर्त्ति, 'ऋच्छ' गतीन्द्रियप्रलयमूर्त्तिभावेषु तु० प० से० ऋच्छति, एभ्यः 'अचिश्नुधातुभ्रुवां क्वः' उ० ३।८९ इति क्वः। १मा १व०।

एकया (३६)—इण् गतौ धातोः 'इण् भी का पा०' उ० ३।४३ इति कन्। एति प्राप्नोतीत्येका, टाप्। ३या १व०।

कविः (४२)—३द०।

गाधम् (४१)—'गाध' प्रतिष्ठालिप्सयोर्ग्रन्थे च भ्वा० आ० से० गाधते, धातोः अच् गाधस्तम् २या १व०।

गिरा गिरा (३४)—वीप्सायां द्वित्वम् [१द]।

गीर्भिः (३६)—३या बहु व०।

गृहपते (३९)—'ग्रह' उपादाने क्र्या० उ० से० गृह्णाति, गृह्णीते, धातोः 'ग्रहि क्वः' ३।१।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१४४ इति कः। यद्वा 'गृह्' गर्हणे भ्वा० आ० वे०, गर्हते, धातोः कुगुपध-लक्षणः कः। गृहस्य पतिः गृहपतिस्तस्य सं० १व०।

गोनाम् (३८)—[गोपवनः ३द] 'इखनद्यापी०' ७।१।५४ नुड्नित्यनुवर्त्य 'श्रीग्रामण्योश्छन्दसि' ७।१।५६ छन्दसीति चानुवर्त्य 'गोः पादान्ते' ७।१।५७ इति नुट्, गोनाम् गवां ६ष्ठी बहु व०।

च (३५)—चर गतौ, चिञ् चयने, 'चण्' दाने भ्वा० प० से० चणति, एभ्यः अन्येभ्योऽपीति डः। अव्ययसंज्ञा। समुच्चये। परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वये।

चतसृभिः (३६)—चतधातोः [असौवचातनम् ३द] 'चतेरुरन्' उ० ५।५८ इति उरन्। चतते याचतेऽसौ चतुः। स्त्रियां चतस्रस्ताभिः ३या बहु व०।

चित्रः (४१)—चिञ् धातोः 'अमि चिमि' उ० ४।१६४ इति क्रः। चीयते इति चित्रः (म)। १मा १व०।

चित्रम् (४०)—२या १व०।

चोदय (४१)—'चुद' सञ्चोदने चु० प० चोदयति, धातोः लोटि मध्यम पु० १व०।

जनानाम् (३८, ४४) ६ष्ठी बहु व०।

जरितः (३९)—'जॄ' वयोहानौ चु० प० जारयति+क्तच्, सं० १व०।

जातवेदः (४०)—सं० १व०।

जातवेदसम् (३६) [३द०]।

तपानः (३९)—तपधातोः [तपिष्ठैः ३द] 'ताच्छील्य०' ३।२।१२९ इति चानश्। तपति, तप्यते, तच्छीलो वा तपानः १मा १व०।

तिसृभिः (३६)—'तरते ङ्रिः' ५।६६ इति, तरतीति त्रिः। 'त्रिचतुरोः स्त्रियां तिसृचतसृ' ७।२।९९ इति तिसृ आदेशः। 'अचि र ऋतः' ७।२।१०० इति रेफादेशः। ३या बहु०।

तु (४१)—'तुद' व्यथने तु० उ० अनि० तुदति, ते, धातोर्मितद्वादित्वाद्धुः। अव्ययसंज्ञा।

तुचे (४१)—'तुज' हिंसायाम् भ्वा० प० से० तोजति, +क्विप्। यद्वा 'टुचु' प्रसादे भ्वा० आ० से० लोचते+क्विप्। सखीपः। तस्मै॥

त्रातः (४२)—त्रैङ् पालने धातोर्मुच्। सं० १व०।

त्वम् (४०, ४१, ४१, ४२)—[१द०]।

त्वा (४२)—[२द०]।

त्वे (३८)—युष्मच्छब्दस्य षष्ठ्येकवचने 'सुपां सुलुक्०' ७।१।३९ इति विभक्तेः शेभावः।

दक्षसे (३५)—'दक्ष' वृद्धौ शीघ्रार्थे च भ्वा० आ० से० दक्षते, असुन्। ४र्थी १व०।

दयते (४४)—'दय' दानगतिरक्षणहिंसादानेषु भ्वा० आ० से० दयते।

दयन्त (३८)—दयन्ते।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दायुषे (४०)—[३८०]

दिवः (३९)—[३८]

दीदिवः (४२)—दिवु धातोः 'छन्दसि लुङ्लङ्लिटः' ३।४।६ इति लडर्थे लिट् (दिवु गल्= दिव् अ) क्वसुः (दिव् अ वस्) द्विर्भावः (दिव् दिव् अ वस्) 'हलादिः शेषः' ७।४।६० अभ्यासस्यादिर्हल् शिष्यते (दि दिव् वस्) 'तुजादीनां दीर्घोऽभ्यासस्य' ६।१।७ (दीदिव् वस्) 'वस्वेकाजाद्घसाम्' ७।२।६७ इति वसो रिट् प्रतिषेधः 'लोपो व्योर्वलि' ६।१।६६ इति वलोपः (दीदि वस्) क्वित्वाद्गुणाभावः, सम्बुद्धौ 'उगिदचां सर्वनामस्थानेऽधातोः' ७।१।७० इति नुम्, हल्ङ्यादिशेषः, संयोगान्तलोपः 'मतुवसोरु सम्बुद्धौ छन्दसि, ८।३।१ इति रुत्वं, विसर्गः। सं० १व०।

दीदिहि (३७)—दिव धातोः शपः श्लुः (बहुलं छन्दसि २।४।६) अभ्यासस्य दीर्घः।

दुरोणयुः (३९)—दुः पूर्वादवते र्नकि रुटि गुणः। 'यु' मिश्रणेऽमिश्रणे च अ० प० से०। दुरोणं गृहं यौति सः, कुप्रत्ययः।

देव (३७,३९)—[२८]।

देवान् (४०)—२या बहु व०।

द्वितीयया (३६)—द्वयोः पूरणः 'द्वेस्तीयः' ५।२।५४ इति द्विशब्दात्तीयः, टाप्, तया।

न (३५, ४४)—।

नः (३६, ४१, ४१, ४३, ४३)—।

पाचा (४४)—'सर्वधातुभ्यष्ट्रन्' उ० ४।१५९ पिबत्यनेन तत्पात्रम्, पाति रक्षतीति पात्रो वा। यद्वा 'दाद्भिभ्यश्छन्दसि' उ० ४।१७० इति त्रन्। तानि पात्राणि, 'सुपां सुलु'गिति विभक्तेर्लुक्।

पायुः (३९)—'कृ वा पा०' उ० १।१ इति उण्। पाति रक्षतीति पायुः।

पावक (३७, ४३)—[३८]।

पाहि (३६, ३६, ३६, ३६)—[१८]।

पुरुस्पृहम् (४३)—पुरून् [पुरुतमम् ३८] बहून् स्पृहयति तं 'स्पृह' ईप्सायाम् चु० प० + क्विप् तम्।

प्रथमानि (४४)—'प्रथेरमच्' उ० ५।६८ प्रथते प्रख्यातो भवतीति प्रथमं तानि।

प्र प्र शंसिषम् (३५)—'प्रसमुपोदः पादपूरणे' ८।१।६ इति द्वित्वं पादपूरणार्थकम्। 'शंसु' स्तुतौ भ्वा० प० से० शंसति, लुंङि व्यत्ययेन अलोपः।

प्रे यन्तु (४३)—प्र + इण् लोट् 'इणो यण्' ६।४।८१ अजादौ प्रत्यये परे।

प्रियम् (३५)—[१८]।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रियासः (३८)—जसोऽसुक्।

भरद्वाजे (३७)—'भृञ्' भरणे भ्वा० उ० अनि० भरति, ते, + शतृ: भरन् धारको वाजोऽस्य, तस्मिन्।

मघवानः (३८)—'मंहि' वृद्धौ भ्वा० आ० से० मंहते, चु० मंहयति, ते, आभ्यां 'घजर्थे कविधानम्' वा० ३।३।५८ इति क:। पृषोदरादित्वात् ह्रस्य घ:। मघं धनम्। 'तदस्यास्त्यस्मिन्०' ५।२।९४ इति मतुप्। मो व:। मघवानो धनवन्त: १मा बहु व०।

मधी: (४४)—मनधातो: [मन: १द] 'फलिपाटि०' उ० १।१८ इति उप्रत्ययो धादेश्च। मधुमतस्य।

मन्द्र: (४४)—'मद' तृप्तियोगे चु० उ० मदयति, + रक् 'स्फायि तञ्चि०' उ० २।१३ इति। मदयति तृप्तिं करोतीति मन्द्र: १मा १व०।

महान् (३९)—[३द]।

मित्रम् (३५)—[१द]।

य: (४३)—१मा १व० पुंसि।

यज्ञा यज्ञा (३५)—वीप्सायां द्वित्वम्। विभक्तेर्डादेश:।

यन्तार: (३८)—इण् + शतृ = यन्ता, ते।

यविष्ठ (३७)—यौति मिश्रयत्यमिश्रयति वा 'कनिन् युवृषि०' उ० १।१५६ इति कनिन्। युवा। अयमेषामतिशयेन युवा 'अतिशायने०' ५।३।५५ इतीष्ठन्। 'स्थूलदूरयुव०' ६।४।१५६ इति यणादिलोपगुणौ। सं० १व।

ये (३८)—[३द]।

रघस: (३९)—रघतेर्याङुलकादसुन्। रघ्यते यस्मात्तद्रघ:। ६ष्ठी १व०।

रथी: (४१)—रथोऽस्यास्तीति इ: (छन्दसीवनिपौ च वक्तव्यौ वा० ५।२।१२२) १मा १व०।

रथिम् (४३)—[२द]।

राध: (४०)—'राध' संसिद्धौ स्वा० प० अनि० अस्मादसुन्। राध्नोति कार्याणीति राधो धनम्। २या १व०।

राधांसि (४१)—२या बहु व०।

राय: (४१)—'रा' दाने धातो: 'राते र्डे:, उ० २।६६ रायते इति रा: धनम्। ६ष्ठी १व०।

राखा (४३)—'रा' धातो: व्यत्ययेनात्मनेपदम्, लोट् मध्यम पु० १व० 'द्व्याचोऽतस्तिङ:' ६।३।१३५ इति दीर्घ:।

रेवत् (३७)—रा: शब्दात् 'रयेर्मतौ बहुलम्' वा० ६।१।३४ रयि शब्दस्य मतौ परतः सम्प्रसारणं स्याच्छन्दसि बहुलम् 'रयि + मतु = र इ + मतु = रे ('वाच्छन्दसि' ६।१।१०६) + मत् = रे वत् ('छन्दसीर:' ८।२।१५ इवर्णान्तात् रेफान्ताच्च परस्य मतो र्मस्य व: स्यात्) विभक्तेर्लुक् (रेवान्) १मा।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वः (३५)—।

वयम् (३५)—।

वयोधसम् (४३)—'वय' गतौ भ्वा० आ० से० वयते, 'वी' गतिव्याप्तिप्रजनकान्त्यसनखादनेषु वेति, 'अज' गतौ अजति, एभ्योऽसुन्। वयांसि वर्धयतीति वयोधस् क्विप्। तम्।

वसु (४४)—वस्ते आच्छादयति दुःखं येन, 'वसु स्रंसु०' उ० १।१० इति उः। विभक्तेर्लुक्।

वसो (३६, ४१)—पुंसि सम्बुद्धौ।

विदाः (४१)—'विद्लृ'लाभे धातोरन्तर्भावितण्यर्थाल्लोटि सिपि अडागमः, तुदादित्वाच्छः 'शे मुचादीनाम्' ७।१।५९ इति नुम् न भवति अनित्यमागमशासनमिति वचनेन तस्यानित्यत्वात्, 'इतश्चलोप०' ३।४।९७ इतीकारलोपः।

विप्रासः (४२)—'वप' बीजसन्ताने भ्वा० उ० अनि० वपति, ते, 'ऋज्रेन्द्राग्र०' उ० २।२८ इति रन् प्रत्यये इत्वं गुणाभावश्च। यद्वा 'विप' इति सङ्घात नाम, सोऽस्यास्तीति रो मत्वर्थीयः, पृषोदरादित्वान्नञ्त्वाभावः। यद्वा वि+'प्रा' पूरणे अ० प० अनि०+क्वः 'आतो लोप इटि च' ६।४।६४ ॥ जसोऽसुक् ॥

विवस्वत् (४०)—[१द]।

विश्पतिः (३९)—[३द] १मा।

विश्वा (४४)—विभक्ते र्लुक्।

वृहद्भिः (३७)—'वर्तमानेपृषद्बृहन्महत्० उ०·२।८४ इत्यतिप्रत्ययान्तो निपातः। वर्हति वर्धतेऽसौ बृहन्महदर्थे। ३या बहु व०।

वेधसः (४२)—वि+धा+'विधाञो वेध च' उ० ४।२२५ इत्यसि विधाञो वेधादेशः। विदधाति सर्वमिति वेधास्ते १मा बहु व०।

शंस्यम् (४३)—शंस [प्रशंसिषम्] धातोर्यत्। १मा।

शुक्रेण (३७)—[शुक्रः १द] ३या १व०।

शोचिषा (३७)—[३द]।

सन्तु (३८)—[असि १द] अस धातोर्लोटि प्रथम पु० बहु व०।

सप्रथाः (४२)—सर्वतः पृथुः—प्रथतेरसुन् सर्वत इत्यस्य सभावः। १मा।

समिधान (४२)—सम्+इन्धी+शानच्, सं० १व०।

समिधानः (३७)—१मा १व०।

सुनीती (४३)—सु+'णीञ्' प्रापणे+क्तिन् 'सुपां सुलुक्'गित्यस्योपरि 'इयाडियाजीकाराणामुपसंख्यानम्' वा० इति ईकारादेशः। सुनीत्या।

सुयज्ञतरम् (४३)—सु+यज्ञः ('अशेर्देवने युट् च' ४।१९१ इति अश् धातोरसुन् प्रकृतेर्युडागमश्च)+तरप् २या १व०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सूरयः (३८)—'षूङ्' प्राणिप्रसवे दि० आ० से० अस्मात् 'सूङः क्रिः' उ० ४।६४ इति क्रिः। सूते इति सूरिस्ते।

स्तीमा (४४)—[१द] विभक्तेर्लुक्।

स्वाहुत (३८)सु+आ+हु+क्तः, सं० १व०।

हीता (४४)—[१द]।

इति चतुर्थी दशतिश्चतुर्थखण्डश्च।

प्रथमम् (आग्नेयं) पर्व। प्रथमोऽध्यायः। प्रथमः प्रपाठकः। पञ्चमः खण्डः। पञ्चमी दशतिः।

अथ प्रथमा।

वामदेव ऋषिः। चत्वारि सामानि, द्वे अग्नेः स्वभूते आग्नेये, द्वे च गोतमस्य सम्बन्धिनो मनाज्ये (अग्नेराग्नेये द्वे गोतमस्य मनाज्ये द्वे। आ० ब्रा०) बृहती। अग्निः। विनियोगस्तु प्रातरनुवाके आश्विनशस्त्रे।

३ १ २ ३ १र २र ३ १र २र ३ १ २ ३ १र २र
एना वो अग्निं नमसोर्जो नपातमाहुवे। प्रियं चेतिष्ठ-
३ १ २ ३ १र १र ३ २ ३ १ २
मरतिꣳस्वध्वरं विश्वस्य दूत मम्रृतम्॥ ४५॥ (क)

पदपाठः। एना ३। वः ४। अग्निम् २। नमसा ३। ऊर्ज्जः ६। नपातम् २। आहुवे क्रि०। प्रियम् २। चेतिष्ठम् २। अरतिम् २। स्वध्वरम् २। विश्वस्य ६। दूतम् २। अम्रृतम् २।

(क) ऋ० ५।२।२१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अन्वयः। [हे मनुष्याः!] ऊर्ज्जः नपातं प्रियं चेतिष्ठम् अरतिं स्वध्वरं विश्वस्य दूतम् अमृतम् अग्निम् एना नमसा वः (=युष्मदर्थम्) आहुवे।

आधियाज्ञिकम्। हे मनुष्याः! 'ऊर्ज्जः' बलस्य 'नपातं' पुत्रं, बलेन हि अरणिकाष्ठसकाशादग्निरुत्पाद्यतेऽतस्तस्य पुत्रत्वमिति 'प्रियं' 'चेतिष्ठम्' अतिशयेन प्रज्ञापकम् 'अरतिं' सर्वत्र गन्तारं 'स्वध्वरं' शोभनयज्ञं 'विश्वस्य' 'दूतं' सर्वस्य दौत्यकार्ये विनियुक्तम् 'अमृतम्' अमरणधर्म्माणम् 'अग्निं' 'एना' एतेन 'नमसा' अन्नेन स्तुत्या वा 'वः' युष्मदर्थम् 'आहुवे' आह्वयामि अहमृत्विगिति।

आध्यात्मिकम्। हे मनुष्याः! 'ऊर्ज्जः' आत्मबलस्य 'नपातं' न पातयितारं, रक्षकं 'प्रियं' 'चेतिष्ठम्' अतिशयेन ज्ञातारम् 'अरतिं' स्वामिनं 'स्वध्वरं' शोभनयज्ञं 'विश्वस्य' 'दूतं' सर्वस्य दुःखापहारिणं, कर्म्मफलदातारं वा 'अमृतं' विनाशरहितम् 'अग्निं' परमात्मानम् 'एना' 'नमसा' एतया स्तुत्या 'वः' युष्मदर्थम् 'आहुवे' आह्वयामि अहमुपासक इति।

निरुक्तम्। नपादित्यपत्यनाम ॥ ३।१।३ ॥ नपादित्यनन्तरायाः प्रजायाः [पौत्राख्यस्य] नामधेयं निर्णततमा भवति ॥ ८।६ १ ॥ चेत इति प्रज्ञानाम ॥ ३।१३।१७ ॥

अथ द्वितीया।

भर्ग ऋषिः। दैवराजं साम, देवराज ऋषिश्च (दैवराजश्च। आ० ब्रा०) बृहती। अग्निः। विनियोगस्तु प्रातरनुवाके आश्विनशस्त्रे।

२ ३ १ २ ३ २ ३ २ ३ १ २ १ २ ३ १
शेषे वनेषु मातृषु सं त्वा मर्त्तास इन्धते। अतन्द्रो हव्यं
२ ३ २ ३ २उ ३ १ २
वहसि हविष्कृत आदिद्देवेषु राजसि ॥ ४६ ॥ (क)

(क) ऋ० ६।४।३४ ॥ 'मातरः' 'हव्या'।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पदपाठः। शेषे क्रि०। वनेषु ७। मातृषु ७। सम् अ०। त्वा २। मर्त्तास १। इन्धते क्रि०। अतन्द्रः १। हव्यम् २। वहसि क्रि०। हविष्कृतः ६। आत् अ०। इत् अ०। देवेषु ७। राजसि क्रि०।

अन्वयः। [हे अग्ने!] [त्वं] वनेषु मातृषु शेषे, [तत्रस्थितं] त्वा मर्त्तास समिन्धते; [एवं समिद्धः त्वम्] अतन्द्रः हविष्कृतः हव्यं वहसि, आत् इत् (=अनन्तरमेव) देवेषु राजसि।

आधियाज्ञिकम्। हे अग्ने! त्वं 'मातृषु' मातृभूतेषु 'वनेषु' काष्ठेषु, अरणिद्वयेषु 'शेषे' निवससि, तत्रस्थितं 'त्वा' त्वां 'मर्त्तासः' मनुष्या ऋत्विज इति 'समिन्धते' मन्थनेनोत्पाद्य सम्यक् प्रदीपयन्ति; एवं समिद्धस्त्वम् 'अतन्द्रः' अनलसः 'हविष्कृतः' यजमानस्य 'हव्यं' हवनीयं द्रव्यं 'वहसि' देवेभ्यः प्रापयसि, 'आत इत्' अनन्तरमेव यज्ञकर्त्तॄणां हव्यद्रव्याणि नीत्वा 'देवेषु' त्रयस्त्रिंशत्सु 'राजसि' विराजसे।

आध्यात्मिकम्। हे अग्ने! परमात्मन्! त्वं 'वनेषु' वननीयेषु सम्भजनीयेषु 'मातृषु' मानकर्त्तृषु उपासकेषु तेषां साक्षात्काररूपोत्पत्तिभूमिषु हृद्देशेषु वा व्याप्य 'शेषे' निवससि, वर्त्तसे तत्रस्थितं 'त्वा' त्वां 'मर्त्तासः' मननशीला योगिनः 'समिन्धते' सम्यग्ध्यायन्ति; एवं समिद्धस्त्वम् 'अतन्द्रः' निरलसः सदैकरसत्वादिति 'हविष्कृतः' उपासकस्य 'हव्यं' दातव्यं कर्मफलं 'वहसि' तेभ्यः प्रापयसि, 'आत् इत्' अनन्तरमेव 'देवेषु' प्रकाशगुणेषु 'राजसि' विराजसे।

निरुक्तम्। वनं वनोतेः (वनोतिः कान्तिकर्म्मा) ॥ ८।३।१ ॥

अथ तृतीया।

सौभरि ऋषिः। एकं साम कुशिकपुत्रस्य गाथिनः (गाथिनश्च कौशिकस्य साम। आ० ब्रा०) बृहती। अग्निः। विनियोगस्तु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(विन्दते गातुं प्रतितिष्ठत्येतेन तुष्टुवानः । ता० म० ब्रा० ८।५।१०) एतेन साम्ना तुष्टुवानो गातुं लौकिकवैदिकविधेयं मार्गं विन्दते। यद्वा (प्रज्वलितेऽदर्शि गात्विति । लाट्या० श्रौतसू०) प्रज्वलितेऽग्नौ एतत् साम गायेत।

१ २ ३ १ २ ३ १ २ ३ १ २ ३ २ २ ३ २
अदर्शि गातुवित्तमो यस्मिन् व्रतान्यादधुः। उपोषु-
३ १र २र ३ १ २ ३ १ २ ३ १ २
जात मार्य्यस्य वर्द्धन मग्निं नक्षन्तु नो गिरः ॥४७॥ (क)

पदपाठः । अदर्शि क्रि० । गातुवित्तमः १ । यस्मिन् ७ । व्रतानि २ । आदधुः क्रि० । उप अ० । उ अ० । सुजातम् २ । आर्य्यस्य ६ । वर्द्धनम् २ । अग्निम् २ । नक्षन्तु क्रि० । नः ६ । गिरः १ ।

अन्वयः । यस्मिन् व्रतानि आदधुः गातुवित्तमः [सः अग्निः] अदर्शि । नः गिरः सुजातम् आर्य्यस्य वर्द्धनम् अग्निम् उपोनक्षन्तु ।

भाष्यम् । 'यस्मिन्' अग्नौ, परमात्मनि वा 'व्रतानि' कर्म्माणि यज्ञादीनि 'आदधुः' आहितवन्तः ऋत्विजः, समर्पितवन्तो वा उपासकाः, 'गातुवित्तमः' अतिशयेन सन्मार्गाणां ज्ञाता सोऽग्निरीश्वरो वा 'अदर्शि' प्रादुरभूत्, सर्वत्र विराजते। 'नः' अस्माकं 'गिरः' स्तुतयः 'सुजातं' सम्यक् प्रादुर्भूतं, सुप्रसिद्धं वा 'आर्य्यस्य' 'वर्द्धनं' सद्भावयुक्तस्य पुरुषस्य वर्द्धकम् 'अग्निं' भौतिकं परमात्मानं वा 'उपोनक्षन्तु' उपगच्छन्तु ।

निरुक्तम् । गातुं गमनम् ॥ ४।२१।२ ॥ गातुरिति पृथिवीनाम ॥ २।५।२ ॥ (ख) व्रतमिति कर्मनाम वृणोतीति सतः ॥ २।

(क) ऋ० ६।७।१३.॥ 'नक्षन्त'

(ख) गातुवित्तमः—पृथिवीस्थमार्गाणामतिशयेन ज्ञाता ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१३।८॥ नक्षतिर्गतिकर्मा॥ ३।८।१४॥ नक्षतिर्व्याप्तिकर्मा॥ ३।१०।२॥ (क)

अथ चतुर्थी।

विवस्वत्पुत्रो मनुर्ऋषिः। द्वे सामनी बार्हदुक्थे बृहदुक्थ ऋषिः (बार्हदुक्थे द्वे। आ० ब्रा०) बृहती। विश्वेदेवाः। बहुविनियोगः।

३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २
अग्निरुक्थे पुरोहितो ग्रावाणो बर्हिरध्वरे। ऋचा यामि

३ २ ३ २ ३ १ २
मरुतो ब्रह्मणस्पते देवा अवो वरेण्यम्॥ ४८॥ (ख)

पदपाठः। अग्निः १। उक्थे ७। पुरः अ०। हितः १। ग्रावाणः १। बर्हिः १। अध्वरे ७। ऋचा ३। यामि क्रि०। मरुतः १। ब्रह्मणस्पते सं०। देवाः १। अवः २। वरेण्यम् २।

अन्वयः। उक्थे अध्वरे अग्निः पुरः हितः, ग्रावाणः [पुरोहिताः], बर्हिः [पुरोहितं], मरुतः देवाः [च] [पुरोहिताः] [हे] ब्रह्मणस्पते! ऋचा वरेण्यम् अवः [त्वां] यामि (=याचे)।

आधियाज्ञिकम्। 'उक्थे' स्तोत्रशस्त्रात्मके 'अध्वरे' हिंसारहिते यज्ञे 'अग्निः' यज्ञाग्निः 'पुरः' पुरत उत्तरवेद्यां 'हितः' ऋत्विग्भिः स्थापितः, 'ग्रावाणः' सोमाभिषवार्थं प्रस्तराः पुरोहिताः, 'बर्हिः' दर्भासनं पुरोहितं, 'मरुतः' ऋत्विजः 'देवाः' वस्वादयो (ग)

(क) उपो गच्छन्तु=व्याप्नुवन्तु।

(ख) ऋ० ६।२।३१॥ 'ब्रह्मणस्पतिम्' 'देवान्'।

(ग) स होवाच महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति। कतमे ते त्रयस्त्रिंशत्त्रयस्त्रिंशदित्यष्टौ वसव एकादश रुद्रा द्वादशादित्या त एकत्रिंशत्त्रयस्त्रिंशदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशत्त्रयस्त्रिंशाविति॥३॥ कतमे वसव इति। अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसव एतेषु हीदꣳ सर्वं वसु हितमेते हीदꣳ सर्वं वासयन्ते तद्यदिदꣳ सर्वं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देवाः पुरोहिताः (…आ त्वा वसवो रुद्रा आदित्याः सदन्तु। यजुः २।५) अग्निहोत्रेण सर्वे देवा स्तृप्यन्त इति, हे 'ब्रह्मणस्पते' अन्नपते अग्ने! 'ऋचा' सूक्तरूपया वाचा 'वरेण्यं' वरणीयम् 'अवः' रक्षणं त्वां 'यामि' याचे॥ अग्निहोत्रकाले सर्वान् देवानुद्दिश्य योऽग्नौ द्रव्याणां प्रक्षेपः क्रियते स तान् देवान् प्राप्नोति, ते तत्पृथग्भूतं द्रव्यं रक्षित्वा पुनः पृथिवीं प्रति विमुञ्चन्ति येन दिव्या ओषधादयः पदार्थाः जायन्ते, सुखं च भवत्यतो वरणीयं रक्षणं याचे इति मन्त्रे सुष्ठूक्तम्।

आध्यात्मिकम्। 'उक्थे' प्रशंसनीये वाङ्मये 'अध्वरे' ज्ञानयज्ञे 'अग्निः' ज्ञानाग्निरूपः परमात्मा 'पुरः हितः' पुरतः स्थापितस्तस्य सर्वव्यापकत्वात्, 'ग्रावाणः' गृणन्ति उच्चारयन्ति एभिस्ते, शब्दोच्चारणकरणानि कण्ठताल्वादीनि [स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यः स शब्दः। पा० शि०] सोमाभिषवार्थं प्रस्तरा इव परमानन्दाभिषवार्थं पुरोहितानि, 'बर्हिः' बृंहति वर्द्धते ज्ञानं यत्र तत् हृदयं दर्भासनमिव पुरोहितं, 'मरुतः' पञ्च प्राणाः ऋत्विज इव 'देवाः' दशेन्द्रियाणि देवता इव पुरोहितानि। हे 'ब्रह्मणस्पते' वेदपते परमात्मन्! 'ऋचा' सूक्तरूपया वाचा 'वरेण्यं' वरणीयम् 'अवः' रक्षणं त्वां 'यामि' याचे।

अस्मिन् विषये ऐतरेयारण्यके, आर० २। अ० १। खं० २ एवमुक्तम्, 'पुरुष एवोक्थमयमेव महान् प्रजापतिरहमुक्थमस्मीति विद्यात्' शिरः पाण्यादिमान्देहः पुरुषः, उत्कर्षहेतुत्वात्तस्योक्थत्वम्॥

निरुक्तम्। ग्रावाणो हन्तेर्वा गृणातेर्वा गृह्णातेर्वा॥

वासयन्ते तस्माद्वसव इति॥ ४॥ कतमे 'रुद्रा' इति दशेमे पुरुषे प्राणा आत्मैकादशस्ते यदास्मान्मर्त्याच्छरीरादुत्क्रामन्त्यथ रोदयन्ति तद्यद्रोदयन्ति तस्माद्रुद्रा इति॥५॥ कतम आदित्या इति, द्वादश मासाः संवत्सरस्यैत आदित्या एते ह्येदꣳ सर्वमाददाना यन्ति तस्मादादित्या इति॥ ६॥ कतम इन्द्रः कतमः प्रजापतिरिति। स्तनयित्नुरेवेन्द्रो यज्ञः प्रजापतिरिति, कतमः स्तनयित्नुरित्यशनिरिति, कतमो यज्ञ इति पशव इति॥ श० ब्रा० का० १४। ब्रा० ७।६।२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

९।८।२ ॥ ऋगिति वाङ्नामसु ॥ २।२३।१ ॥ ब्रह्मणस्पतिर्ब्रह्मणः पाता वा पालयिता वा (ब्रह्मेत्यन्ननाम ॥ ३।९।४ ॥ धननाम ॥ ३।९।९ ॥ ब्रह्माणि कर्म्माणि ॥ १२।३४।१ ॥) १०।१२।३ ॥ अथापि वर्णलोपो भवति तत्त्वा यामीति (यामि याचामि छान्दसः) ॥ २।१।१०॥ यामि याच्ञाकर्म्मसु ॥३।१९।११॥ वरेण्यो वरणीयः ॥१२।१३।१॥ मरुत इति ऋत्विङ्नाम ॥ ३।१९।७ ॥

अथ पञ्चमी ।

आङ्गिरसः सुदीतिः पुरुमीढो वा उभौ वा। एकं पौरुमीढं साम, पुरुमीढ ऋषिः (पौरुमीढश्च। आ० ब्रा०) बृहती। अग्निः। विनियोगस्तु दशमदिने प्रातः सवनेऽच्छावाकूपे।

३ र २ ३ १ २ ३ १ २ ३ १ २ ३ २
अग्निमीडिष्वावसे गाथाभिः शीरशोचिषम्। अग्निꣳ
३ १ २ ३ २उ ३ १ २ ३ १ २ ३ १
राये पुरुमीढ! श्रुतन्नरोऽग्निः सुदीतये छर्दिः ॥४९॥ (क)

पदपाठः। अग्निम् २। ईडिष्व क्रि०। अवसे अ०। गाथाभिः ३। शीरशोचिषम् २। अग्निम् २। राये ४। पुरुमीढ सं०। श्रुतम् २। नरः सं०। अग्निः १। सुदीतये ४। छर्दिः १।

अन्वयः। [हे] पुरुमीढ! [त्वम्] अवसे शीरशोचिषम् अग्निं गाथाभिः ईड़िष्व, अपि च [हे] नरः! राये श्रुतम् अग्निम् [ईड़िध्वम्] [यतः] अग्निः सुदीतये छर्दिः।

भाष्यम्। हे 'पुरुमीढ' सुखं बहु सेक्तुमिच्छन्मनुष्य! त्वम् 'अवसे' रक्षणाय 'शीरशोचिषं' शयनस्वभावरोचिषं सर्वस्मिन् भूतग्रामेऽन्तर्लीनतेजसं, सर्वव्यापिनं वा 'अग्निं' यज्ञाग्निं परमात्मानं वा 'गाथाभिः' स्तुतिरूपाभिर्वाग्भिः 'ईड़िष्व' स्तुहि, अपि च हे 'नरः'

(क) ऋ० ६।५।१३ ॥ 'अग्निम्'।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नेतारः 'रायै' धनाय 'श्रुतं' प्रसिद्धं, श्रुतिसिद्धं वा 'अग्निं' पूर्वोक्तमीड़िध्वम्, यतः सः 'अग्निः' भौतिकः परमेश्वरो वा 'सुदीतये' शोभनदानाय उपासकाय छर्दिः गृहं, तद्दुःखनिवारकः अस्ति ।

निरुक्तम् । गाथेति वाङ्नाम ॥ २।२३।१ ॥ शीरमनुशायिनमिति वाशिनमिति वा ॥४।१४।३ ॥ छर्दिरिति गृह नाम ॥३।१३।८॥

अथ षष्ठी ।

प्रस्कण्व ऋषिः । कार्णश्रवसं साम कर्णश्रवा नाम ऋषिः, यद्वा प्रास्कण्वं साम प्रस्कण्वेन दृष्टम् (कार्णश्रवसं च प्रास्कण्वं वा । आ० ब्रा०) बृहती । अग्निः । विनियोगस्तु प्रातरनुवाके आश्विनशस्त्रे ।

३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २
श्रुधि श्रुत्कर्ण वह्निभिर्देवै रग्ने सयावभिः । आ सीदतु
३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २
बर्हिषि मित्रो अर्यमा प्रातर्यावभिरध्वरे ॥ ५० ॥ (क)

पदपाठः । श्रुधि क्रि० । श्रुत्कर्ण सं० । वह्निभिः ३ । देवैः ३ । अग्ने सं० । सयावभिः ३ । आसीदतु क्रि० । बर्हिषि ७ । मित्रः १ । अर्यमा १ । प्रातर्यावभिः ३ । अध्वरे ७ ।

अन्वयः । [हे] श्रुत्कर्ण अग्ने ! श्रुधि, मित्रः अर्यमा प्रातर्यावभिः सयावभिः वह्निभिः देवैः [सह] अध्वरे बर्हिषि आसीदतु ।

आधियाज्ञिकम् । हे 'श्रुत्कर्ण' श्रवणसमर्थ 'अग्ने' ! 'श्रुधि' अस्मत्प्रार्थनां शृणु, का प्रार्थना ? 'मित्रः' वायुः [मित्रो वै प्राणः । श० ब्रा०] 'अर्यमा' ऋच्छति नियच्छति आकर्षणेन पृथिव्यादीन्स सूर्यः 'प्रातर्यावभिः' प्रातर्यज्ञाहुतिभिराङ्गते दैवयजनं गच्छद्भि वेस्वादिभि स्त्रयस्त्रिंशद्देवैः [...आ त्वा वसवो रुद्रा आदित्याः

(क) ऋ० १।३।२०॥ 'आसीदन्तु' 'प्रातर्यावाणो अध्वरम्' ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सदन्तु। य० २।५] 'सयावभिः' तैः सह समानगतिभिः 'वह्निभिः' हविर्वहनशीलैः ज्वालाभिः सूर्यकिरणैः वायुभिः वा 'देवैः' सह 'अध्वरे' यज्ञे 'बर्हिषि' तदीयवेद्याम् 'आसीदतु' आहूतः सन्नुपविशतु, यज्ञमवस्थापयतु चेत्यस्मत्प्रार्थना।

आध्यात्मिकम्। हे 'शुक्रर्ण' श्रवणसमर्थ 'अग्ने' परमात्मन् 'शुधि' अस्मत्प्रार्थनां शृणु, का प्रार्थना? 'मित्रः' प्राणवायुः 'अर्यमा' ऋच्छत्याकर्षतीत्यपानः 'प्रातर्यावभिः' 'प्रातर्ध्यानपरायणैः 'सयावभिः' प्राणापानयोः सहवर्त्तिभिः 'वह्निभिः' प्रकाशप्रदैः 'देवैः दशेन्द्रियैः सह 'अध्वरे' ज्ञानयज्ञे उपासनायामिति 'बर्हिषि' बृंहति वर्धते ज्ञानं यत्र तस्मिन् हृदयदेशे 'आसीदतु' सम्यक् स्थिरो भवतु भवत्कृपयेत्यस्मत्प्रार्थना। उपासनाकाले प्राणादय इन्द्रियादयश्च यदा स्थिरा भवेयुस्तदैषोपासना सम्यग्भवितुमर्हति अतस्तेषां स्थैर्यमनेन प्रार्थ्यते। प्राणापानयोः स्थैर्येण प्राणायामेनेति सर्वेन्द्रियाणां स्थैर्यं सम्पाद्यते। [ततः क्षीयते प्रकाशावरणम्। योग० १।५४ प्राणायामानभ्यस्यतोऽस्य योगिनः क्षीयते विवेकज्ञानावरणीयं कर्म्म। तथा-चोक्तम्, 'तपो न परं प्राणायामात्ततो विशुद्धिर्मलानां दीप्तिश्च ज्ञानस्येति। पञ्चशिखा०]।

निरुक्तम्। वह्निर्वोढा ॥ ३।४।१ ॥ अर्य्यमादित्योऽरीन्नियच्छति ॥ ११।२३।१ ॥

अथ सप्तमी।

सौभरिर्ऋषिः। एकं दैवोदासं साम दिवोदास ऋषिश्च (दैवोदासश्च। आ० ब्रा०) बृहती। अग्निः।

२र २र ३ २ ३२उ ३ २ ३ १ २ १ २ ३ १ २
प्र देवोदासो अग्निर्देव इन्द्रो न मज्मना। अनु मातरं
२र ३ १र २र ३ १ २
पृथिवीं वि वा वृते तस्थौ नाकस्य शर्म्मणि ॥५१॥ (क)

(क) ऋ० ६।७।१३॥ 'अग्निर्देवां अच्छा न मज्मना' 'नाकस्य सानवि 'वृहते'।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पदपाठः । प्र अ० । देवोदासः १ । अग्निः १ । देवः १ । इन्द्रः १ । न अ० । मज्मना ३ । अनु अ० । मातरम् २ । पृथिवीम् २ । वि वा हृते क्रि० । तस्थौ क्रि० । नाकस्य ६ । शर्म्मणि ७ ।

अन्वयः । देवः देवोदासः अग्निः मज्मना इन्द्रः न मातरं पृथिवीम् अनु प्र-वि-वाहृते, नाकस्य शर्म्मणि तस्थौ च ।

भाष्यम् । 'देवः' द्योतमानः 'देवोदासः' दिवः प्रकाशस्य दासो दाता, स एव 'अग्निः' भौतिकः परमात्मा वा 'मज्मना' बलेन, स्वसामर्थ्येन हि 'इन्द्रः' 'न' सूर्य्य इव 'मातरं' 'पृथिवीं' स्वप्रादुर्भाव-भूमिं पृथिवीं, सर्वाधारभूतां पृथिवीं वा 'अनु' समन्ततः 'प्र-वि-वाहृते' प्रकृष्टतया विस्तीर्णो भवति, व्याप्य तिष्ठतीति, 'नाकस्य' द्युलोकस्य सुखस्य वा 'शर्म्मणि' गृहे, सूर्य्यरूपे स्वस्वरूपे वा 'तस्थौ' तिष्ठति च ।

निरुक्तम् । इन्द्र इरां दृणातीति वा ॥ इरां ददातीति वा ॥ इरां दधातीति वा ॥ १०।८।२,३, ४ ॥ मज्मनेति बलनाम ॥ ३।८।७॥ नाक इति दिवो नाम । कमिति सुखनाम, तत्प्रतिषिद्धं प्रतिषिध्येत । 'न वा अमुं लोकं जग्मुषे किं च नाकम् ।' न वा अमुं लोकं गतवते किं च नाऽसुखं, पुण्यकृतो ह्येव तत्र गच्छन्ति ॥ २।१४।३ ॥ शर्मेति गृहनाम ॥ ३।१३।८ ॥

अथाष्टमी ।

मेधातिथिर्ऋषिः मेध्यातिथिर्वा । एकं सौक्रतवं साम, सुक्रतुर्ऋषिश्च । बृहती । इन्द्रः । विनियोगस्तु महाव्रतयागे निष्केवल्यशंसने ।

२ ३ १र २र ३ १ २ ३ १ २ ३ १र २र ३ १
अध ज्मो अधवा दिवो बृहतो रोचनादधि । अया
२ क २र ३ २उ ३ १ २
वर्द्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण ॥५२॥ (क)

(क) ऋ० ५।७।१३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पदपाठः। अध अ०। ज्मः ५। अधवा अ०। दिवः ५। बृहतः ५। रोचनात् ५। अधि अ०। अया ३। वर्द्धस्व क्रि०। तन्वा ३। गिरा ३। ममा ३। जाता २। सुक्रतो सं०। पृण क्रि०।

अन्वयः। हे सुक्रतो [इन्द्र!] अध ज्मः अधि अधवा दिवः बृहतः रोचनात् [च आगत्य] अया तन्वा ममा गिरा वर्द्धस्व, जाता (=जातान्) पृण [च]।

भाष्यम्। हे 'सुक्रतो' शोभनकर्म्मवन् इन्द्र परमात्मन् वा 'अध' अधुना 'ज्मः' ज्मन्ति गच्छन्त्यस्यामिति ज्मा पृथिवी तस्याः 'अधि' उपरिष्टात् 'अधवा' अपि वा 'दिवः' द्युलोकात् 'बृहतः' महतः 'रोचनात्' प्रकाशमानात् च सूर्य्याद्विद्युतो वा आगत्य 'अया' अनया 'तन्वा' विस्तृतया 'ममा' मदीयया 'गिरा' स्तुतिरूपया वाचा 'वर्द्धस्व' वर्द्धितो भव, स्तूयमाना हि देवा वर्धन्ते इति, प्रसीदेति वा 'जाता' जातान् उत्पन्नान्मनोरथान् अस्मदीयान् जनान् वा अभिलषित-फलैरिति 'पृण' आपूरय।

निरुक्तम्। ज्मा पृथिवी नाम ॥ २।५।२ ॥ रोचते इति ज्वलतिकर्म्मा ॥ २।२८।३ ॥

अथ नवमी।

विश्वामित्र ऋषिः। द्वे सामनी काण्वे, कण्व ऋषिः (काण्वे द्वे। आ० ब्रा०) बृहती। अग्निः। विनियोगस्तु प्रातरनुवाके आश्विन शस्त्रे च।

१ २ ३ २उ ३ १र ३ २ १र २र
कायमानो वना त्वं यन्मातॄरजगन्नपः। न तत्ते अग्ने
३ १ २ ३ १ २ ३ २ ३ २ ३ १ २
प्रमृषे निवर्त्तनं यद्दूरे सन्निहाभुवः ॥ ५३ ॥ (क)

(क) ऋ० ३।१।५॥ 'आभव'।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पदपाठः। कायमानः १। वना २। त्वम् १। यत् अ०। मातृः २। अजगन् क्रि०। अपः २। न अ०। तत् अ०। ते ६। अग्ने सं०। प्रमृषे क्रि०। निवर्त्तनम् २। यत् अ०। दूरे ७। सन् १। इह अ०। आभुवः क्रि०।

अन्वयः। [हे] अग्ने! कायमानः [स्वां योनिमिति] यत् त्वं वना (=वनानि, दारूणि) मातृः अपः [च] अजगन् (=अगमः) [उपशाम्यन्निति], तत् (=तस्मात्) ते निवर्त्तनं (वर्त्म) न प्रमृषे (=प्रमृज्यते, लुप्यते), [कथं ?] यत् (=यस्मात्) दूरे [अपि] सन् इह [पुनः] आभुवः (=भवसि) [अद्भ्यो वैद्युतात्मना, अरण्योर्मथ्यमान इति]।

आधियाज्ञिकम्। हे 'अग्ने'! 'कायमानः' चायमानः पश्यन्निति, अथवा कामयमानः स्वां योनिमिति 'यत्' 'त्वं' 'वना' वनानि, दारूणि, दारुभ्योऽग्निर्जायते तदेतत्प्रसिद्धमेव, 'मातृः' सर्वभूतनिर्माता 'अपः' जलं च, [आपो वा अग्नेर्योनिः] 'अजगन्' अगमः उपशाम्यन्निति, 'तत्' तस्मात् 'ते' तव 'निवर्त्तनं' वर्त्म 'न' 'प्रमृषे' प्रमृज्यते, लुप्यते, कथं गम्यते न लुप्यते मार्गः? 'यत्' यस्मात् 'दूरे' अपि 'सन्' 'इह' पुनः 'आभुवः' भवसि, अद्भ्यो वैद्युतात्मनाऽरण्योर्मथ्यमानो जायसे इति॥

आध्यात्मिकम्। हे 'अग्ने' शुभगुणप्रकाशक परमात्मन्! 'कायमानः' कामयमानः स्वां योनिमिति, कतमां? 'यत्' 'त्वं' 'वना' वननीयानि सम्भजनीयानि स्वाध्यायादियोगाङ्गानि [स्वाध्यायादिष्टदेवता सम्प्रयोगः योगद० २।४४] 'मातृः अपः' मातृभूतान् प्राणान् च [आपो वै प्राणाः। श० ब्रा० ३।६।३।४॥ साम प्राणं प्रपद्ये। य० ३६।१] प्राणभूतानि सामानि च, साम परमात्मनः प्राप्तिकारणम्, 'अजगन्' अगमः प्राप्तवानसि; 'तत्' 'ते' तव 'निवर्त्तनं' नितरां तत्रैव वर्त्तनं न 'प्रमृषे' प्रमृष्यते मृष्यते; 'यत्' 'दूरे' अपि 'सन्'

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अज्ञानतयैवं गम्यते न यथार्थतया ईश्वरस्य सर्वव्यापकत्वात् (क) 'इह' अस्माकं हृदि पुनः 'आभुवः' विराजस्व, ध्यानादिभिः प्रकाशितो भव।

निरुक्तम्। कायमानश्चायमानः कामयमान इति वा वनानि त्वं यन्मातृरपोऽगम उपशाम्यन्न तत्ते अग्ने प्रसृष्यते निवर्त्तनं दूरे यत्सन्निह भवसि जायमानः ॥ ४।१४।१ ॥

अथ दशमी।

कण्व ऋषिः। हे मानवे सामनी, मनुर्ऋषिः (मानवे हे। आ० ब्रा०) बृहती। अग्निः। विनियोगस्तु प्रातरनुवाके।

र २र ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २ ३
नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते। दीदेथ
१ २ ३ १ ३ १र २र ३ १ २ ३ १ २
कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः ॥५४॥(ख)

पदपाठः। नि अ०। त्वाम् २। अग्ने सं०। मनुः १। दधे क्रि०। ज्योतिः २। जनाय ४। शश्वते ४। दीदेथ क्रि०। कण्वे ७। ऋतजातः १। उक्षितः १। यम् २। नमस्यन्ति क्रि०। कृष्टयः १।

अन्वयः। [हे] अग्ने! मनुः ज्योतिः त्वां शश्वते जनाय निदधे; [त्वम्] ऋतजातः उक्षितः [सन्] कण्वे दीदेथ; यं [त्वां] कृष्टयः नमस्यन्ति।

भाष्यम्। हे 'अग्ने' यज्ञाग्ने! परमात्मन्! वा 'मनुः' मननशीलः ऋत्विगादिर्मुनिरनुष्ठितयोगाङ्ग इति वा 'ज्योतिः' सर्वस्य प्रकाशभूतं ज्योतीरूपं त्वां 'शश्वते' बहुविधाय 'जनाय' यजमानाय उपासकाय वा तदीप्सितफलप्राप्तये तद्यज्ञसम्पादनाय च 'निदधे' वेद्यां स्थापितवान्, तस्योपासकस्य अन्तरात्मनि उपदेशेन

(क) 'तद्दूरे तदन्तिके' य०, ४०।५॥ (ख) ऋ० १।३।११।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्थापितवान्, प्रकाशितवान्। त्वम् 'ऋतजातः' यज्ञार्थमुत्पन्नः सत्यज्ञानेन साक्षात्कृतो वा 'उक्षितः' हविर्भिस्तृप्तः, उपासनया प्रसन्नो वा महान् वा सन् 'कण्वे' मेधाविनि प्राप्तज्ञाने 'दीदेथ' दीप्तवानसि, तस्य मनसि स्वप्रकाशेन दीप्तो भवसीति, 'यं' तथाविधं त्वां 'क्षृष्टयः' सर्वे मनुष्याः गृहैश्वर्य्यमोक्षकामाः 'नमस्यन्ति' नमस्कुर्वन्ति, हविर्दानादिना तर्पयन्ति उपासते वा॥

निरुक्तम्। मनुर्मननात्॥ १२।३३।४॥ शश्वदिति बहुनाम॥ ३।१३।१॥ उक्षितो महन्नाम॥ ३।१३।५॥ कण्वो मेधाविनाम॥ ३।१९।२॥

अथ व्याकरणम्।

अग्निः (४८, ४९, ५१)—।

अग्निम् (४५, ४७, ४९, ४९)—।

अग्ने (५०, ५४)—।

अजगन् (५३)—'गमॢ' गतौ धातौ लुङि मध्यम पुरुषे सिपि 'बहुलं छन्दसि' २।४।७३ इति शपः श्लुः, हल्ङ्यादिना सिलोपः 'मोनोधातोः' ८।२।६४ इति नत्वम्।

अतन्द्रः (४६)—तन्द्रा—तत् राति, तत्पूर्वाद्रातेरातोनुपसर्गेकः, टाप्। तं द्राति वा, 'द्रा' कुत्सायां गतौ (पलायने) अ० प० अनि० धातोः तदो नान्तत्वं निपात्यते। यद्वा 'तन्द्रि' सौत्रो धातुः+कः+टाप्। नास्ति तन्द्रा यस्य सः। १मा १व०॥

अदर्शि (४७) दृश् लुङ् कर्मणि।

अध (५२)—न+ध+अच्=अधर+असि, रलोपः, अव्ययसंज्ञा।

अथवा (५२)—अथवा।

अधि (५२)—[१द] अव्ययम्।

अध्वरे (४८, ५०)—[३द] ७मी १व०।

अनु (५१)—अनप्राणने बाहुलकादुः। सामीप्यार्थेऽव्ययम्।

अपः (५३)—[३द] २या।

अप्रतम् (४५)—[४द] २या।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अया (५२)—अनयेत्यत्र छान्दसत्वादनादेशाभावः ।

अरतिम् (४५)—ऋच्छति गच्छतीति 'वहिवस्यर्त्तिभ्यश्चित्' उ० ४।६० इत्यतिः । यद्वा अर्यते इति 'अर्त्तेश्च' उ० ५।७ इत्यतिः । तम् २या १व० ।

अर्य्यमा (५०)—इयर्तीति अर्यः । 'अनुचन्' उ० १।१५९ इति अर्यपूर्वान्माङः कनिन्निपातितः । अर्यं स्वामिनं मिमीते मन्यते जानातीत्यर्यमा, आकारलोपः । १मा १व० ।

अवः (४८)—अव रक्षणादिषु भावेऽसुन् । २या ।

अवसे (४९)—अव + असे 'तुमर्थे से-सेन्-असे०' ३।४।९ इति ।

आत् (४६)—[२द] अव्ययम् ।

आदधुः (४७)—आ + धाधातो र्लिटि प्रथम पु० बहु० ।

आभुवः (५३)—आ + भू + लिट् सिप् अडागमः ।

आर्य्यस्य (४७)—अर्त्तुं योग्यः, अर्य्यते वा, 'ऋहलोर्ण्यत्' ३।१।१२४ इति ण्यत्, तस्य ।

आसीदतु (५०)—आ + षदलृधातोर्लोटि प्रथम पु० १व० ।

आहुवे (४५)—[२द] क्रिया ।

इत् (४६)—[२द] अव्ययम् ।

इन्द्रः (५१)—'इदि' परमैश्वर्ये, 'ऋजेन्द्रा०' उ० २।२८ इति रन् । इन्दति परमैश्वर्यवान् भवतीतीन्द्रः ।

इन्धते (४६)—इन्धी धातोर्लटि ।

इह (५३)—'इदमो हः' ५।३।११ इति सप्तम्यन्तादिहप्रत्ययः, 'इदमदश्' ५।३।३ तद्धितान्तत्वात्प्रातिपदिकत्वे 'सुपो धातुप्रातिपदिकयोः' २।४।७१ इति सप्तम्या लुक् 'तद्धितश्चासर्वविभक्तिः' १।१।३८ इत्यव्ययसंज्ञायाम् 'अव्ययादाप्सुपः' २।४।८२ इत्युत्तरस्याः सप्तम्या लुक् ।

ईड़िष्व (४९)—'ईड़' स्तुतौ अ० आ० से० ईड़े, धातोर्लोटि मध्यम पु० १व० ।

उ (४७)—[३द] अव्ययम् ।

उक्थे (४८)—वच परिभाषणे अ० प० धातोः 'पातृतुदिवचि०' उ० २।७ इति थक् । उच्यते परिभाष्यते यत्तदुक्थं तस्मिन् ।

उचितः (५४)—'उच सेचने' भ्वा० प० से० उचति, + क्तः । १मा ।

उप (४७)—[२द उप एनसि]

ऊर्जः (४५)—[ऊर्ज्जाम् ४द] ६ष्ठी १व० ।

ऋचा (४८)—'ऋच' स्तुतौ तु० प० से० 'क्विब्वचिप्रच्छि०' उ० २।५७ इति क्विप् । ऋचन्ति स्तुवन्ति यया सा ऋक् तया ॥

ऋतजातः (५४)—[ऋतं ४द] ऋतेन [जन + क्तः] जातः, ३या तत्पु० । १मा १व० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एना (४५)—छान्दसोऽन्वादेशेऽपि तादृशप्रयोगः, 'सुपां सुलुक्०' ७।१।३९ इति विभक्तेरा-कारादेशः।

कख्ये (५४)—'कण' शब्दे भ्वा० प०, 'कण' निमीलने चु० प०, आभ्याम् 'अशू०' उ० १।१५१। इति क्वन्। कणति स्तोत्रलक्षणं शब्दं करोति, कण्यते स्तूयते वा, निमीलयति परान् वा स्वतेजसा, तस्मिन्।

कायमानः (५३)—'चिञ्' चयने स्वा० उ०, स्यन्तः चायि+शानच् सुक्+शप्। 'छन्दस्युभयथा' ३।४।११७ इति आर्धधातुकत्वात् 'णेरनिटि' ६।४।५१ इति णेर्लोपः। व्यत्ययेन चस्य कः। १मा १व०। कमु कान्तौ 'कमेर्णिङ्' ३।१।३० लटः शानच्, मलोपश्छान्दसः।

क्रष्टयः (५४)—[२द्] प्रथमा बहुव०।

गातुवित्तमः (४७)—'कमिमनिजनिगा०' उ० १।७३ इति तुः। गाते गच्छतीति गातुः। गातुं वेत्तीति क्विप्, अतिशायने तमप्। १मा १व०।

गाथाभिः (४९)—'गा' स्तुतौ जु० प० अनि० जिगाति, अस्मात् 'उषि कुषि०' उ० २।४ इति थन्। गीयतेऽनया सा गाथा ताभिः।

गिरः (४७)—१मा।

गिरा (५२)—३या।

ग्रावाणः (४८)—ग्रसते ('ग्रसु' अदने भ्वा० आ०) अन्येभ्योऽपीति डः। आवनति ('वन' सम्भक्तौ शब्दे वा भ्वा० प०) विच्। ग्रथासावावा च॥ ग्रसते—वनिप् पृषोदरादित्वात्॥ गिरति गृणाति वा ('गृ' निगरणे शब्दे वा तु०; क्र्या०)—वनिप् पृषो०॥ गरति ('गृ' सेके भ्वा०)+मूलविभुजादित्वात्कः। अवति वाहुलकात्कनिः। ग्रथासावावा च॥ ते॥

चेतिष्ठम् (४५) 'चिती' संज्ञाने भ्वा० प०+इष्ठन्। २या॥

छर्दिः (४९)—'छर्द' वमने चु० उ० 'अर्चि शुचि०' उ० २।१०८ इतीसिः। छर्दति यत्तच्छर्दिः।

जनाय (५४)—४र्थी।

जाता (४२)—जन+क्तः तानि, विभक्तेर्लुक्, जातान् वा।

जूमः (५२)—जमतिर्गतिकर्मा निघं० २।१४, जमु अदने भ्वा० प०, 'जनो' प्रादुर्भावे दि०, 'अजू' व्यक्तिम्रक्षणकान्तिगतिषु रु०, एभ्यः 'अनुचन्' उ० १।१५९ इति परि जूमन्निति कनिन्नन्तं सोपसर्गं निपातितं, बाहुलकात्, ३।३।१, इति निरुप-सर्गमपि भवति। निपातनादेव कारकविशेषसिद्धिः। 'डाबुभाभ्यामन्यतर-स्याम्' ४।१।१३। गतौ पूर्ववदर्थः, अदन्ति वास्यां भूतानि, जातानि वा स्वकार-णात्, जायन्ते वाऽस्या ओषधयः, व्यक्ता सर्वेषां प्रत्यक्षा नक्षाकाशादिवदव्यक्ता, अक्ता सिक्ता भवति हर्षेण। ध्रुमी॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्योतिः (५४)—२या ॥

तत् (५३)—अव्ययम् ।

तस्थौ (५१)—तिष्ठतेर्लिटि ।

ते (५३)—६ष्ठी ।

तन्वा (५२)—'कषि चमि तनि०' उ० १।८० इति उः । तनोति कार्याणि यया सा तनूः तया ॥

त्वम् (५३)—१मा ।

त्वा (४६)—२या ।

त्वाम् (५४)—२या ।

दिवः (५२)—५मी ।

दीदेथ (५४)—दिदेति च्छान्दसो दीप्तिकर्मा, थलि, द्विर्वचनप्रकरणे 'छन्दसि वेति वक्तव्यम्' ६।१।१ इति द्विर्वचनाभावः 'अनिट्य मागम शासनम्' इति वचनादिडभावः ।

दूतम् (४५)—२या ।

दूरे (५३)—दुःखनेयते प्राप्यते 'दुरीणो लीपश्च' उ० २।२० इति दुरुपधादिण् धातोरक् धातोश्च लीपः । ७मी ॥

देव (५१)—सं० ।

देवाः (४८)—१मा ।

देवेषु (४६)—७मी ।

देवैः (५०)—३या ।

देवोदासः (५१)—दिवः, दंसयति दंसति, दंस दंशने चु० धातोः 'दंसेष्टनौ न आ च' उ० ५।१० इति दासः । दिवः दासः षष्ठ्या अलुक् । स एव १मा ।

न (५१, ५३)— ।

नः (४७)— ।

नयन्तु (४७)—[इद नय] लोट् प्रथम पु० बहु व० ।

नपातम् (४५)—नञ् पूर्वात्पते र्ण्यन्तात् णिलोपः । 'नभ्राण्नपान्न०' ६।३।७५ इति नञः प्रकृतिभावः । न पातयति, न तेन पततीति तम् ॥

नमसा (४५)—३या १व० ।

नमस्यन्ति (५४)—नमः कुर्वन्तीति 'नमो वरिव०' ३।१।१९ इति पूजार्थे क्यच् ॥

नरः (४९)—'नयतेर्डिच्च' उ० २।१०० ऋप्रत्ययस्य डित्वाट्टिलोपः । कार्याणि नयतीति नाः ते ।

नाकस्य (५१)—'पि नाका दयश्च' उ० ४।१५ इति निपातः । नयति सुखमिति नाकः (म्)तस्य ।

निदधे (५४)—नि + धा + लिट् ।

निवर्त्तनम् (५३)—नि + वृतु + ल्युः, ल्युट् ।

पुरः (४८)—'पुर' अग्रगमने तु० प० से० पुरति, + असुक्, अव्ययसंज्ञा ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुरुमीढ (४९)—पुरुः, 'मिह' सेचने भ्वा० प० अनि० मेहति.+क्तः सम्मुहो।

पृथिवीम् (५१)—२या।

पृण (५२)—'पृण' प्रीणने तु० प० से० पृणति, लोट्।

प्रहृषे (५३)—प्र+'हृष' तितिक्षायाम् दि० उ० से०। प्रहृष्यते। व्यत्ययेन कर्मणि त-प्रत्ययः 'लोपस्त०' ७।१।४१ आत्मनेपदेषु यस्तकारस्तस्य छन्दसि लोपः स्यात्।

प्रविवाहते (५१)—प्र+वि+हतु' वर्त्तने भ्वा०, वरणे दि० खिट् वहते।

प्रातर्यावभिः (५०)—'प्रात्तेररन्' उ० ५।५९ प्रकृष्टमतति गच्छतीति प्रातः। प्रातः यान्तीति, वनिप्, तैः।

प्रियम् (४५)—२या।

मज्मना (५१)—'दुमस्जो' शुद्धौ तु० प० अनि० धातोः 'सर्वधातुभ्यो मनिन्' उ० ४।१४५ इति मनिन्, मज्जयति शवूननेन तन्मज्म तेन॥

मनुः (५४)—'मृ स्तृ स्मिहि०' उ० १।१० मन्यतेऽवबुध्यते शास्त्रमिति मनुर्विद्वान्॥

ममा (५२)—ममेत्यस्य 'ङ्लोपे पूर्वस्य०' ६।३।१११ इत्यतो दीर्घ इत्यनुवर्त्य 'अन्येषामपि०' ६।३।१३७ इति दीर्घः।

मरुतः (४८)—१मा बहुव०।

मर्त्तासः (४६)—'हसि मृ०' उ० ३।८६ इति तन्, म्रियतेऽसौ मर्त्तस्ते, जसोऽसुक्॥

मातरम् (५१)—'मान' पूजायाम् चु० प०, 'नप्तृ नेष्टृ०' उ० २।९५ मानयति सत्करोतीति मातेति निपातितं ताम्।

माल्षु (४६)—७मी।

मातृः (५३)—२या।

मित्रः (५०)—पुंसि।

यत् (५३, ५३)—अव्ययम्।

यम् (५४)—२या।

यस्मिन् (४७)—७मी।

यामि (४८)—याचामि (आर्षः) वर्णलोपः। यद्वा यामि याञ्चाकर्मसु। नि०।

राजसि (४६)—राजृ दीप्तौ लट् सिप्।

राये (४९)—४र्थी।

रोचनात् (५२)—'रुच' दीप्तौ भ्वा० आ० 'अनुदात्तेतश्च हलादेः' ३।२।१४९ इति युच्॥ नन्द्यादित्वाल्लुर्वा॥ 'बहुलमन्यत्रापि' उ० २।७८ इति युज् वा। तस्मात्।

वः (४५)—।

वना (५३)—'वन' संभक्तौ त० आ० 'पुंसि संज्ञायां घः प्रायेण' ३।३।११८॥ अन्वा॥ विभक्तेराकारादेशः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वनेषु (४६)—७मी ॥

वरिष्ठम् (४८)—वृङ् संभक्तौ क्र्या० + इष्ठः ॥ यद्वा वृञ् वरणे स्वा० 'वृञ इष्ठः' उ० ३।९८ व्रियते स्वीक्रियते तत्। २या० ॥

वर्धनम् (४७)—वृधु + 'अनुदात्ते०' ३।२।१४९ इति युच् ॥ ल्युर्वा ॥ २या ॥

वर्धस्व (५२)—खोट्।

बर्हिः (४८)—१मा।

बर्हिषि (५०)—७मी।

वहसि (४६)—वह लट् सिप्।

वह्निभिः (५०)—वह 'वहि श्रि०' उ० ४।५१ इति नित्। वहतीति वह्निस्तैः।

विश्वस्य (४५)—।

वृहतः (५२)—५मी।

व्रतानि (४७)—वृञ् स्वा० 'पृषिरञ्जिभ्यां कित्' उ० ३।१११ इति विधीयमानोऽतच् प्रत्ययो बाहुलकाद् भवति, कित्त्वाद्गुणाभावः, यणादेशः। वारयतेर्वा तत् इत्यत्र 'लुग्०' ७।३।७३ इति लुगपि बाहुलकात्। तानि ॥

ब्रह्मणस्पते (४८)—'बृहि' वृद्धौ भ्वा० 'बृंहे र्नोच्च' उ० ४।१४६ इति मनिन्। बृंहति वर्धयति प्रजाः। अन्तर्भावितण्यर्थः। ब्रह्मणः पतिः (षष्ठ्यन्तः) 'षष्ठ्याः पतिः०' ८।३।५३ इति विसर्गस्य सः। संबुद्धौ ॥

भर्मणि (५१)—'भृ' हिंसायाम् क्र्या० उ० मनि०, 'सर्वधातुभ्यो मनिन्' उ० ४।१४५, भ्रियतीति भर्म तस्मिन् ॥

भश्वते (५४)—भशति भशनं वा 'भश' प्रतगतौ भ्वा० बाहुलकात् वत् सहार्थे।

भीरभोचिषम् (४९)—भीते इति भीरं ('भीङ्' खप्ने 'स्फायि तञ्चि०' उ० २।१३ इति रक्) भीचिरस्य तम्।

भेषे (४६)—भीङ् लट् से।

भृतम् (४९)—भृ + क्तः तम्।

भृत्कर्णं (५०)—भ्रियोतीति भृत् क्विपि तुगागमः, कीर्यते शब्दग्रहणाय क्षिप्यते, यद्वा कीर्यते शब्दोऽस्मिन्, किरति शरीरे सुखं वा 'कृ' विक्षेपे 'कृ हृ भृ०, उ० ३।१० इति नन्। बाहुलकाद्गुणः। यद्वा कर्णयति 'कर्ण' भेदने अदन्तः, अच्। यद्वा करोति शब्दतानं कृ करणे + नन्। भृतौ कर्णौ यस्यासौ तत्संबुद्धौ ॥

भृधि (५०)—३द।

मन् (४६, ५३)—मस + शतृ: शतुरुगित्वान्नुम् १मा।

मृजातम् (४७)—मृ + जन + क्तः 'मृजः' ८।३।१०७ षत्वम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सम् (४६)—सम्यगर्थेऽव्ययम्।

सयावभिः (५०)—समानं यान्तीति 'या' प्रापणे 'आतो मनिन्०' ३।२।७४ इति वनिप्। तैः।

सुक्रतो (५२)—[१द] सम्बुद्धौ।

सुदीतये (४९)—'दा' दाने जु०+क्तिन् 'घुमास्था०' ६।४।६६ इतीत्वं दीतिः। सुष्ठु दीतिर्दानं यस्य तस्मै। सुदीतये, पलोपः।

सध्वरम् (४५)—सु सुष्ठु, अध्वरो यज्ञो यस्य तम्, २या।

इव्यम् (४६)—२या।

इविष्कृतः (४६)—६ष्ठी। जुहोतेः 'अर्त्तिशुचि०' उ० २।१०८ इति इसिः। इविः पूर्वात्करोतेः क्विप्। 'इसुसोः सामर्थ्ये' ८।३।४४ इति षत्वम्।

इतः (४८)—[१द]।

इति चतुर्थी दशतिश्चतुर्थखण्डश्च।

प्रथमम् (आग्नेयं) पर्व। प्रथमोऽध्यायः। प्रथमः प्रपाठकः। षष्ठः खण्डः। षष्ठी दशतिः।

अथ प्रथमा।

वसिष्ठ ऋषिः। एकं सामाग्नेः स्वभूतं द्रविणशब्दोपेतम् (अग्नेश्च द्रविणम्। आ० ब्रा०) बृहती। अग्निः। विनियोगस्तु (देवो वो द्रविणोदा इत्यग्निष्टोमसाम कार्य्यं देवतास्वेवैनान् प्रतिष्ठापयति। ता० म० ब्रा० १७।१।१०) अग्निष्टोमे सामनि; (स उत्तमे स्तोत्रे देवो वो द्रविणोदा इति देवानभिपर्य्यावर्त्तत ॥ १८।१।४ ॥)।

३ १ २ ३ २ ३ १ २ ३ १ २ १ २
देवो वो द्रविणोदाः पूर्णां विवष्ट्यासिचम्। उद्वा
३ २ ३ १ २ ३ २र १र ३ १ २
सिञ्चध्व मुप वा पृणध्व मादिद्वो देव ओहते ॥५५॥ (क)

(क) ऋ० ५।२।२२।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पदपाठः। देवः १। वः ६। द्रविणोदाः १। पूर्णाम् २। विवष्टु क्रि०। आसिचम् २। उत्, वा अ०। सिञ्चध्वम् क्रि०। उप, वा अ०। पृणध्वम् क्रि०। आत्, इत्, अ०। वः २। देवः १। ओहते क्रि०।

अन्वयः। द्रविणोदाः देवः वः पूर्णाम् आसिचं विवष्टु, [हे मनुष्याः यूयम्] उत्सिञ्चध्वं वा उपपृणध्वं वा [तदग्नये प्रयच्छत च] आत् इत् देवः वः ओहते।

भाष्यम्। 'द्रविणोदाः' 'देवः' धनदाता देवोऽग्निः, परमात्मा वा 'वः' युष्मदीयां 'पूर्णां' हविषा, ध्यानधारणासमाधिरूपहविषा वा परिपूर्णाम् 'आसिचं घृतेनासिक्तां सुचमाहुतिरूपां स्तुतिं वा 'विवष्टु' विवष्टि कामयते। हे मनुष्याः! यूयम् 'उत्सिञ्चध्वं वा' सोममुत्कृष्टं सिञ्चत 'उपपृणध्वं वा' सोमेनाज्येन च चमसं पूरयत, तदग्नये प्रयच्छत च; उत्कृष्टं ध्यायत वा परमात्मानं, स्वकामनां भोगापवर्गरूपां पूरयत वा तत्प्रसादेनेतिशेषः। 'आत् इत्' अनन्तरमेव 'देवः' दिव्योऽग्निः परमात्मा वा 'वः' युष्मान् यजनशीलान् 'ओहते' वहति परमानन्दं प्रापयतीत्यर्थः।

निरुक्तम्। द्रविणोदाः कस्मात्? धनं द्रविणमुच्यते यदेनदभिद्रवन्ति। बलं वा द्रविणं यदेनेनाभिद्रवन्ति। तस्य दाता द्रविणोदाः॥ ८।१।१॥ तत्को द्रविणोदाः इन्द्र इति क्रौष्टुकिः। स बलधनयोर्दातृतमस्तस्य च सर्वा बलकृतिः। ८।२।१॥ अयमेवाग्निर्द्रविणोदा इति शाकपूणिः। आग्नेयेष्वेव हि सूक्तेषु द्राविणोदसाः प्रवादा भवन्ति। 'देवा अग्निं धारयन् द्रविणोदाम्' इत्यपि निगमो भवति॥ ८।२।६॥ विशेषस्त्वत्रैव द्रष्टव्यः।

अथ द्वितीया।

कण्व ऋषिः। बार्हस्पत्यं साम बृहस्पतिर्ऋषिः (बार्हस्पत्यञ्च। आ० ब्रा०) बृहती। ब्रह्मणस्पतिर्देवता। विनियोगस्तु अग्निषोमीयप्रणयने।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

२ ३ १ २ ३ २ ३ २ क २र ३ १ २ १ २ ३ १र
प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता। अच्छा वीरं
२र ३ १ २ ३ २ ३ १ २
नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः॥ ५६॥ (क)

पदपाठः। प्रैतु क्रि०। ब्रह्मणस्पतिः १। प्र अ०। देवी १। एतु क्रि०। सूनृता १। अच्छा अ०। वीरम् २। नर्यम् २। पङ्क्तिराधसम् २। देवाः १। यज्ञम् २। नयन्तु क्रि०। नः २।

अन्वयः। ब्रह्मणस्पतिः प्रैतु, सूनृता देवी प्र एतु, देवाः वीरं नर्यं पङ्क्तिराधसं यज्ञं नः अच्छा नयन्तु।

भाष्यम्। 'ब्रह्मणस्पतिः' अन्नपतिर्धनस्वामी वेदपतिर्वेश्वरः 'प्रैतु' अस्मान् प्रकर्षेण प्राप्नोतु, 'सूनृता' 'देवी' सुष्ठुनेत्री दिव्यगुणवती वेदवाणी 'प्र' प्रकर्षेण 'एतु' अस्मान् प्राप्नोतु, 'देवाः' ऋत्विगादयो विद्वांसः [विद्वांसो हि देवाः। श० ब्रा० ३।५।६।१०] दिव्यगुणा वेश्वरस्य 'वीरं' पूर्णशरीरात्मबलप्रदं 'नर्यं' नराणां हितकरं 'पङ्क्तिराधसं' पङ्क्त्यर्थं जनसमूहार्थं राधोऽन्नं धनं वा यस्य तं धर्मात्मवीरमनुष्यसमूहानां कल्याणं राध्नोति साध्नोति यस्तं वा 'यज्ञं' यागादिकं कर्म 'नः' अस्मान् 'अच्छा' नयन्तु अभिमुख्येन नयन्तु कृपया प्रापयन्त्विति।

निरुक्तम्। नर्यो मनुष्यो नृभ्यो हितो नारापत्यमिति वा॥ ११।३६।१॥

अथ तृतीया।

कण्व ऋषिः। वसिष्ठस्य स्वभूतं वीङ्कं साम (वसिष्ठस्य च वीङ्कम्। आ० ब्रा०) बृहती। विनियोगस्तु (वीङ्कं भवति॥ च्यवनो वै दाधीचोऽश्विनोः प्रिय आसीत् सोऽजीर्यत् तमेतेन साम्नाप्सु व्येङ्गयतां

(क) ऋ० १।३।२०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तं पुनर्युवानमकुरुतां तद्भाव तौ तर्ह्यकामयेतां कामसनि साम वीङ्गं काममेवैतेनावरुन्धे ॥ ता० म० ब्रा० १४।६।८, १०) एतेन तुष्टुवानो यौवनबलं लभते ।

३ २ १ २ ३ २ ३ १ २ २ १र २र ३ २ ३ १र
ऊर्ङ्ग ऊ षु ण ऊतये तिष्ठा देवो न सविता । ऊर्ङ्गो
२र ३ १ २ ३ २३ १ २ ३ १ २ ३ १ २
वाजस्य सनिता यदञ्जिभि र्वाघद्भि र्विह्वयामहे ॥५७॥(क)

पदपाठः । ऊर्ङ्गः १। ऊ, सु अ०। नः ६। ऊतये ४। तिष्ठा क्रि०। देवः १। न अ०। सविता १। ऊर्ङ्गः १। वाजस्य ६। सनिता १। यत् अ०। अञ्जिभिः ३। वाघद्भिः ३। विह्वयामहे क्रि०।

अन्वयः । [हे अग्ने त्वं] नः सु ऊतये ऊर्ङ्गः ऊ (=पादपूरणे) तिष्ठा। सविता देवः न ऊर्ङ्गः [सन्] वाजस्य सनिता [भव] यत् अञ्जिभिः वाघद्भिः विह्वयामहे ।

भाष्यम् । हे अग्ने ! परमात्मन् ! वा त्वं 'नः' अस्माकं 'सु ऊतये' सुष्ठु रक्षणाय 'ऊर्ङ्गः' ज्वालाभिरुन्नतः सन् श्रेष्ठभावस्य द्योतकः सन् वा 'तिष्ठा' तिष्ठ, अवस्थितो भव । अत्र दृष्टान्तमाह, 'सविता देवः न' सूर्यो देव इव 'ऊर्ङ्गः' उन्नतः सन् हविर्गृहीत्वा वायुना सहान्तरिक्षं गतो मेघवृष्टिरूपः सन् श्रेष्ठभावयुक्तः सन् वा 'वाजस्य' अन्नस्य 'सनिता' दाता भव । 'यत्' यस्मात्कारणात् 'अञ्जिभिः' घृताहुतिभिः स्तुतिभिर्योगाङ्गैर्वा प्रकटयद्भिः 'वाघद्भिः' ऋत्विग्भिः यजनशीलैर्वा 'विह्वयामहे' त्वां विशेषेणाह्वयामः वयमिति ।

निरुक्तम् । सविता सर्वस्य प्रसविता ॥ १०।३१।३ ॥ ऊर्ङ्ग उच्छ्रितो भवति ॥ ८।१५।१ ॥

(क) ऋ० १।३।२० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ चतुर्थी ।

सौभरि ऋषिः । एकं साम अङ्गिरःपुत्रस्य विरूपस्य ऋषः (विरूपश्चाङ्गिरसस्य साम । आ० ब्रा०) बृहती । अग्निः । विनियोगस्तु प्रातरनुवाके आग्नेयक्रतौ ।

२उ ३ १र २र ३ २ ३ १ २ ३ १ २ ३ १
प्र यो राये निनीषति मर्त्तो यस्ते वसो दाशत् । स वीरं
२ ३ २ ३ १ २ ३ १ २
धत्ते अग्न उक्थशंसिनं त्मना सहस्रपोषिणम् ॥५८॥(क)

पदपाठः । प्र अ० । यः १ । राये ४ । निनीषति क्रि० मर्त्तः १ । यः १ । ते ४ । वसो सं० । दाशत् क्रि० । सः १ । वीरम् २ । धत्ते क्रि० । अग्ने सं० । उक्थशंसिनम् २ । त्मना ३ । सहस्रपोषिणम् २ ।

अन्वयः । हे वसो अग्ने ! यः राये [त्वां] प्र निनीषति यः [च] मर्त्तः ते दाशत् स त्मना उक्थशंसिनं सहस्रपोषिण वीरं धत्ते ।

भाष्यम् । हे 'वसो' धनदातः अन्तर्यामिन् वा 'अग्ने' यज्ञाग्ने ! परमात्मन् ! वा 'यः' पुरुषः 'राये' धनाय मोक्ष-धनाय वा त्वां 'प्र निनीषति' प्रकर्षेण नेतुमिच्छति 'यः' च 'मर्त्तः' मनुष्यः 'ते' तुभ्यं 'दाशत्' हवींषि सर्वं वा प्रयच्छति 'सः' पुरुषः 'त्मना' आत्मना एव 'उक्थशंसिनम्' 'उक्थैर्वेदमन्त्रैः शंसति स्तौति यः तं स्वाध्ययशीलं 'सहस्रपोषिणं' बहुजनपालकं 'वीरं' पुरुषार्थिनं पुत्रं [पुत्रो वै वीरः । श० ब्रा० ३।२।४।१२] 'धत्ते' धारयति, सर्वसुखं लभत इति भावः ।

निरुक्तम् । सहस्रमिति बहुनाम ॥ ३।१३।१ ॥

(क) ऋ० ६।७।१३ ॥ 'प्र यं राये निनीषसि' ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ पञ्चमी ।

कण्व ऋषिः । ऐतवाध्र्यं साम इतवध्रिर्ऋषिः (ऐतवाध्र्यञ्च । आ० ब्रा०) बृहती । अग्निः । विनियोगस्तु प्रातरनुवाके आश्विन-क्रतौ ।

१ २ ३१ २ ३ २ ३१ २ ३१ २ ३ २ ३ २ ३
प्र वो यह्वं पुरूणां विशां देवयतीनाम् । अग्निꣳ सूक्तेभि-
१ २ ३ २उ ३ २ ३१ २
र्वचोभिर्वृणीमहे यꣳ समिदन्य इन्धते ॥ ५९ ॥ (क)

पदपाठः । प्र अ० । वः ६ । यह्वम् २ । पुरूणाम् ६ । विशाम् ६ । देवयतीनाम् ६ । अग्निम् २ । सूक्तेभिः ३ । वचोभिः ३ । वृणीमहे क्रि० । यम् २ । सम् अ० । इत् अ० । अन्ये १ । इन्धते क्रि० ।

अन्वयः । [हे मनुष्याः !] अन्ये इत् यं समिन्धते [तं] पुरूणां देवयतीनां विशां वः [अनुग्रहाय] यह्वम् अग्निं सूक्तेभिः वचोभिः प्रवृणीमहे ।

भाष्यम् । हे मनुष्याः ! 'अन्ये' 'इत्' अन्येऽपि ऋत्विजः उपासका वा 'यम्' अग्निं भौतिकं, परमात्मानं वा 'समिन्धते' यज्ञवेद्यां सम्यग् दीपयन्ति, सम्यग्धारयन्ति वा तं 'पुरूणां' बहूनां 'देवयतीनाम्' आत्मनो विद्याभोगान् गुणांश्चेच्छन्तीनां 'विशां' प्रजानां 'वः' युष्माकमनुग्रहाय 'यह्वं' महान्तम् 'अग्निं' भौतिकं परमात्मानं वा 'सूक्तेभिः' 'वचोभिः' सूक्तरूपैर्वेदवाक्यैः 'प्रवृणीमहे' प्रार्थयामहे उपास्महे इति ।

निरुक्तम् । यह्व इति महतो नामधेयं यातथ ह्वतथ भवति ॥ ८।८।२ ॥ देवयन्तो देवान् कामयमानाः ॥ ८।१८।३ ॥

(क) ऋ० १।३।८॥ 'वचोभिरीमहे यं सीमिदन्य इंधते' ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ षष्ठी।

आल्लील ऋषिः। एकं साम मनसोदोह नामधेयकं (मनसश्च दोहः। आ० ब्रा०) बृहती। अग्निः। विनियोगस्तु प्रातरनुवाके आश्विनशस्त्रे।

३ २ ३ २ ३ २ ३ २ ३ १र २र ३ १ २
अयमग्निः सुवीर्य्यस्येशे हि सौभगस्य। राय ईशे
३ १ २ ३ १ २ ३ १ २ ३ १ २
स्वपत्यस्य गोमत ईशे वृत्रहथानाम्॥ ६०॥ (क)

पदपाठः। अयम् १। अग्निः १। सुवीर्य्यस्य ६। ईशे क्रि०। हि अ०। सौभगस्य ६। रायः ६। ईशे क्रि०। स्वपत्यस्य ६। गोमतः ६। ईशे क्रि०। वृत्रहथानाम् ६॥

अन्वयः। अयम् हि अग्निः सुवीर्य्यस्य सौभगस्य [च] ईशे, रायः स्वपत्यस्य [च] ईशे, गोमतः वृत्रहथानां [च] ईशे।

भाष्यम्। 'अयं' प्रत्यक्षः हृद्देशेऽनुभूयमानो वा 'हि' 'अग्निः' भौतिकः परमात्मा वा 'सुवीर्य्यस्य' शोभनसामर्थ्यस्य 'सौभगस्य' शोभनो भगः श्रीर्यस्य स सुभगः—तस्यभावः सौभगं तस्य सुभगत्वस्य सौभाग्यस्य च 'ईशे' ईष्टे, 'रायः' धनस्य 'स्वपत्यस्य' शोभनापत्यस्य 'गोमतः' गवादिपशुमत्त्वस्य ब्रह्मवर्चसो वा 'ईशे' ईष्टे अधिकारित्वेन वर्त्तसे। तथा 'वृत्रहथानां' वृत्राणामावरकाणां रोगपापविघ्नानां हथा वधास्तेषां शत्रुभूतरोगपाप विघ्नविनाशानाम् 'ईशे' ईष्टे स्वामी, निवारको भवति।

निरुक्तम्। अपत्यं कस्मात्? अपततं भवति। नानेन पततीति वा॥ ३।१।४॥

(क) ऋ० ३।१।१६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ सप्तमी ।

वसिष्ठ ऋषिः । त्रीणि सामानि समन्त-नामधेयानि, तेषामेकस्य साम्नोऽग्निर्वसिष्ठो वा ऋषि वरुणो वा द्वयो वाम्रो नाम ऋषिः (समन्तानि त्रीण्यग्नेरेकं वसिष्ठस्य वा वरुणस्य द्वे वाम्रस्य च । आ० ब्रा०) विनियोगस्त्वाग्नेयक्रतौ प्रातरनुवाके आश्विनशस्त्रे ।

१ २ ३ १ २ ३ १र २र ३ १ १र २र
त्वमग्ने गृहपतिस्त्वꣳहोता नो अध्वरे । त्वं पोता
३ १ २ ३ २ ३ १ २ ३ १
विश्ववार प्रचेता यक्षि यासि च वार्य्यम् ॥ ६१ ॥ (क)

पदपाठः । त्वम् १ । अग्ने सं० । गृहपतिः १ । त्वम् १ । होता १ । नः ६ । अध्वरे ७ । त्वम् १ । पोता १ । विश्ववार सं० । प्रचेताः १ । यक्षि क्रि० । यासि क्रि० । च अ० । वार्य्यम् २ ।

अन्वयः । [हे] अग्ने ! नः अध्वरे त्वं गृहपतिः, त्वं होता, त्वं पोता, प्रचेताः [चासि] [हे] विश्ववार ! [त्वं] यक्षि वार्यं [हविः] यासि च ।

भाष्यम् । हे 'अग्ने' यज्ञाग्ने ! परमात्मन् ! वा 'नः' अस्माकम् 'अध्वरे' हिंसारहिते कर्मयज्ञे, ज्ञानयज्ञे वा 'त्वं' गृहपतिः' यजमानः, शरीररूपगृहस्य पालको वा 'त्वं' 'होता' ऋत्विग्विशेषः ऋग्वेदीयः, कर्मफलप्रदाता वा 'त्वं' 'पोता' सामवेदीय ऋत्विग्विशेषः, पवित्रकर्त्ता वा 'प्रचेताः' प्रवृद्धचेताः प्रकृष्टमतिः ब्रह्मा चतुर्वेदज्ञः सर्वकार्यपरिदर्शकः ऋत्विग्विशेषः, सर्वकार्यद्रष्टा वा चासि। हे 'विश्ववार' विश्वैः सर्वैः वरणीय ! त्वं 'यक्षि' यजसि सङ्गच्छसे वा 'वार्यं' वरणीयं हविः कर्मफलं वा 'यासि' प्रापयसि देवेभ्यो मनुष्येभ्य इति वा ।

निरुक्तम् । प्रचेतसः प्रवृद्धचेतसः ॥ ९।२०।१ । वार्यं वृणोतेरथापि वरतमम् ॥ ५।१।४ ॥

(क) ऋ० ५।२।२१ ॥ 'यक्षि वेषि च' ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथाष्टमी ।

विश्वामित्र ऋषिः । एकं साम वैखानस ऋषिः दनुपुत्र आङ्गिरो वा (वैखानसस्य सामाङ्गिरस्य वा दानवस्य । आ० ब्रा०) बृहती । अग्निः । विनियोगस्त्वाग्नेयक्रतौ प्रातरनुवाके आश्विनशस्त्रे च ।

१ २ ३१ २र ३१२ ३१ २र
सखायस्त्वा ववृमहे देवं मर्त्तास ऊतये । अपान्नपातꣳ
३१२ ३१ ३१२ ३१२
सुभगꣳ सुदꣳससꣳ सुप्रतूर्त्तिमनेहसम् ॥६२॥ (क)

पदपाठः । सखायः १ । त्वा २ । ववृमहे क्रि० । देवम् २ । मर्त्तासः १ । ऊतये ४ । अपाम् ६ । नपातम् २ । सुभगम् २ । सुदंससम् २ । सुप्रतूर्त्तिम् २ । अनेहसम् २ ।

अन्वयः । [हे अग्ने !] सखायः मर्त्तासः [वयम्] ऊतये देवम् अपां नपातं सुभगं सुदंससं सुप्रतूर्त्तिम् अनेहसं त्वा ववृमहे ।

भाष्यम् । हे अग्ने ! भौतिक ! परमात्मन् ! वा 'सखायः' सुहृद्भूताः सोमाज्यादिहविष्प्रदानेन, ध्यानादिना वा 'मर्त्तासः' मनुष्याः वयम् 'ऊतये' अस्माकं रक्षणाय 'देवं' दिव्यगुणम् 'अपां' कर्म्मणां 'नपातं' न पातयितारं रक्षकं 'सुभगं' शोभनैश्वर्य्यं 'सुदंससं' सुकर्म्माणं 'सुप्रतूर्त्तिं' शोभनतारकम् 'अनेहसम्' उपद्रवरहितं 'त्वा' त्वां 'ववृमहे' वृणीमहे ।

निरुक्तम् । दंस इति कर्म्मनाम ॥ ३।१।१ ॥ एह इति क्रोधनाम ॥ ३।९।१३ ॥

(क) ऋ० ३।१।५ ॥ 'सुभगं सुदीदितिम्' ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ व्याकरणम् ।

अनेहसम् (६२)—'हन' अ० धातोः 'नञि हन एह च' उ० ४।२२४ इत्यसिः। न न्यवे विच्छिन्नो न भवतीत्यनेहासम् २या १व०।

अन्ये (५९)—'अन' अ०, अन्नादित्वाद्यः, ते १मा बहु व०।

आसिचम् (५५)—आ+'षिच्' क्षरणे तु० उ० अनि०,+क्विप्। आसिञ्चन्ति अनया ताम् २या १व०।

ईशे (६०, ६०, ६०)—'ईश' ऐश्वर्ये अ० आ० से० ईष्टे। व्यत्ययेन प्रथम पुरुष १व० स्थाने उत्तमैकवचनम्।

उक्थशंसिनम् (५८)—उक्थैः (५८) शंसतेऽसौ इन्, तम्।

उत्सिञ्चध्वम् (५५)—उत्+'षिच्' लोट् मध्यम पु० बहुव०।

उपपृणध्वम् (५५)—उप+पृण तु० प० से० पृणति, व्यत्ययेनात्मनेपदं लोट् ध्वम्।

ऊर्दः (५७, ५७)—उद् (ऊर) दा जु० डु। १मा।

ऊहते (५५)—आ+ऊह वितर्के भ्वा० आ० से० अनेकार्थत्वात् साधुः।

गोमतः (६०)—अस्त्यर्थे मतुप्। 'अधीगर्थदयेशां कर्मणि' २।३।५२ इति षष्ठी।

तिष्ठा (५७)—तिष्ठते लोटि ह्यचोऽतस्तिङ इति दीर्घः।

त्मना (५८)—आत्मनेति तृतीयैकवचनान्तस्य 'मन्त्रेष्वाङ्यादेरात्मनः' ६।४।१४१ इत्याकारलोपः।

दाशत् (५८)—'दाश' दाने+लेट्+तिप्।

देवयतीनाम् (५९)—देवानात्मन इच्छन्त्यो देवयन्त्यः 'सुप आत्मनः क्यच्' ३।१।८ इति क्यच्, शतृः 'उगितश्च' ४।१।६ ङीप्। तासाम्।

द्रविणोदाः (५५)—द्रविणं ददातीति सकार उपजनः, ददाते रसुनि बाहुलकादाकारलोपः।

नर्य्यम् (५६)—नरेभ्यो हितं 'तस्मै हितम्' ५।१।५ इति यत्। २या।

पङ्क्तिराधसम् (५६)—'पचि' व्यक्तीकरणे भ्वा० आ० से पञ्चते, विस्तारवचने चु० पञ्चयति, आभ्यां 'पङ्क्तिविंशति०' ५।१।५९ इति 'तदस्य परिमाणम्' ५।१।५७ इति विषये तिप् प्रत्ययो निपात्यते, प्रकृतेः पञ्चन् शब्दस्य टिलोपः, 'चोः कुः' ८।२।३० इति कुत्वं; राधः [४६]; पङ्क्त्यर्थं राधोऽन्नं धनं वा यस्य तम्। यद्वा पङ्क्तीनां धर्म्यात्मवीरमनुष्यसमूहानां कल्याणं राध्नोति यस्तम्।

पूर्णान् (५५)—'पूरी' आप्यायने (प्रीणने) दि० आ० से० पूर्यते, कर्त्तरि कर्मणि वा क्तः 'वा दान्तशान्तपूर्ण०' ७।२।२७ इति। टाप्। २या १व०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पोता (६१)—पुनातीति पूञ पवने तृच् 'नप्तृनेष्टृत्वष्टृहोतृपोतृ० उ० इति साधुः। यद्वा 'तृन्विधाद्वलिचु चानुपसर्गस्य' वा० ३।२।१३५ इति तृन्। ऋत्विग्विशेषः।

प्रचेताः (६१)—प्रकृष्टं चेतोऽस्य। प्रचेतयति वा। 'चिती' संज्ञाने भ्वा० प० असुन्।

प्रनिनीषति (५८)—प्र+नीञ्+सन्।

यजि (६१)—यजे र्लोटि सिपि 'बहुलं छन्दसि' २।४।७३ इति शपो लुक् 'ग्रथ०' ८।२।३६ इति षत्वं 'षढोः कः सि' ८।२।४१ इति कत्वं सेर्हिरादेशश्छान्दसत्वान्न भवति।

यह्वम् (५९)—यान्त्यनेन। 'या' प्रापणे 'शेवयह्व०' उ० १।१५४ इति वन् धातोर्हस्वो हुगागमश्च॥ यद्वा यजतेः पूर्ववद् वन् जकारस्य हकारश्च निपात्यते॥ यद्वा याते र्ह्वयतेश्च 'गेहे कः' ३।१।१४४ इति बाहुलकाद् भूते कप्रत्ययो ह्वयतेः सम्प्रसारणञ्च॥ २या॥

यचीभिः (५९)—'यच' परिभाषणे अ० सर्वधातुभ्योऽसुन्नित्यसुन्। नपुं०। ३या बहु व०।

वहमहे (६२)—हृङ् सम्भक्तौ क्या० लिट् उत्तम बहुव०।

वा (५५, ५५)—'वा' गतिगन्धनयोः अ० प० क्विप्। अव्ययम्।

वार्यम् (६१)—'हृङ्' सम्भक्तौ क्या० आ० 'ऋहलोर्ण्यत्' ३।१।१२४ कर्मणि। २या।

विवष्टु (५५)—'वश' कान्तौ अ० प०—तिप्, शप्, शप्—सुः, द्वित्वं, 'बहुलं छन्दसि' ७।४।७८ इत्यभ्यासे इकारः, शस्थाने षु 'ग्रथ श्रस्ज०' ८।२।३६ इति, तस्थाने टः सन्धिः, 'एकः' ३।४।८६ इति लोट इकारस्य उः। विवष्टु। लकारव्यत्ययः। विवष्टि कामयते।

विश्ववार (६१)—'हृञ्' वरणे स्वा० वारयति व्रियते वा पचाद्यच् घञ् वा॥ यद्वा वार्यते आच्छाद्यतेऽनेन हृञ युरादेः 'पुंसि संज्ञायां घः०' ३।३।११८ इति घः॥ विश्वैः सर्वैः वारो वरणीयो यः तत्सम्बुद्धावेकवचने।

वीरम् (५६, ५८)—(सुवीरं ३द) २या।

वृत्रहथानाम् (६०)—'हनि कुशि०' उ० २।२ इति क्थन्। हननं हथः। वृत्राणां [१द] हथ इति वृत्रहथस्तेषाम्।

सखायः (६२)—'ख्या' प्रकथने अ० प० अनि०। 'समाने ख्यः०' उ० ४।१३७ इति टन् डित् च। डित्वाट्टिलोपः। समानं ख्यातीति सखा। १मा बहु व०।

सनिता (५७)—'षणु' दाने त० तृच्।

सविता (५७)—'षु' प्रसवैश्वर्ययोः भ्वा० प०। तृचि 'स्वरति सूति०' ७।२।४४ इति इट्।

सहस्रपोषिणम् (५८)—सहस्रं पुष्णातीति तम्।

सुदंससम् (६२)—सुष्ठु दंसः कर्म यस्य तम्।

सुकृता (५६)—सु+'डुकृञ्' परिहाणे दि० आ०+क्विप्। ऋतमिति सत्यनाम। सुष्ठु ऋतम् सुकृतं, पृषोदरादित्वान्नलोपाभावः, टाप्॥ यद्वा सुष्ठु कृत्यन्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वृती गाचविचेपे दि० प०। घञर्थे कः। अन्येषामपीति दीर्घः, टाप्। १मा।

सुप्रतूर्त्तिम् (६२)—'तुरी' गतित्वरणहिंसनयोः दि० आ०—क्तिन् तूर्त्तिः। शोभनं प्रकृष्टं च तूर्त्तिर्यस्य तम्।

सुभगम् (६२)—शोभनो भगः श्री र्यस्य तम्। सु+भज सेवायाम् 'पुंसि संज्ञायां घः०' ३।३ ११८ इति 'खनो घ च' ३।३।१२५ इति यित्करणाद्वा घः॥ २या॥

सुवीर्य्यस्य (६०)—शोभनं वीर्य्यं कर्मधा० तस्य।

सूक्तेभिः (५९)—सु+वच+क्तः। 'बहुलं छन्दसि' ७।१।१० इति भिस ऐसभावः।

सौभगस्य (६०)—सुभगस्य भावः 'प्राग्दीव्यतो०' ५।१।१२९ इत्यञ् 'हृद्भग०' ७।३।१९ इति वृद्धिः। सर्वविधीनां छन्दसि विकल्पितत्वादित्युत्तरपदस्य वृद्धिर्न। ६ष्ठी।

स्वपत्यस्य (६०)—शोभनमपत्यं तस्य।

इति षष्ठी दशतिः षष्ठः खण्डश्च।

प्रथमम् (आग्नेयं) पर्व। प्रथमोऽध्यायः। प्रथमः प्रपाठकः। सप्तमः खण्डः। सप्तमो दशतिः।

अथ प्रथमा।

आत्रेयः श्यावाश्वः गौतमो वामदेव ऋषिर्वा। श्यावाश्वं साम श्यावाश्वेन ऋषिणा दृष्टं (श्यावाश्वश्च। आ० ब्रा०) त्रिष्टुप्छन्दः (क)। अग्निर्देवता। उत्तरवेद्यामग्निस्थापनादावेतन्मूलकसाम्नो विनियोगः।

(क) त्रिष्टुभो रुद्राः। पि० छ० सू० ३।६॥ त्रैष्टुभः पादः सर्वत्रैकादशाक्षरः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१ २ ३ १ २ ३ १र २र ३ १ २
आजुहोता हविषा मर्जयध्वं, नि होतारं गृहपतिं दधिध्वम्।
३ २ ३ १र २र ३ १ २ ३ १ २ ३ २ ३क २र
इड़स्पदे नमसा रातहव्यꣳ, सपर्यता यजतं पस्त्यानाम् ॥६३

पदपाठः। आ अ०। जुहोता क्रि०। हविषा ३। मर्जयध्वम् क्रि०। नि अ०। होतारम् २। गृहपतिम् २। दधिध्वम् क्रि०। इडः ६। पदे ७। नमसा ३। रातहव्यम् २। सपर्यता क्रि०। यजतम् २। पस्त्यानाम् ६।

अन्वयः। [हे ऋत्विजः! यूयम् अग्निम्] आजुहोता [किञ्च] हविषा मर्जयध्वम्, इड़ः पदे होतारं गृहपतिम् [अग्निं] निदधिध्वम्, [अपि च] नमसा [सह] रातहव्यं यजतं [तं] पस्त्यानां [मध्ये] सपर्यता।

आधियाज्ञिकम्। हे ऋत्विजः! यूयम् अग्निम् 'आजुहोता' सम्यगादधिध्वं, किञ्च 'हविषा' हवनीयेन द्रव्येण 'मर्जयध्वं' मृड़यध्वं, सुखयध्वम्। 'इड़ः' इड़ायाः पृथिव्याः 'पदे' अधिष्ठाने उत्तरवेद्यामिति 'होतारं' साधुदेवानामाह्वातारं 'गृहपतिं' गार्हपत्यनामकं, प्रतिदिनं देवयज्ञेन हुतः सन् यजमानगृहं यो रक्षति तम् अग्निं 'निदधिध्वं' नितरामाहितं कुरुध्वम्, अपि च 'नमसा' नमस्कारेणान्नेन वा सह 'रातहव्यं' रातं दत्तं हव्यं हवि र्यस्मै तं 'यजतं' सङ्गमनीयं तं 'पस्त्यानां यज्ञगृहाणां मध्ये 'सपर्यता' परिचरत, सेवत।

आध्यात्मिकम्। हे उपासकाः! यूयमग्निं परमात्मानम् 'आजुहोता' सम्यगुपासीध्वं, किञ्च 'हविषा' यज्ञादिना ध्यानेन वा 'मर्जयध्वं' मृड़यध्वं, सुखयध्वं, प्रसादयत। 'इड़ः' इड़ायाः प्रशस्यस्या वाचः 'पदे' स्थाने वेदवाचि, हृद्देशे वा 'होतारं' सुखस्य दातारं 'गृहपतिं' गृहस्य सर्वजगतः पतिं स्वामिनं परमात्मानं 'निदधिध्वं' नितरां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ध्यायत, अपि च 'नमसा' नमस्कारेण सह 'रातहव्यं' रातं दत्तं हव्यं पूजादिकं यस्मै तं 'यजतं' सङ्गमनीयं तं 'पस्त्यानां ब्रह्मगृहाणां शरीराणामिति (क) मध्ये 'सपर्यता' परिचरत, सेवत ।

निरुक्तम् । इड़ेति पृथिवीनाम ॥ २।५।२ ॥ इड़ेति वाङ्नाम ॥ २।२३।१ ॥ पादः पद्यतेः । तन्निधानात्पदम् ॥ २।७।१ ॥ सपर्यतौति परिचरणकर्म्मा ॥ ३।१३।१० ॥ पस्त्यमिति गृहनाम ॥ ३।१३।८ ॥

अथ द्वितीया ।

वार्ष्टहव्य उपस्तुत ऋषिः । द्वे सामनी ऋतुर्नामके (ऋतुषामणी च । आ० ब्रा०) जगती छन्दः (ख) । अग्निः । प्रातरनुवाके आश्विनशस्त्रे च विनियोगः ।

३ २उ ३ १ २ ३ २ ३ २उ ३ १ २ ३ २ ३
चित्र इच्छिशोस्तरुणस्य वक्षथो, न यो मातरावन्वेति
१ २ ३ १र २र ३ १ २ ३ १ ३ १ २ ३ १
धातवे । अनूधा यदजीजनदधा चिदा, ववक्षत् सद्यो
२र ३ २ १ २
महि दूत्यं चरन् ॥ ६४ ॥ (ग)

पदपाठः । चित्रः १ । इत् अ० । शिशोः ६ । तरुणस्य ६ । वक्षथः १ । न अ० । यः १ । मातरौ २ । अन्वेति क्रि० । धातवे अ० । अनूधाः १ । यत् अ० । अजीजनत् क्रि० । अधा अ० । चित् अ० । आ ववक्षत् क्रि० । सद्यः अ० । महि २ । दूत्यम् २ । चरन् १ ।

(क) स एष गिरि यचुः श्रोत्रं मनो वाक् प्राणस्तं ब्रह्मगिरिरित्याचक्षते । ऐतरेयारण्यके अ १ खं ८ ।

(ख) जगत्या आदित्याः ॥ पि० छ० ३।४ ॥ जगत्याः पादो द्वादशाक्षराणि भवन्ति ।

(ग) ऋ० ८।६।१८ ॥ 'मातरावन्वेति' 'अनूधा यदि जीजनदधा च नु ववक्ष सद्यो' ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अन्वयः । शिशोः तरुणस्य [कार्यं कुर्वतः अग्नेः] वक्षथः चित्रः इत्, यः मातरौ धातवे न अन्वेति, यत् चित् अजीजनत् अधा सद्यः अनूधाः महि दूत्यं चरन् आववक्षत् ।

आधियाज्ञिकम् । 'शिशोः' प्रशंसनीयस्य, शिशुभूतस्य 'तरुणस्य' तरुणवत् कार्यं कुर्वतः अग्नेः 'वक्षथः' हविर्वहनं 'चित्रः' विचित्रम् 'इत्' एव, 'यः' जातोऽग्निः 'मातरौ, मातृभूते अरणी 'धातवे' रक्षार्थं 'न' 'अन्वेति' अनुगच्छति, यथा शिशु र्जातमात्रः स्तनपानादिलक्षणां मातुः रक्षामपेक्षते नायं तथेति भावः । 'यत्चित्' यदेव 'अजीजनत्' अरण्योः सकाशात् ऋत्विगेनमुत्पादितवान् 'अधः सद्यः' तत्कालमेव 'अनूधाः' स्तनपानमनपेक्षमाणः, उत्पत्यनन्तरं स्वयमेव प्रज्वलन्निति 'महि' महत् दूत्यं' दूतकर्म 'चरन्' आचरन् 'आववक्षत्' देवेभ्यो हवींषि आवहति ।

आध्यात्मिकम् । 'शिशोः' प्रशंसनीयस्य, शिशुभूतस्य अणीयसः 'तरुणस्य' तरुणवत्कार्यं कुर्वतः सर्वशक्तिमतो महतः परमात्मनः (क) 'वक्षथः' जीवानां कर्मफलवहनं 'चित्रः इत्' विचित्रमेव, 'यः' परमात्मा 'मातरौ' मातापितरौ 'धातवे' रक्षार्थं 'न' 'अन्वेति' अनुगच्छति तस्य स्वयम्भूत्वात् । 'यत्चित्' यदेव 'अनूधाः' ऊधोरहितः तस्य सर्वशक्तिमत्वात् 'अजीजनत्' स ईश्वरो जगदुत्पादितवान् 'अधः सद्यः' तत्कालमेव स व्यक्तोऽभूत् । किञ्च 'महि' महत् 'दूत्यं' दूतस्य कर्म, कर्मानुसारेण भोगापवर्गप्रापकत्वमिति 'चरन्' आचरन् 'आववक्षत्' समन्तात् सर्वान् वहति-सर्वाधिष्ठातृत्वेनेति । (ख)

निरुक्तम् । शिशुः शंसनीयो भवति ॥ १०।३९।२ ॥ महि महत् ॥ ११।९।१ ॥

(क) 'नमो महद्भ्यो अर्भकेभ्यः' । यजुः । १६।२६ ॥

(ख) 'स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम् । कविर्मनीषी परिभूः स्वयम्भूः, याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः' । यजुः ४०।८ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ तृतीया ।

वामदेव पुत्रो बृहदुक्थ ऋषिः । यामं साम, यम ऋषिः (यामं च । आ० ब्रा०) त्रिष्टुप् । अग्निः । विनियोगस्तु आहवनीय मवदीप्यमानमर्वाक् शम्यापरासादिदन्त एकं पर ऊत एकमिति संवपेदिति ।

३ २ ३ १ २ ३१२ ३१ २ ३ १२३ ३ १ २ १ २
इदं त एकं पर ऊत एकं, तृतीयेन ज्योतिषा संविशस्व ।
३ १२ ३२ १ २ ३ २ ३ १ २ ३ २
संवेशनस्तन्वे ३ चारुरेधि, प्रियो देवानां परमे
३ १ २
जनित्रे ॥ ६५ ॥ (क)

पदपाठः । इदम् १ । ते ६ । एकम् १ । परः १ । ऊ अ० । ते ६ । एकम् १ । तृतीयेन ३ । ज्योतिषा ३ । संविशस्व क्रि० । संवेशनः १ । तन्वे ४ । चारुः १ । एधि क्रि० । प्रियः १ । देवानाम् ६ । परमे ७ । जनित्रे ७ ।

अन्वयः । [हे अग्ने !] ते इदम् एकं [ज्योतिः], ते परः (=अपरम्) एकं [ज्योतिः] ऊ (=च), [किं च] तृतीयेन ज्योतिषा संविशस्व । परमे जनित्रे संवेशनः [भव] देवानां तन्वे चारुः प्रियः [च] एधि ।

भाष्यम् । हे अग्ने ! परमात्मन् ! वा 'ते' तव 'इदम्' आदित्यरूपम् (ख) 'एकं' ज्योतिः, 'ते' तव 'परः' अपरम् 'एकं' विद्युद्रूपं ज्योतिः 'ऊ' चास्ति, किञ्च 'तृतीयेन' पार्थिवाग्निरूपेण 'ज्योतिषा' तेजसा 'संविशस्व' आधानकर्मणा सम्यक् प्रवेशं कुरु

(क) ऋ० ८।१।१८ ॥ 'संवेशने तन्वः' ॥ अथर्व० १८।३।७॥ 'संवेशने तन्वा...सधस्थे'
(ख) सूर्य आत्मा जगतः । ऋ० १।८।७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संगच्छस्व वा (क)। 'परमे' 'जनित्रे' श्रेष्ठे जनयितरि सुखानामुत्पादके यज्ञे 'संवेशनः' सम्यक् प्रवेष्टा भव, 'देवानां' दिव्यगुणानां 'तन्वे', विस्ताराय 'चारुः' शोभनः 'प्रियः' अनुकूलश्च 'एधि' भव।

अथ चतुर्थी।

आङ्गिरसः कुत्स ऋषिः। एकमार्षेयं सामाग्निश्चर्षिः, कौत्सं साम कुत्स ऋषि र्वा, यज्ञसारथिनामधेयकं वा साम (अग्नेश्चार्षेयं कौत्सं वा यज्ञसारथि वा। आ० ब्रा०) जगती। अग्निः। विनियोगस्तु (इमꣳ स्तोममर्हते जातवेदसे इत्याग्नेयमाज्यं भवति सोदकं-मिन्द्रियस्य वीर्यस्य रसस्यानतिक्षाराय यत्र वै देवा इन्द्रियं वीर्यꣳ रसमपश्यꣳ स्तदनुन्यतुदन्। ता० म० ब्रा० १३।८।१) इति वह्निष्यवमानस्य षष्ठेऽहनि।

३ २उ ३ १ २ ३ १ २ ३ १२ ३ १ २ ३
इमꣳ स्तोममर्हते जातवेदसे रथमिव सम्महेमा मनी-
१ २ ३ २उ ३ १ २ ३ १ २र ३ १र
षया। भद्रा हि नः प्रमतिरस्य सꣳस दग्ने! सख्ये
२ र ३ १
मा रिषामा वयं तव॥ ६६॥ (ख)

पदपाठः। इमम् २। स्तोमम् २। अर्हते ४। जातवेदसे ४। रथम् २। इव अ०। सम्महेमा क्रि०। मनीषया ३। भद्रा १। हि अ०। नः ६। प्रमतिः १। अस्य ६। संसदि ७। अग्ने सं०। सख्ये ७। मा अ०। रिषामा क्रि०। वयम् १। तव ६।

(क) त्रीणि ज्योतींषि सचते स षोडशी। यजुः ३२।५॥

(ख) ऋ० १।६।३०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अन्वयः। [वयम्] अर्हते जातवेदसे [अग्नये] मनीषया रथमिव इमं स्तोमं [कुर्मः, अपि च तं] सम्महेमा। अस्य संसदि नः प्रमतिः भद्रा हि [भवतु] हे अग्ने! तव सख्ये वयं मा रिषामा।

भाष्यम्। वयम् 'अर्हते' पूज्याय 'जातवेदसे' जातधनाय जातप्रज्ञाय वाग्नये परमात्मने वा 'मनीषया' निश्चितया बुद्ध्या 'रथमिव' रमणसाधनं रथमिव 'इमं' 'स्तोमं' समूहं स्तुतीनामिति कुर्म्मः, अपि च तं 'सम्महेमा' सम्यक् पूजितं कुर्म्मः। 'अस्य' अग्नेः परमात्मनो वा 'संसदि' सम्भजने 'नः' अस्माकं 'प्रमतिः' प्रकृष्टा बुद्धिः 'भद्रा' 'हि' कल्याणी खलु भवतु। हे 'अग्ने' भौतिक! परमात्मन्! वा 'तव' 'सख्ये' आनुकूल्ये 'वयं' 'मा' 'रिषामा' न हिंसिता भवामः, अस्मान् रक्षेति भावः।

निरुक्तम्। मेति प्रतिषेधे ॥ १।५।८ ॥ मनीषया मनस ईषया स्तुत्या प्रज्ञया वा ॥ २।२५।१ ॥ भद्रं भगेन व्याख्यातं भजनीयं भूतानामभिद्रवणीयं भवद्रमयतीति वा भाजनवद्वा ॥४।९।१॥

अथ पञ्चमी।

बार्हस्पत्यो भरद्वाज ऋषिः। द्वे सामनी वैश्वानराख्योऽग्नि ऋषिः (अग्ने वैश्वानरस्य सामनी द्वे। आ० ब्रा०) त्रिष्टुप्। वैश्वानरोऽग्निः। विषुवन्नामक-यज्ञाहेऽग्निमरुद्देवसंबन्धे शस्त्ररूपेण विनियोगः।

३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ २उ ३ २ ३ २
मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निम्।
३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
कविꣳ सम्राज मतिथिं जनाना मासन्नः पात्रं
३ २
जनयन्त देवाः ॥ ६७ ॥ (क)

(क) ऋ० ४।५।१।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पदपाठः। मूर्द्धानम् २। दिवः ६। अरतिम् २। पृथिव्याः ६। वैश्वानरम् २। ऋते ७। आजातम् २। अग्निम् २। कविम् २। सम्राजम् २। अतिथिम् २। जनानाम् ६। आसन् २। नः ४। पात्रम् २। जनयन्त क्रि०। देवाः १।

अन्वयः। मूर्द्धानं दिवः पृथिव्याः च अरतिं वैश्वानरम् ऋते आजातं कविं जनानां सम्राजम् आसन् पात्रम् अग्निं देवाः नः जनयन्त।

भाष्यम्। 'मूर्द्धानं' शिरोवच्छ्रेष्ठं 'दिवः' प्रकाशवतः 'पृथिव्याः' प्रकाशरहितस्य जगतः च 'अरतिं' स्वामिनं 'वैश्वानरं' विश्वेषु नरेषु नायकम् 'ऋते' यज्ञाद्यनुष्ठाने सत्यज्ञानयुक्ते वेदे वा 'आजातं' सम्यक् प्रादुर्भूतं प्रसिद्धं वा 'कविं' क्रान्तदर्शनं 'जनानां' मध्ये 'सम्राजं' सम्यक् प्रकाशमानम् 'अतिथिम्' अतिथिवत्पूज्यम् 'आसन्' आस्यभूतं, मुखमिव श्रेष्ठं वा 'पात्रं' पातारं रक्षकम् 'अग्निं' भौतिकं परमात्मानं वा 'देवाः' विद्वांसः ऋत्विजः 'नः' अस्मदर्थं 'जनयन्त' जनयन्ति प्रकाशयन्ति।

निरुक्तम्। वैश्वानरः कस्माद् विश्वान्नरान्नयति। विश्व एनं नरा नयन्तीति वा। अपि वा विश्वानर एव स्यात् प्रत्यृतः सर्वाणि भूतानि तस्य वैश्वानरः॥ ७।२१।१॥ अयमेवाग्नि र्वैश्वानर इति शाकपूणिः। विश्वा नरा वेति उत्तरेज्योतिषी वैश्वानरोऽयं यत्ताभ्यां जायते॥ ७।२३।८॥ आग्नेयेष्वेव हि सूक्तेषु वैश्वानरीयाः प्रवादा भवन्ति॥ अग्निकर्मणा चैनं स्तौतीति वहसीति पचसीति दहसीति॥ ७।२३।१३, १४॥ आस्यमास्यतेः। आस्यन्दत एतदन्नमिति वा॥ १।९।१॥

अथ षष्ठी।

भरद्वाज ऋषिः। सामनी द्वे आग्ने, इटतो नाम ऋषिः (आग्ने द्वे ऐंटते वा। आ० ब्रा०) त्रिष्टुप्। अग्निः। विषुवन्नामकयज्ञाद्वे निष्केवल्यप्रयोगे विनियोगः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

२उ ३ १ २र ३ २ ३ १ २ ३ २
वि त्त्व दापो न पर्वतस्य पृष्ठा दुक्थेभिरग्ने जनयन्त देवाः।
३ १ २ ३ १ २ ३ १ २र ३ १ २
तं त्वा गिरः सुष्टुतयो वाजय न्त्याजिं न गिर्ववाहो
३ १ २
जिग्युरश्वाः ॥ ६८ ॥ (क)

पदपाठः। वि अ०। त्वत् ५। आपः १। न अ०। पर्वतस्य ६। पृष्ठात् ५। उक्थेभिः ३। अग्ने सं०। जनयन्त क्रि०। देवाः १। तम् २। त्वा २। गिरः १। सुष्टुतयः १। वाजयन्ति क्रि०। आजिम् २। न अ०। गिर्ववाहः सं०। जिग्युः क्रि०। अश्वाः १।

अन्वयः। हे अग्ने! देवाः उक्थेभिः त्वत् [तव सकाशात्] [आत्मनः कामान्] वि अजनयन्त, पर्वतस्य पृष्ठात् आपो न। हे गिर्ववाहः! [स्तोतारः] तं त्वा वाजयन्ति [अपि च] सुष्टुतयः गिरः [त्वां] जिग्युः, अश्वाः आजिं न।

भाष्यम्। हे 'अग्ने' भौतिक! परमात्मन्! वा 'देवाः' विद्वांसः स्तोतारः 'उक्थेभिः' वेदमन्त्रैः 'त्वत्' तव सकाशात् आत्मनः कामान् 'वि अजनयन्त' विविधान् जनयन्ति लभन्ते इति। अत्र दृष्टान्तमाह—'पर्वतस्य पृष्ठात् आपो न' मेघादुदकमिव। हे 'गिर्ववाहः' गीर्भिः प्रापणीय! स्तोतारः 'तं' पूर्वोक्तं 'त्वा' त्वां वाजयन्ति' बलिनं कुर्वन्ति, स्तुवन्ति, अन्नमिच्छन्तीति वा अपि च 'सुष्टुतयः' शोभनस्तुतिरूपाः 'गिरः' वाचः त्वां 'जिग्युः' जयन्ति, पुनर्दृष्टान्तमाह 'अश्वाः आजिं न' यथाऽश्वाः सङ्ग्रामं जयन्ति तद्वत्।

(क) ऋ० ४।६।१८॥ 'उक्थेभिरिन्द्रा नयन्त यज्ञैः। तं त्वाभिः सुष्टुतिभिर्वाजयन्त आजिं न जग्मु गिर्वाहो अश्वाः'॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निरुक्तम्। पर्ववान् पर्वतः। पर्व पुनः पृणातेः प्रीणाति वा ॥ १।२०।५ ॥ पर्वत इति मेघनाम ॥ २।२१।२ ॥ पृष्ठं स्पृशतेः संस्पृष्टमङ्गैः ॥ ४।३।२ ॥ वाजयतीत्यर्चमिकर्म्मा ॥ ३।१९।१ ॥ आजाविति सङ्ग्रामनाम ॥ ३।९।१९ ॥ आजिराजयनस्याजवनस्येति वा ॥ ९।२३।१ ॥

अथ सप्तमी।

गौतमो वामदेव ऋषिः। एकं वामदेव्यं साम, वामदेव ऋषिः, रौद्रं वा साम (वामदेव्यञ्च रौद्रं वा। आ० ब्रा०) त्रिष्टुप्। अग्निः। प्रातरनुवाके आश्विनशस्त्रे च विनियोगः।

२ ३ १ २ ३ १ २ ३१र २र ३ २ ३ १ २
आ वो राजान मध्वरस्य रुद्रꣳ होतारꣳ सत्ययजꣳ रोदस्योः।
३ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २ १
अग्निं पुरा तनयित्नोरचित्ता द्धिरण्यरूप मवसे कृणुध्वम् ॥ ६९ ॥ (क)

पदपाठः। आ अ०। वः ६। राजानम् २। अध्वरस्य ६। रुद्रम् २। होतारम् २। सत्ययजम् २। रोदस्योः ६। अग्निम् २। पुरा अ०। तनयित्नोः ५। अचित्तात् ५। हिरण्यरूपम् २। अवसे अ०। कृणुध्वम् क्रि०।

अन्वयः। अध्वरस्य राजानं होतारं रुद्रं रोदस्योः [मध्ये] सत्ययजं हिरण्यरूपम् अग्निं वः अवसे तनयित्नोः [इव] अचित्तात् पुरा आकृणुध्वम्।

भाष्यम्। हे मनुष्याः! यूयम् 'अध्वरस्य राजानं' हिंसारहितस्य यज्ञस्य स्वामिनं 'होतारं' होमनिष्पादकं, कर्मफलप्रापकं वा 'रुद्रं' दुष्टानां सन्तापकं 'रोदस्योः सत्ययजं' द्यावापृथिव्योः मध्ये

(क) ऋ० ३।४।२० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यथार्थं यष्टारं 'हिरण्यरूपं' सुवर्णप्रभं, ज्योतिर्मयं हितं रमणं च रूपं प्रकाशो यस्य तम् 'अग्निं' यज्ञाग्निं, परमेश्वरं वा 'वः' युष्माकम् 'अवसे' रक्षणाय 'तनयित्नोः' स्तनयित्नोरशनिरिवाकस्मिकादागमनशीलात् 'अचित्तात्' नास्ति चित्तं ज्ञानं यस्मिन् तस्मात् ज्ञानराहित्यान्मृत्योः 'पुरा' प्रागेव 'आकृणुध्वम्' हविर्भिः सम्यग्जुहुत, उपासीध्वं वा।

निरुक्तम्। रोदसीति द्यावापृथिव्योर्नाम ॥ ३।२१।७॥ अग्निरिति रूपोपमा—हिरण्यरूपः—हिरण्यवर्णस्येवास्य रूपम् ॥ ३।१६।८ ॥

अथाष्टमी।

वसिष्ठ ऋषिः। द्वे सामनी वैश्वज्योतिर्नामके (वैश्वज्योतिषे द्वे। आ० ब्रा०) त्रिष्टुप्। वैश्वानरोऽग्निः। प्रातरनुवाके आश्विनग्रहशस्त्रे विनियोगः।

३२उ ३ २३१र २र ३ २३१२३ १२ ३१२
इन्धे राजा समर्यो नमोभिः यस्य प्रतीक माहुतं घृतेन।
१२ ३१२ ३२३ १र २र३१२
नरो हव्येभि रीड़ते सबाध आग्नि रग्रमुषसामशोचि ॥ ७० ॥ (क)

पदपाठः। इन्धे क्रि०। राजा १। सम् अ०। अर्यः १। नमोभिः ३। यस्य ६। प्रतीकम् १। आहुतम् १। घृतेन ३। नरः १। हव्येभिः ३। ईड़ते क्रि०। सबाधः १। आ अ०। अग्निः १। अग्रम् १। उषसाम् ६। अशोचि क्रि०।

अन्वयः। राजा अर्यः अग्निः नमोभिः समिन्धे (=समिध्यते)। यस्य प्रतीकं घृतेन आहुतं [भवति यं च] सबाधः नरः हव्येभिः ईड़ते (=ईष्टे) [सोऽग्निः] उषसाम् अग्रम् आ अशोचि।

(क) ऋ० ५।२।११॥ 'अग्निरग्रे' ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भाष्यम्। 'राजा' स्वप्रकाशः 'अर्यः' स्वामी 'अग्निः' भौतिकः परमात्मा वा 'नमोभिः' अन्नै र्नमस्कारै र्वा 'समिध्ये' समिध्यते सम्यग्दीप्यते, प्रकाश्यते वा। 'यस्य' अग्नेः परमात्मनो वा 'प्रतीकं' स्वरूपं 'घृतेन' सर्पिषा, ध्यानरसेन वा 'आहुतं' सम्यक् प्रदीपितं सम्यग्ध्यातं वा भवति, यं च 'सवाधः' सञ्जातवाधः 'नरः' मनुष्यः हव्येभिः' हव्यैः हविर्भिः, आगमानुमानध्यानाभ्यासरसैर्वा 'ईड्ते' ईष्टे, स्तौति, सोऽग्निः परमेश्वरो वा 'उषसामग्रं' प्रत्यूषसि ब्राह्मे मुहूर्त्ते इति 'आ अशोचि' समन्तात्प्रकाशते, अग्निर्वेद्यां, परमात्मा च हृदीति भावः।

निरुक्तम्। अर्य इति ईश्वरनाम॥ ३।११।७॥ प्रतीकं प्रत्यक्तं भवति प्रतिदर्शनमिति वा॥ ७।३१।१॥

अथ नवमी।

त्वष्टृपुत्रस्त्रिशिरा ऋषिः। द्वे सामनी यामे (यामे द्वे। आ० ब्रा०) त्रिष्टुप्। अग्निः। प्रातरनुवाके आश्विनशस्त्रे आग्नेयक्रतौ च विनियोगः।

२ ३ १ २ ३ १ २ ३ १र २र ३ १ २
प्र केतुना बृहता याल्यग्नि रारोदसी वृषभो रोरवीति।
३ २ ३ १ २ ३ १र २र ३ २ ३ १ २ ३ १
दिव श्चिदन्ता दुपमा मुदान ड़पामुपस्थे महिषो
२
ववर्द्ध॥ ७१॥ (क)

पदपाठः। प्र अ०। केतुना ३। बृहता ३। याति क्रि० अग्निः १। आ अ०। रोदसी २। वृषभः १। रोरवीति क्रि०।

(क) ऋ० ७।९।३॥ दिवश्चिदन्ता उपमा॥ अथर्व० १८।३।३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दिवः ६। चित् अ०। अन्तात् ५। उपमाम् २। उदानट् क्रि०। अपाम् ६। उपस्थे ७। महिषः १। ववर्द्ध क्रि०।

अन्वयः। अग्निः बृहता केतुना रोदसी आ प्रयाति; वृषभः [इव] रोरवीति। दिवः चित् अन्तात् [मेघस्य] उपमाम् उदानट्; अपाम् उपस्थे महिषः सन् ववर्ध (=वर्धते) [च]।

आधियाज्ञिकम्। 'अग्निः' 'बृहता' महता 'केतुना' प्रज्ञापकेन चिह्नेन ज्वालारूपेणेति 'रोदसी' द्यावापृथिव्यौ प्रकाशाप्रकाशलोकौ 'आ' अभिव्याप्य 'प्रयाति' प्रकर्षेण गच्छति; 'वृषभः' (क) इव 'रोरवीति' भृशं रौति। 'दिवः' अन्तरीक्षलोकस्य 'चित्' अपि 'अन्तात्' पर्यन्तात् 'उपमां' मेघस्य समीपम् 'उदानट्' ऊर्द्ध्वं व्याप्नोति; 'अपां' वृष्टिलक्षणानां जलानाम् 'उपस्थे' क्रोड़े मध्ये वैद्युतात्मना 'महिषः' महान् सन् 'ववर्ध' वर्धते।

आध्यात्मिकम्। 'अग्निः' परमात्मा 'बृहता' महता 'केतुना' चिह्नेन विविधसृष्टिरचनागुणेन 'रोदसी' द्यावापृथिव्यौ 'आ' अभिव्याप्य 'प्रयाति' प्रकर्षेण गच्छति; 'वृषभः' (क) इव 'रोरवीति' शब्दात्मना वेदचतुष्टयेन भृशं रौति, पुनः पुनरुपदिशति। 'दिवः' अन्तरीक्षलोकस्य 'चित्' अपि 'अन्तात्' पर्यन्तात्, स्वप्रकाशस्वरूपेण सर्वत्रेति 'उपमाम्' उपमीयतेऽनया सैशशक्तिस्तां तया वा 'उदानट्' व्याप्नोति; 'अपां' कर्मणां श्रेष्ठतमानां यज्ञानामिति 'उपस्थे' उपस्थाने अनुष्ठाने इति 'महिषः' महान् सन् स परमेश्वरः 'ववर्ध' वर्द्धते, अस्मत्स्तुतिभिः प्रीतो भवतीति।

निरुक्तम्। वृषभो वर्षितापाम् ॥ ४।८।१ ॥ वृषभः प्रजां वर्षतीति वाति बहति रेत इति वा तद्वृषकर्मा वर्षणाद् वृषभः ॥ ८।२२।१ ॥ अन्तोऽततेः ॥ ४।२५।६ ॥ उपम इत्यन्तिकनाम ॥ ३।८।१७ ॥ उपस्थ उपस्थाने ॥ ७।२६।१ ॥ महिष इति महन्नाम ॥३।१३।५॥

(क) चत्वारि शृङ्गा त्रयो अस्य पादा, द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति, महो देवो मर्त्याँ आविवेश ॥ ऋ० ३।८।१० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ दशमी ।

वसिष्ठ ऋषिः । द्वे वैराजे सामनी इन्द्र ऋषिः, वसिष्ठः प्रजापतिर्वा, पूर्वस्य साम्नो राशीति नामापरस्य मरायमिति पूर्वस्य मरायं परस्य राशीति वा, स्फातिङ्करणे वा स्फातिः प्रसिद्धि वृद्धि वा तत्साधनहेतुभूते सामनी [प्रशस्तमिति पदस्य साम्नि विद्यमानत्वात्], च्यावने, शैखण्डिने, ऐन्वके वा च्यवनः, शिखण्डी, इन्वको वा ऋषिः (इन्द्रस्य वैराजे द्वे वसिष्ठस्य वा प्रजापतेर्वा राशिमरायि मरायराशिने वा स्फातिङ्करणे वा च्यावने वा शैखण्डिने वेन्वके वा । आ० ब्रा०) विराट् त्रिष्टुप् छन्दः । अग्निः । चतुर्वीराख्ययागस्य चतुर्थे दिवसे विनियोगः । कथं यज्ञार्थमग्निरुत्पादनीय इत्यनेन सूचितं वा ।

३ २ ३ १ २ ३२ ३ १ २
अग्निं नरो दीधितिभि रण्यो र्हस्तच्युतं जनयत
३ २ ३ १२ ३ १२ ३ २
प्रशस्तम् । दूरेदृशं गृहपतिं मथव्युम् ॥ ७२ ॥ (क)

पदपाठः । अग्निम् २ । नरः १ । दीधितिभिः ३ । अरण्योः ६ । हस्तच्युतम् २ । जनयत क्रि० । प्रशस्तम् २ । दूरेदृशम् २ । गृहपतिम् २ । मथव्युम् २ ।

अन्वयः । नरः दीधितिभिः [योक्त्रमुत्तरारणिञ्च परिगृह्य] अरण्योः [सकाशात्] हस्तच्युतं प्रशस्तं दूरेदृशं गृहपतिम् मथव्युम् अग्निं जनयत (= जनयन्ति) ।

आधियाज्ञिकम् । 'नरः' मनुष्याः ऋत्विजः 'दीधितिभिः' अङ्गुलिभिः योक्त्रं परिगृह्य, उत्तरारणिञ्च 'अरण्योः' सकाशात् 'हस्तच्युतं' हस्ताभ्यां जातं 'प्रशस्तं' प्रशस्यं 'दूरेदृशं' दूरेदर्शनं 'गृहपतिं' गार्हपत्यनामकम् 'मथव्युम्' अतनवन्तं, गमनवन्तमिति 'अग्निं' 'जनयत' जनयन्ति ।

(क) ऋ० ५।१।२३ ॥ 'हस्तच्युतो जनयन्त' 'मथर्युम्' ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आध्यात्मिकम् । 'नरः' मनुष्या मननशीलाः 'दीधितिभिः' दीपिकाभि र्ध्यानधारणासमाधिरूपाभिः, 'अरण्योः' अरणिसदृशयोरात्मप्रणवयोः सकाशात् [आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम्। ज्ञाननिर्मथनाभ्यासात् पापं दहति पण्डितः॥ कैवल्योपनि० १।११] 'हस्तच्युतं' हस्तयोर्ध्यानसमाधिरूपयोश्च्युतमुत्पादितं प्रत्यक्षीकृतमिति 'प्रशस्तं' प्रशस्यं 'दूरेदृशं' दूरे विद्यमानमन्तिके च 'गृहपतिं' गृहस्य ब्रह्मपुरः शरीरस्य पतिं पालकम् 'अथव्युम्' अतनवन्तं व्याप्तिमन्तम् 'अग्निं' प्रकाशरूपमीश्वरं 'जनयत' जनयन्ति, प्रत्यक्षीकुर्वन्तीति।

निरुक्तम् । दीधितय इति अङ्गुलिनाम ॥ ३।८।४ ॥ दीधितयोऽङ्गुलयो भवन्ति धीयन्ते कर्मस्वरणी प्रत्यृत एने। अग्निः समरणाज्जायत इति वा। जनयन्त प्रशस्तं दूरेदर्शनं गृहपतिमतनवन्तम् ॥ ५।१०।१ ॥

अथ व्याकरणम् ।

अयम् (७०)—'अगि' गतौ भ्वा० प० सै० 'ऋज्रेन्द्राग्र०' उ० २।२८ इति रन्। १मा।

अचित्तात् (६९)—'चिती' संज्ञाने भ्वा० प० सै० भावे क्तः, 'श्वीदितो निष्ठायाम्' ७।२।१४ इतीण् निषेधः। नास्ति चित्तं यस्य तदचित्तं ज्ञानराहित्यं मृत्युरिति तस्मात्। ५मी।

अजीजनत् (६४)—'जनी' प्रादुर्भावे दि० णिजन्तः लुङि।

अथव्युम् (७२)—अततेः युस् बाहुलकात् धातोरथादेशः वकारागमश्च। अत+युः, अथ+युः अथव्युः। तम्।

अधा (६४)—अधः।

अनूधाः (६४)—'वह' प्रापणे भ्वा० 'श्वेः सम्प्रसारणं च' उ० ४।१९३, बाहुलकात्, वहति यत् इति ऊधः। असुन् प्रत्ययः, धातोः सम्प्रसारणे कृते दीर्घत्वं धकारश्चादेशः। 'ऊदी' क्लेदने धातौ वा। नास्ति ऊधो यस्याः सा 'ऊधसोऽनङ्' ५।४।१३१ ऊधोऽन्तस्य बहुव्रीहेरनङादेशः स्यात् स्त्रियाम्। १मा।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अन्तात् (७१)—'अम' गतौ भ्वा० प० से० 'हसि०' उ० ३।८६ इति तन्॥ 'अमेस्तुट् च' उ० ५।६० इति अरन् तुट् च॥ 'अति' वन्धने भ्वा० प० से० अन्तति पचाद्यच्वा। ५मी।

अन्वेति (३४)—अनु + 'इण्' गतौ अ० प० लटि उपसर्गेण समासः।

अर्यः (७०)—'ऋ' गतौ, अर्य्यते। 'अर्यः स्वामिवैश्ययोः' ३।१।१०३ इति यत्। १मा।

अर्हते (६६)—'अर्ह' पूजायाम् भ्वा० प० से० अर्हति, 'अर्हः प्रशंसायाम्' ३।२।१३३ इति शतः अर्हन् पूज्यः तस्मै।

आ (७०)—'आप्लृ' व्याप्तौ स्वा० क्विप्, पृषोदरादित्वात् पलोपः। अभिव्याप्य।

आक्रमुध्वम् (६९)—आ + 'क्रञ्' हिंसायाम् स्वा० उ० अनि० लोट् ध्वम्। अनेकार्थत्वात्साधुः।

आजिम् (६८)—'अज' गतिक्षेपणयोः भ्वा० 'अज्यतिभ्यां च' उ० ४।१३१ इतोन्, बाहुलकादजेर्वीभावो न। अजन्ति क्षिपन्ति शस्त्रादिकं यत्र स आजिस्तम्।

आजुहोता (६३)—आ + 'हु' लोट् जुहुत। 'तप्तनप्०' ७।१।४५, अन्येषामपीति दीर्घः।

आववचत् (६४)—आ + वक्ते र्वहते र्वा साभ्यासात् लिट् तिप् शपः शुः।

आशोचि (७०)—आ + 'शुच' शोके भ्वा० प० लुङ् कर्मणि। धातूनामनेकार्थत्वात्साधुः।

आसन् (६७)—'स्यन्दू' प्रस्रवणे भ्वा० आस्यन्दतेऽन्नादिना प्रस्रवति, आस्यन्दतेऽन्नादिना द्रवीक्रियते अन्येभ्योऽपीति डः। 'असु' क्षेपणे दि० अस्यते वर्णो येन, अस्यते आसोऽस्मिन् वा 'कृत्यल्युटो०' ३।३।११३ इति ण्यत्। 'पदन्नोमास्०' ६।१।६३ इति आसस्य असन्नादेशः 'सुपां सुलुक्०' ७।१।३९ इति द्वितीया विभक्तेर्लुक्।

इडस्पदे (६३)—'ईड' स्तुतौ अ० + क्विप् इडस्य। 'पद' गतौ दि० अच् घञ् वा। इडः पदे 'इडाया वा' ८।३।५४ इति विसर्गस्य सः पतिपुत्रादिषु परेषु। ७मी।

ईडते (७०)—'ईड' स्तुतौ अ० लट् प्रथम पु० बहुव०। व्यत्ययेन।

उक्थेभिः (६८)—बहुलं छन्दसीति भिस ऐसभावः।

उदानट् (७१)—उद + 'अशू' व्याप्तौ सङ्घाते च स्वा० लिटि (आनशे) एलोपः 'ब्रश्च भस्ज०' ८।२।३६ इति शान्तस्य षकारोऽन्तादेशश्चुलम्।

उपमाम् (७१)—उप + 'माङ्' माने जु० भावे करणे वाङ् टाप्। उप + मीनातेः (मीञ् हिंसायाम् स्वा०) उपक्षिपते ह्यनिकम्। २या।

उपस्थे (७१)—उप पूर्वात्तिष्ठतेः 'सुपि स्थः' ३।२।४ इति कः। अर्चर्चादिः २।४।३१।

एधि (३५)—अस्तेर्लोटि मध्यमैकवचने 'घ्वसोरेद्धावभ्यासलोपश्च' ६।४।११९ घोरसंज्ञ एत्वं स्यात्तौ परे अभ्यासलोपश्च। आमोयत्वेन एत्वस्यासिद्धत्वाद्वेर्धिः। 'यसोरल्लोपः' ६।४।१११ इत्यल्लोपः।

गिर्वणाः (६८)—वन + घञ् गीर्भिर्वनन्तीति। वकारागमो व्यत्ययेन।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

घृतेन (७०)—'घृ' सेचने भ्वा० प० से०। 'अचिघृसिभ्यः क्तः' उ० ३।८९। जिघर्ति सञ्चलति दीप्यते वा तद्घृतं तेन।

चरन् (६४)—चरतेः शतृः।

जनयत (७२)—जनयन्ति।

जनयन्त (६७)—जनयन्ति।

जनिवे (६५)—जायतेः 'सर्वधातुभ्यः ष्ट्रन्' उ० ४।१५९ इति ष्ट्रन्। ७मी।

जिग्युः (६८)—'जि' जये भ्व० प०। 'छन्दसि लुङ्लङ्लिटः' ३।४।६ इति सामान्ये लिट्।

तनयित्नोः (६९)—'स्तनिहृषि०' उ० ३।२९ इति ण्यन्तादित्नुच्। 'अयामन्ता०' ६।४।५५ आम, अन्त, आलु, आय्य, इत्नु, इष्णु, एषु णेरयादेशः स्यात्। स्तनयति शब्दयतीति स्तनयित्नुः। व्यत्ययेन सलोपः। तस्मात्।

तन्वे (६५)—चतुर्थी।

तरुणस्य (६४)—'तॄ' प्लवनसन्तरणयोः भ्वा० 'त्रो रश्च लो वा' उ० ३।५४ इति उनन्। तरतीति। तस्य।

त्वत् (६८)—तनोतेः 'तनोतेरनश्वः' उ० २।६३ चात् क्विप् तुक्। ५मी।

दीधितिभिः (७२)—'दीधिङ्' दीप्तिदेवनयोः अ० आ० से० 'क्विच् क्तौ च०' ३।३।१७४ इति क्विच्। ताभिः।

दूत्यम् (६४)—'दूत्यस्य भागकर्म्मणी' ४।४।१२० इति यत्। दूतस्य भागोंऽशः कर्म चेति दूत्यं तत् स्वा।

दूरेदृशम् (७२)—दूरे [५द] दृश्यतेऽसौ दूरेदृक् [३द] तम्।

धातवे (६४)—'धेट्' पाने भ्वा० प० अनि०। तुमर्थे तवेन् प्रत्ययः। धातवे धातुं पातुम्।

परः (६५)—लिङ्गव्यत्ययेन पुंस्त्वम्। परम्=अपरम्।

पर्वतस्य (६८)—'पर्व' पूरणे भ्वा० प० से०। 'भृमृदृशि०' उ० ३।११० इति अतच्। पर्वति पूर्णो भवतीति तस्य॥ पर्व विद्यतेऽस्मिन्निति मत्वर्थीतस्तकारप्रत्ययो वा।

पस्त्यानाम् (६३)—अप+स्त्यै शब्दसङ्घातयोः भ्वा० प० अनि० स्त्यायति। आतश्चोपसर्गे इति कः, पृषोदरादित्वात्साधुः।

पुरा (६९)—'पुर' अग्रगमने तु०। कः। टाप्। अव्ययसंज्ञा।

पृष्ठात् (६८)—'पृषु' सेचने भ्वा० प० से 'तिथपृष्ठ०' उ० २।१२ इति थक्। पर्वति सिञ्चति यो येन वा तत्पृष्ठं तस्मात्।

प्रतीकम् (७०)—प्रत्येति प्रतीयते वा। प्रति+इण्+ईकन्।

प्रमतिः (६६)—मन्यतेऽनया। मन ज्ञाने दि०। क्तिन्। प्रकृष्टा मतिः कर्मधा०।

प्रशस्तम् (७२)—प्रपूर्वात् शंसतेः क्तः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भद्रां (६९)—'भदि' कल्याणे सुखे च भ्वा० आ० से० भन्दते, 'ऋजेन्द्रा०' उ० २।२८ इति रन् नलोपश्च निपात्यते।

मनीषशा (६६)—'ईष' गतिहिंसादर्शनेषु भ्वा० आ० से०। इगुपधेति कः। करणे 'गुरोश्चहलः' ३।३।१०३ इति अकारो वा। ईषणमीषा, टाप्। मनस ईषा 'शकन्ध्वादिषु०' वा० इति सिद्धं तया।

मर्जयध्वम् (६३)—'मृज' शुद्धौ अ० प० अनि० धातोर्णिचि लोण्मध्यमबहुवचने। 'मृजेर्वृद्धिः' ७।२।११४ इति तु क्ङिति वेति भाष्यवार्त्तिककारमते न विकल्पात्पाक्षिको वृद्धाभावः।

महि (६४)—मह पूजायाम् भ्वा० ण्यन्तादच इः।

महिषः (७१)—मह्यते: 'अविमह्योः इषच्' उ० १।४५ इति इषच्।

मा (६६)—'माङ्' माने दि० क्विप्, सम्पदादित्वात्, निषेधेऽव्ययम्।

यजतम् (६३)—यजते: 'भृमृदृशियजि०' उ० ३।११० इति अतच्। तम्।

रातहव्यम् (६३)—रातं दत्तं हव्यं हवि यस्मै तम्।

रिषामा (६६)—'रिष' हिंसायाम् भ्वा० प० वे० लिङि रेषेम। एकारयोरिकाराकारौ दीर्घश्च।

रोदस्योः (६९, ७१)—रोदितीति रोदः—असुन् 'पिद्गौरादिभ्यश्च' ४।१।४१ इति ङीष्। तयोः।

रोरवीति (७१)—रौते यङ्लुकि।

वक्षथः (६४)—वहेरौणादिकोऽथप्रत्ययः 'शीङ्शपि०' उ० ३।११३ इति वत्।

वाजयन्ति (६८)—वाज इति अन्ननाम बलनाम च। तस्य नामधातुत्वे रूपम्।

वृषभः (७१)—'वृषु' सेचने भ्वा० प० 'ऋषिवृषिभ्यां कित्' उ० ३।१२२ इत्यभच्। वर्षतीति वृषभः।

वैश्वानरम् (६७)—विश्वं जगत् नृणाति नयतीति विश्वानरः 'नरे संज्ञायाम्' ६।३।१२९ इति दीर्घः। विश्वानरस्यापत्यम् 'ऋष्यन्धक०' ४।१।११४ इत्यण्॥ गोत्रापत्ये अनृष्यानन्तर्ये०' ४।१।१०४ इत्यञ् वा॥ यद्वा 'तस्यै हितम्' ५।१।५ इत्यण्।

शिशीः (६४)—'शी' तनूकरणे दि० 'शः कित् सन्वच्च' उ० १।२० कित्वान्न वृद्धिः सन्वत्वाद्द्वित्वं च। शयति तनूकरोति पित्रीः शरीरमिति।

सख्ये (६६)—'सख्यु र्यः' ५।१।१२६ इति यः, सख्युर्भावः कर्म वा। तस्मिन्।

सत्ययजम् (६९)—सत्यं यथार्थं यजति यस्मै।

सपर्यता (६३)—'सपर' पूजायाम् कण्ड्वादित्वाद्यक्। 'ऋचि तुं नु०' ६।३।१३३ इति दीर्घः।

सबाधः (७०)—'बाधृ' लोडने भ्वा० अच्। बाधेन सह वर्त्तमानः।

सम्महेमा (६६)—सम्+मह लिङ् महेम, वाचोऽतस्लिङ इति दीर्घः।

संविशस्व (६५)—सम्पूर्वात् विशतेः व्यत्ययेनात्मनेपदम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संवेशनः (६५)—सम् विश + ल्युट्। सम्यक् प्रवेष्टा।

संसदि (६६)—सम् + षद + क्विप्, सम्पदादित्वात् संसीदन्त्यस्यामिति तस्याम्।

सुष्टुतयः (६८)—सु + स्तुतयः ('ष्टुञ्' स्तुतौ + क्तिन्)। 'उपसर्गात्०' ८।३।३५ इति षत्वम्।

हरुच्युतम् (७२)—'हसिमृगिण्०' उ० ३।८६ हसतीति हरुः। हन्तेर्वा। 'च्युङ्' गतौ क्ताः, गत्यर्थाकर्मकेति कर्त्तरि क्तो वा। हरुभ्यां च्युतम्।

हिरण्यरूपम् (६९)—हृञ् हरणे। 'हर्यतेः कन्यन् हिर् च' उ० ५।४४ इति कन्यन् हृञो हिरादेशश्च। रुशब्दे। 'खर्यशिल्प०' उ० ३।२८ इति निपात्यते। हिरण्यरूपमिव रूपं यस्य तम्।

इति सप्तमो दशतिः सप्तमः खण्डश्च।

प्रथमम् (आग्नेयं) पर्व। प्रथमोऽध्यायः। प्रथमः प्रपाठकः। अष्टमः खण्डः। अष्टमो दशतिः।

अथ प्रथमा।

बुधगविष्ठिरौ द्वौ ऋषी। श्यैनं साम श्येनर्षिः श्यैतं, शयनं, शायनं वा साम्नो नाम, यद्वा दीर्घायुष्यं साम प्रजापतिर्ऋषिः (श्येनस्य श्यैनं वा श्यैतं वा शयनं वा प्रजापतेर्वा दीर्घायुष्यम्। आ० ब्रा०) त्रिष्टुप्। अग्निः। आग्नेयक्रतौ आश्विनशस्त्रे विनियोगः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १
अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषा-
२ ३ २ ३ १ ३ २ ३ १ २ ३ २ ३ १ २
सम्। यह्वा इव प्र वया मुज्जिहानाः प्र भानवः
३ २ ३ १ २
सस्रते नाकमच्छ ॥ ७३ ॥ (क)

पदपाठः। अबोधि क्रि०। अग्निः १। समिधा ३। जनानाम् ६। प्रति अ०। धेनुम् २। इव अ०। आयतीम् २। उषासम् २। यह्वाः १। इव अ०। प्र अ०। वयाम् २। उज्जिहानाः १। प्र अ०। भानवः १। सस्रते क्रि०। नाकम् २। अच्छ अ०।

अन्वयः। अग्निः जनानां समिधा अबोधि, उषासं प्रति आयतीं धेनुम् इव। [तस्याग्नेः] भानवः नाकम् अच्छ प्र सस्रते, वयां प्रोज्जिहानाः यह्वा इव।

भाष्यम्। 'अग्निः' यज्ञाग्निः परमात्मा वा 'जनानां' यजमानानामुपासकानां वा 'समिधा' इन्धनेन साधनेन योगानुष्ठानेन वा 'अबोधि' बुध्यते प्रकाश्यते, अत्र दृष्टान्तमाह— 'उषासं प्रति' प्रातःकाले, 'आयतीम्' आगच्छन्तीं 'धेनुमिव' दुग्धप्रदां गामिव, यथा धेनुः प्रत्यूषसि अग्निहोत्रार्थं पयोदानाय प्रबुध्यते तथा ब्राह्ममुहूर्तेऽग्निः समिध्यते परमात्मा चोपास्यते। तस्याग्नेः परमेश्वरस्य वा 'भानवः' रश्मयः, ज्वालासमूहा विभूतयो वा 'नाकं' द्युलोकमविद्यमानदुःखं परमपदं वा 'अच्छ' आभिमुख्येन 'प्रसस्रते' प्रसरन्ति, पुनरत्रदृष्टान्तमाह—'वयां' शाखां 'प्रोज्जिहानाः' विस्तारयन्त 'यह्वाः' महान्तः वृक्षाः 'इव', यथा महान्तस्तरवः शाखां विस्तार्य ऊर्ध्वमन्तरिक्षे व्याप्नुवन्ति तथाग्नेर्ज्वालासमूहाः द्युलोके विस्तृणन्ति परमात्मनो विभूतयश्च स्वस्वरूपे प्रसरन्तीति भावः।

(क) ऋ० ३।८।१२॥ 'सिस्रते'॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निरुक्तम् । वया: शाखा वेतेर्वातायना भवन्ति ॥ १।४।१९ ॥

अथ द्वितीया ।

वत्सप्रि ऋषिः । एकं वासुक्रं साम वसुक्र ऋषिः (वासुक्रं च । आ० ब्रा०) त्रिष्टुप् । अग्निः । प्रातरनुवाके आश्विनशस्त्रे च विनियोगः ।

२ ३ १ २ ३१ २ ३ ३ ३ १र २र ३ २ ३ १ २
प्र भू र्जयन्तं महां विपोधां मूरैरमूरं पुरां दर्म्माणम् ।
१ २ ३ २ ३१र २र ३ १ २ ३ १र २र
नयन्तं गोभिर्वना धियं धाः हरिश्मश्रुं न वर्मणा
३ २
धनर्चिम् ॥ ७४ (क)

पदपाठः । प्र भूः क्रि० । जयन्तम् २ । महां २ । विपोधाम् २ । मूरैः ३ । अमूरम् २ । पुराम् ६ । दर्म्माणम् २ । नयन्तम् २ । गोभिः ३ । वना २ । धियम् २ । धाः क्रि० । हरिश्मश्रुम् २ । न अ० । वर्मणा ३ । धनर्चिम् २ ।

अन्वयः । हे स्तोतः ! जयन्तं महां (=महान्तं) विपोधां मूरैः [अधिष्ठितानां] पुरां दर्म्माणम् अमूरम् [अग्निं] स्तोतुं प्रभूः । [अपि च त्वं] वना (=वननीयं) [धनानि] नयन्तं हरिश्मश्रुं न [तेजोमयं] वर्मणा [उपेतं] धनर्चिम् [अग्निम्] [उद्दिश्य] गोभिः धियं धाः (=अधाः)।

भाष्यम् । हे स्तोतः ! त्वं 'जयन्तं' दुष्टरोगस्य भावस्य वा नाशकं 'महां' महान्तं 'विपोधां' मेधाविरक्षकं 'मूरैः' मूढैः अज्ञानिभिः अधिष्ठितानां 'पुरां' शरीराणां 'दर्माणम्' आदरेण रक्षकम्

(क) ऋ० ८।१।१ ॥ 'मूरा अमूरं' 'नयन्तो गर्भं वना धियं धा हरिश्मश्रुं नार्वाणं धनर्चिम्' ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

'अमूरम्' अमूढं सर्वदा देदीप्यमानं सर्वज्ञं वाग्निं परमात्मानं वा 'स्तोतुं' 'प्रभूः' समर्थो भव। अपि च त्वं 'वना' वननीयं सम्भजनीयं 'नयन्तं' धनानि प्रापयन्तं 'हरिश्मश्रुं न' हरिः सूर्यस्तस्य श्मश्रुं किरणमिव तेजोमयं 'वर्मणा' कवचस्थानीयज्वालया रक्षणेन वोपेतं 'धनर्चिं' प्रीणनकरस्तोत्रमग्निं परमात्मानं वोद्दिश्य 'गौर्भिः' स्तुतिरूपाभिर्वेदवाग्भिः 'धियं' परिचरणरूपं कर्म 'धाः' विधेहि।

निरुक्तम्। विप इति मेधाविनाम॥ ३।१९।२॥ मूरा मूढाः, अमूरोऽमूढः॥ ६।८।४॥

अथ तृतीया।

भरद्वाज ऋषिः। एकं पौषं साम (पौषं च। आ० ब्रा०) त्रिष्टुप्। पूषा देवता। चातुर्मास्येषु विनियोगः।

३ १ २ ३ १ २ ३ १ ३ ३ १ २र ३ १ २ ३ १ २
शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरि-
२ ३ २ ३ १र २र ३ १ २
वासि। विश्वा हि माया अवसि स्वधावन् भद्रा ते
३ २ ३ १ २
पूषन्निह रातिरस्तु॥ ७५॥ (क)

पदपाठः। शुक्रम् १। ते ६। अन्यत् १। यजतम् १। ते ६। अन्यत् १। विषुरूपे ७। अहनी १। द्यौः १। इव अ०। असि क्रि०। विश्वाः २। हि अ०। मायाः २। अवसि क्रि०। स्वधावन् सं०। भद्रा १। ते ६। पूषन् सं०। इह अ०। रातिः १। अस्तु क्रि०।

अन्वयः। हे स्वधावन्! पूषन्! [अग्ने! त्वं] द्यौः इव असि; ते अन्यत् (=एकं) [रूपं] शुक्रं यजतम् अन्यत् ते [कृष्णम् अयजतम्, एवम्भूते] विषुरूपे अहनी (=अहोरात्रे)

(क) ऋ० ४।८२४। 'स्वधाव'॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[भवतः]। [त्वं] हि विश्वाः मायाः अवसि, ते भद्रा रातिः इह अस्तु।

आधियाज्ञिकम् हे 'स्वधावन्' अन्नवन्! 'पूषन्' पुष्टिकर्त्तः! सूर्यरूपाग्ने! त्वं 'द्यौः इव' सर्वमावृत्य प्रकाशकः 'असि' 'ते' तव 'अन्यत्' एकं रूपं 'शुक्रं' शुक्लवर्णं 'यजतं' यज्ञार्हम् 'अन्यत् 'ते' तव कृष्णमयजतमयज्ञार्हमिति, एवम्भूते 'विषुरूपे' विषमरूपे शुक्लकृष्णवर्णे 'अहनी' अहोरात्रे भवतः, उदयेन शुक्लमहोऽस्तमयेन कृष्णां रात्रिं करोषि। त्वं 'हि' 'विश्वाः' सर्वाः 'मायाः' प्रज्ञाः प्रज्ञावतामिति 'अवसि' पालयसि, 'ते' तव 'भद्रा' कल्याणीया 'रातिः' दानक्रिया 'इह' अस्मिंल्लोके अस्मान् प्रति अस्तु।

आध्यात्मिकम्। हे 'स्वधावन्' अन्नवन्! 'पूषन्' पुष्टिकर्त्तः! परमात्मन्! त्वं 'द्यौरिवासि' सर्वमावृत्य वर्त्तसे स्वप्रकाशरूपोऽसि 'ते' तव 'अन्यत्' एकं रूपं 'शुक्रं' शुक्लगतिरूपं देवयानाख्यं 'यजतं' सङ्गमनीयं विद्वद्भिः सम्यक् प्राप्तव्यम् 'अन्यत्' 'ते' तव कृष्णगतिरूपं पितृयानाख्यमयजतमसङ्गमनीयं मुमुक्षुभिस्त्याज्यम्, एवम्भूते 'विषुरूपे' विषमरूपे शुक्लकृष्णगतिरूपे 'अहनी' अहोरात्रे देवयानपितृयानरूपे भवतः। हे भोगापवर्गप्रद! पूषन्! त्वं 'हि' 'विश्वाः मायाः' सर्वाः प्रज्ञाः प्रज्ञावतामिति 'अवसि' पालयसि, 'ते' तव 'भद्रा' कल्याणीया प्रशस्या 'रातिः' मोक्षप्रदा दानक्रिया 'इह' अस्मिंल्लोके अस्मभ्यमस्तु [हे सूनो अशृण्वं पितृणामहं देवानामुत मर्त्यानाम्। आभ्यामिदं विश्वमेजत् समेति यदन्तरा पितरं मातरं च॥ यजुः १९।४७॥ पापपुण्यफलभोगाय संसारेऽस्मिन् द्वौ मार्गौ स्तः। प्रथमो देवयानाख्यो 'देवानां' विदुषां द्वितीयः पितृयानाख्यो 'मर्त्यानां' विद्याविज्ञानरहितानां मनुष्याणाम्। यया मोक्षाख्यं पदं लब्ध्वा जन्ममरणाकुलात् संसाराद् विमुच्यते सा देवयानाख्या सृतिर्मुमुक्षुभिरभिलषिता। यया तु पितृभ्यां देहं धृत्वा पापपुण्यफले सुखदुःखे पुनःपुनर्भुज्येते सा सृतिः पितृयानाख्या।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निरुक्तम्। शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिव चासि सर्वाणि प्रज्ञानान्यवस्यन्नवन् भाजनवती ते पूषन्निह दत्तिरस्तु॥ १२।१७।१॥ अथ यद्रश्मिपोषं पुष्यति तत् पूषा भवति॥ १२।१६।२॥

अथ चतुर्थी।

विश्वमित्र ऋषिः। कौत्सं साम कुत्स ऋषिः (कौत्सं च। आ० ब्रा०) त्रिष्टुप्। अग्निः। प्रातरनुवाके आश्विनशस्त्रे च विनियोगः।

१ २ ३ २ १ ३ १र २र ३ १र २र
इड़ा मग्ने पुरुदꣳससꣳ सनिं गोः शश्वत्तमꣳ हवमानाय
१ २ ३ १र ३ २उ ३ १ २
साध। स्यान्नः सूनु स्तनयो विजावा ग्ने! सा ते
३ १ २ ३ २
सुमति र्भूत्वस्मे॥ ७६॥ (क)

पदपाठः। इड़ाम् २। अग्ने सं०। पुरुदंससम् २। सनिम् २। गोः ६। शश्वत्तमम् २। हवमानाय ४। साध क्रि०। स्यात् क्रि०। नः ६। सूनुः १। तनयः १। विजावा १। अग्ने सं०। सा १। ते ६। सुमतिः १। भूतु क्रि०। अस्मे ४।

अन्वयः। हे अग्ने! [त्वं] पुरुदंससं गोःसनिम् इडां शश्वत्तमं हवमानाय साध। नः सूनुः तनयः स्यात् [तथा] ते सुमतिः विजावा [सती] अस्मे भूतु।

भाष्यम्। हे 'अग्ने' भौतिक! परमात्मन्! वा त्वं 'पुरुदंससं' बहुकर्माणं 'गोः सनिं' गवादिपशूनां ज्ञानस्य वा सम्पादयित्रीम् 'इड़ां' प्रशंसनीयां वाचं 'शश्वत्तमं' निरन्तरं 'हवमानाय' यजमानायोपासकाय वा 'साध' प्रापय। हे अग्ने तव कृपया 'नः'

(क) ऋ० ३।१।२, १५, २२, २३॥ २।८।२५, २७॥ ३।८।१६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अस्माकं 'सूनुः' पुत्रः 'तनयः' पौत्रो विद्यासुखप्रचारकः स्यात् भवतु 'ते' तव 'सुमतिः' अनुग्रहात्मिका बुद्धिः 'विजावा' विविधप्रकाशयुक्ता, अवन्ध्या वा सती 'अस्मे' अस्मभ्यं 'भूतु' भवतु।

निरुक्तम् सूनुरित्यपत्यनाम ॥ ३।१।३ ॥

अथ पञ्चमी।

वत्सप्रि ऋषिः। हे सामनी काश्यपे, कश्यप ऋषिः (काश्यपे हे। आ० ब्रा०) त्रिष्टुप्। अग्निः। प्रातरनुवाके आश्विनशस्त्रे च विनियोगः।

१र २र १ २ ३१ २ ३ २ ३ १ २ १ २ ३ २
प्र होता जातो महान्नभोविन् नृषद्मा सीददपां विवर्त्ते।
२ ३ २ ३ २ ३ १र २र ३ १र २र ३ १
दधद्यो धायी सु ते वयाꣳसि यन्ता वसूनि विधते
२ ३ २
तनूपाः ॥७७॥ (क)

पदपाठः। प्र अ०। होता १। जातः १। महान् १। नभोवित् १। नृषद्मा १। सीदत् क्रि०। अपाम् ६। विवर्त्ते ७। दधत् १। यः १। धायी १। सु अ०। ते ४। वयांसि २। यन्ता १। वसूनि २। विधते ४। तनूपाः १।

अन्वयः। यः [अग्निः] अपां विवर्त्ते प्रसीदत्, [स इदानीं] होता जातः महान् नभोवित् नृषद्मा दधत् सुधायी तनूपाः भवति [सः] ते वयांसि वसूनि च यन्ता [भवतु]।

भाष्यम्। 'यः' अग्निः परमेश्वरो वा 'अपां विवर्त्ते' अन्तरिक्षस्य विवर्त्तने उत्सङ्गे वैद्युतात्मना, यज्ञादिकर्मणां समीपे वा 'प्रसीदत्' प्रसीदति, स इदानीं यजनशीलस्य 'होता' होमनिष्पा-

(क) ऋ० ८।१।१॥ 'नृषद्मा सीददपामुपस्थे। दधि यो धायि स ते'।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दकः, हव्यफलप्रापको वा 'जातः' प्रादुर्भूतः, प्रसिद्धो वा 'महान्' सद्गुणैः पूज्यः 'नभोवित्' अन्तरिक्षस्य वेत्ता 'वृषभ्रा' वृषु सोदति स जाठराग्निरूपः, अन्तर्यामी वा 'दधत्' हवींषि सर्वं जगद्वा धारयन् 'सुधायी' वेद्यां सुनिहितः, शोभनो धाता वा 'तनूपाः' शरीररक्षकः भवति। सोऽग्निर्भौतिकः परमात्मा वा 'विधर्ते' परिचरते 'ते' तुभ्यं यजमानायोपासकाय वा 'वयांसि' अन्नानि सुखानि वा 'वसूनि' धनानि च 'यन्ता' नियमयिता, प्रदाता भवतु।

अथ षष्ठी।

वसिष्ठः ऋषिः। एकं साम आङ्गिरसो घृताचि ऋषिः (घृताचेराङ्गिरसस्य साम। आ० ब्रा०) त्रिष्टुप्। अग्निः। विनियोगस्तु लौकिकः।

२ ३ २ ३ १ २ २ २ ३ १ २ ३ १ २ ३ १ २
प्र सम्राज मसुरस्य प्रशस्तं पुꣳसः कृष्टीना मनुमाद्यस्य।
१ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
इन्द्रस्येव प्र तवसस्कृतानि वन्दद्वारा वन्दमाना विवष्टु ॥ ७८ ॥ (क)

पदपाठः। प्र अ०। सम्राजम् २। असुरस्य ६। प्रशस्तम् २। पुंसः ६। कृष्टीनाम् ६। अनुमाद्यस्य ६। इन्द्रस्य ६। इव अ०। तवसः ६। कृतानि २। वन्दद्वारा २। वन्दमाना २। विवष्टु क्रि०।

अन्वयः। [हे स्तोतः! भवान्] असुरस्य पुंसः कृष्टीनां [च] अनुमाद्यस्य तवसः इन्द्रस्य इव [अग्नेः] प्रशस्तं सम्राजं [तेजः प्रस्तौतु] तथा वन्दद्वारा (=वन्दद्वाराणि) वन्दमाना (=वन्द्यमानानि) कृतानि प्र विवष्टु।

भाष्यम्। हे स्तोतः! भवान् 'असुरस्य पुंसः' बलवतः पुरुषस्य 'कृष्टीनां' मनुष्यमात्राणां च 'अनुमाद्यस्य' स्तुत्यस्य 'तवसः

(क) ऋ० ५।२।९ 'सम्राजो असुरस्य प्रशस्तिम्' 'वन्दे दारं वन्दमानो विवक्षि'।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इन्द्रस्य इव' शक्तिमतः सूर्य्यस्य इव अग्ने भौतिकस्य परमात्मनो वा 'प्रशस्यम्' उत्कृष्टं 'सम्राजं' सम्यग् राजमानं तेजः स्वरूपं वा प्रस्तौतु। तथा 'वन्दद्वारा' वन्दद्वाराणि स्तुतिप्रमुखानि 'वन्दमाना' वन्द्यमानानि सर्व्वैः स्तूयमानानि 'कृतानि' कर्म्माणि 'प्र विवष्टु' प्रकर्षेण कामयताम्।

निरुक्तम्। पुमान् पुरुमना भवति। पुंसते र्वा ॥ ८।१५।१ ॥

अथ सप्तमी।

विश्वामित्र ऋषिः। एकं प्रासाहं साम, भरद्वाज ऋषिः भरद्वाजस्य प्रासाहम्। आ० ब्रा०) त्रिष्टुप्। अग्निः। वरुणप्रघासादियागेऽग्निप्रणयनादिकार्ये विनियोगः।

३ २ ३ १ २र ३ १ २ ३ १ २ ३ १र १र
अरण्यो निहितो जातवेदा गर्भ इवेत् सुभृतो
३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
गर्भिणीभिः। दिवे दिव ईड्यो जागृवद्भि र्हविष्मद्भि
क २र ३ २
र्मनुष्येभिरग्निः ॥ ७९ ॥ (क)

पदपाठः। अरण्योः ७। निहितः १। जातवेदाः १। गर्भः १। इव अ०। इत् अ०। सुभृतः १। गर्भिणीभिः ३। दिवे दिवे ७। ईड्यः १। जागृवद्भिः ३। हविष्मद्भिः ३। मनुष्येभिः ३। अग्निः १।

अन्वयः। जातवेदाः अग्निः अरण्योः निहितः, गर्भिणीभिः गर्भः इव सुभृतः, जागृवद्भिः हविष्मद्भिः मनुष्येभिः दिवे दिवे इत् (=एव) ईड्यः भवति।

(क) ऋ० ३।१।३२ ॥ 'इव सुधित' ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भाष्यम्। 'जातवेदाः' जातधनः प्राणिनां वेदिता 'अग्निः' भौतिकः परमात्मा वा 'अरण्योः' मध्ये 'निहितः' स्थितः 'अरणिसदृशयोः आत्मप्रणवयोर्मध्ये स्थितो वा। अत्र दृष्टान्तः—'गर्भिणीभिः गर्भ इव सुभृतः' गर्भवतीभिः यथा गर्भः सुध्रियते तद्वन्निगूढः सम्यग्धारितो वा 'अग्निः' भौतिकः परमात्मा वा 'जागृवद्भिः' जागरूकैः 'हविष्मद्भिः' सम्भृतहविष्कैः क्रतुसाधने वा 'मनुष्येभिः' मनुष्यैः 'दिवेदिवे' प्रतिदिनम् 'इत्' एव 'ईड्यः' स्तुत्यो भवति।

अथाष्टमी।

पायु ऋषिः। रक्षोघ्नं साम वैश्वानरोऽग्नि ऋषिः अत्रि वा (अग्ने वैश्वानरस्य रक्षोघ्न मन्त्रे वा। आ० ब्रा०) त्रिष्टुप्। रक्षोहाग्निः। रक्षोहननार्थं जपादिषु विनियोगः।

३ १ २ ३ २ ३ २ ३ १ २ ३
सनादग्ने मृणसि यातुधाना न त्वा रक्षाꣳसि
१ २ १ २ ३ १ २ ३ २ ३ १ २
पृतनासु जिग्युः। अनु दह सहमूरान् कयादो मा ते
३ १ २ ३ १ २
हेत्या मुक्षत दैव्यायाः॥ ८०॥ (क)

पदपाठः। सनात् अ०। अग्ने सं०। मृणसि क्रि०। यातुधानान् २। न अ०। त्वा २। रक्षांसि २। पृतनासु ७। जिग्युः क्रि०। अनु दह क्रि०। सहमूरान् २। कयादः २। मा अ०। ते ६। हेत्याः ५। मुक्षत क्रि०। दैव्यायाः ५।

अन्वयः। हे अग्ने! सनात् यातुधानान् मृणसि, रक्षांसि पृतनासु त्वा न जिग्युः। [अपि च] सहमूरान् (=समूहान्) कयादः अनुदह, ते दैव्यायाः हेत्याः [ते] मा मुक्षत (=अमुक्षत)।

(क) ऋ० ८।४।८।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भाष्यम्। हे 'अग्ने' भौतिक! परमात्मन्! वा त्वं 'सनात्' चिरादेव 'यातुधानान्' राक्षसान् पीड़ादायकान् वहिरन्तश्शत्रून् वा 'मृणसि' नाशयसि, 'रक्षांसि' राक्षसाः विघ्नकारिणः 'पृतनासु' संग्रामेषु 'त्वा' त्वां 'न' 'जिग्युः' जितवन्तः। अपि च त्वं 'सहमूरान्' समूलान् 'कयादः' मांसभक्षकान् दुष्टान् रोगान् दुष्टगुणान् वा 'अनुदह' स्वतेजसा अनुक्षणं भस्मो कुरु, 'ते' तव 'दैव्यायाः हेत्याः' दिव्याच्छस्त्रात् (क) ते यातुधानाः 'मा मुक्षत' मुक्ता नाभूवन्।

निरुक्तम्। सनात् चिरम् ॥ १२।३६।१ ॥ पृतना इति सङ्ग्रामनाम ॥ ३।८।१९ ॥ हेति हन्तेः ॥ ६।३।१ ॥

अथ व्याकरणम्।

अनुमाद्यस्य (७८)—अनु + 'मदी' हर्षे दि० + ण्यत्। तस्य।

अबोधि (७३)—बुध्यतेर्लुङि।

अमूरम् (७४)—'मुह' वैचित्ये दि० मुह्यति 'गत्यर्था०' ३।४।७२ इति क्त', व्यत्ययेन रेफः। न मूरस्तम्।

असुरस्य (७८)—'असु' क्षेपणे दि० अस्यति क्षिपति देवान् 'असेरुरन्' उ० १।४२ इत्युरन् ॥ अस्यति, 'अस' गतिदीप्त्यादानेषु भ्वा० असति, ते, 'शॄ स्वृ०' उ० १।१० इत्युः, असून् प्राणान् राति ददातीति असु रा + कः ॥ असुषु रमते इति असु + रम् + डः ॥ सुरः—'षु' प्रसवैश्वर्ययोः भ्वा० सवति, अ० सौति, 'षूञ्' अभिषवे स्वा० सुनोति, ते, 'सु सू०' उ० २।२४ इति क्रन्। 'षुर' ऐश्वर्यदीप्त्योः तु० सुरति, + कः। सु + राजृ दीप्तौ भ्वा० + डः। न सुर इत्यसुरस्तस्य।

अस्मे (७६)—अस्मभ्यमित्यत्र विभक्ते. सुपां सुलु' मिति शेभावः।

(क) वितापा व्याधिदारिद्र्यदुर्भिक्षादयः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जहनी (७५)—'ओहाक्' त्यागे जु० 'नञि जहातेः' उ० १।१५८ इति क्वनिपि आतो लोपः। जहाति त्यजति पृथक्करोत्यन्धकारमित्यहः। ते।

आयतोम् (७३)—'यम' उपरमे भ्वा० आयम्यतेऽनया अत्र वा, आयास्यतिर्वा, 'कृदिकारादक्तिनः' वा० ४।१।४५ इति ङीप्। ताम्।

इड़ाम् (७६)='इल' खप्रक्षेपणयोः तु० इलति+कः+टाप् (ड़) ताम्।

ईड्यः (७९)—'ईड़' स्तु[illegible]०+यत्।

उज्जिहानाः (७३)—उत्+'ओहाङ्' गतौ जु० जिहीते+शानच्।

उषासम् (७३)—'अन्येषामपि' ६।३।१३७ इति दीर्घः।

कयादः (८०)—क्रव्यमामसमत्तीति क्रव्यात् 'क्रव्ये च' ३।२।६९ इत्यदेर्विट्। परं क्रव्यादस्तु पक्वमांसशब्दे उपपदे 'कर्मण्यण्' ३।२।१ इत्यण्, उपपदस्य क्रव्यादेशः पृषोदरादित्वात्। व्यत्ययेन क्रव्यशब्दस्य रेफवकारयोर्लोपे रूपम्।

कृतानि (७८)—'डुकृञ्' करणे त०+क्तः। तानि।

गर्भः (७९)—गिरति, गृणाति 'अर्त्तिगृभ्यां भनन्' उ० ३।१५२ इति भनन्।

गर्भिणीभिः (७९)—गर्भोऽस्यामस्तीति+इनिः ताभिः।

जाग्रवह्निः (७९)—'जागृ' निद्राक्षये अ० जागर्त्ति वतुप्। तेः।

तनयः (७६)—तनोति वंशम्। 'वलिमलितनि०' उ० ४।९९ इति क्यन्।

तवसः (७८)—तवतिवधार्थः सौत्रो धातुः। असुन्। तस्य।

दर्माणम् (७४)—'दृङ्' आदरे तु०। अन्येभ्योऽपीति मनिन्। आद्रियत इति तम्।

दैव्यायाः (८०)—देवानामिदमिति प्राग्दीव्यतीयेष्वर्थेषु 'देवाद्यञञौ' वा० ४।१।८५ इति यञ्। टाप्। तस्याः।

धनर्चिम् (७४)—दधातेः 'कृपृ०' उ० २।८१ इति क्युः 'युवोरनाकौ' ७।१।१ इति योरनः धनम्। ऋचतेः इन् ऋचिः। धनाय ऋचिर्यस्य तम्।

धाः (७४)—डुधाञ् धातो लुङि सिपि अधाः। अडभावः।

धेनुम् (७३)—'धेट्' पाने भ्वा० 'धेट् इश्च' उ० ३।३४ इति नुः। धयन्ति पिबन्ति यस्याः सा धेनुः ताम्।

नभोवित् (७७)—'णह' बन्धने दि०। 'नहे र्दिवि भश्च' उ० ४।२११ इत्यसुन्। नह्यति चर्मे बध्नातीति नभः। नभो वेत्तीति क्विप्।

नृषद्वा (७७)—नृषु सीदतीति। नृ+षद+मनिन्।

पुराम् (७४)—पिपर्त्तेः 'भाजभास०' ३।२।१७७ इति क्विप्। 'उदोष्ठ्यपूर्वस्य' ७।१।१०२ इत्युत्वम्। रपरः। 'वोरुपधाया०' ८।२।७६ इति दीर्घः। 'पुर' अग्रगमने तु० पूर्यते सम्पदादित्वात् क्विप् वा। पूः। तासाम्।

पुरुदंससम् (७६)—पुरु बहु दंसः कर्म यस्य तम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुंसः (७८)—'पा' रक्षणे अ० 'पातेर्डुमसुन्' उ० ४।१७८ तस्य।

पूषन् (७५)—'श्वनुचन् पूषन्०' उ० १।१५९ इति कनिन्। 'पुष' पुष्टौ भ्वा०, दि०, क्र्या०। सम्बुद्धौ।

पृतनासु (८०)—'पृङ्' व्यायामे तु० बाहुलकात् तनन् गुणाभावश्च। व्याप्रियन्तेऽत्र योद्धारः। तासु।

प्रभूः (७४)—प्र+भूः। अडभावः।

प्रसीदत् (७७)—प्र+असीदत्। अडभावः।

भानवः (७२)—भातेः 'दाभाभ्यां नुः' उ० ३।३२ इति नुः। भातीति भानुस्ते।

भूतु (७६)—'बहुलं छन्दसी' ति शपो लुक् 'भूसुवो०' ७।३।८८ इति गुणप्रतिषेधः।

मनुष्येभिः (७९)—मनोरपत्यं 'मनोर्जाता०' ४।१।१६१, बहुलं छन्दसीति भिस ऐसभावः।

मह्ना (७४)—'दीर्घादटि समानपादे' ८।३।९ दीर्घात् नकारस्य रुर्वा स्यात् अटि, तौ चेत् नाटौ एकपादस्थौ स्याताम्।

मायाः (७५)—'माछा०' उ० ४।१०९ इति यः। मात्यन्तर्भवतीति माया ताः।

मुचत (८०)—'मुच्लृ' मोचने तु० लुङि प्रथमबहुवचने अमुचत। अडभावो माङि 'न माङ् योगे' ६।४।७४ इति।

मृणसि (७०)—'मृण' हिंसायाम् तु० प० लट्, सिप्।

यातुधानान् (८०)—'यत' निकारोपस्कारयोः चु०+उः॥ यातेः 'कमिमनि०' उ० १।७३ इति तुः। यातु+धा+युच् 'बहुलमन्यत्रापि' उ० २।७८ इति। 'कृत्यल्युटो०' ३।३।११३ इति ल्युट् वा। यातूनि रक्षांसि दधातीति। तान्।

वन्दद्वारा (७८)—वन्दद्वाराणि स्तुतिप्रमुखानि वदि+घञ्। ह, द्वारयति+अच्। वन्दः स्तुतिः द्वारं मुखं येषां तानि।

वन्द्यमाना (३८)—वन्द्यमानानि स्तूयमानानि। कर्मणि शानच्, विभक्तेर्लुक्।

वयाम् (७३)—'वय' गतौ भ्वा०+अच्+टाप्। वयते आकाशे प्रसरति इति वया शाखा ताम्।

वर्मणा (७४)—वृणोतेः 'अन्येभ्योऽपि०' ३।२।७५ इति मनिन्। तेन।

विजावा (७६)—विजायते इति 'अन्येभ्योऽपीति वनिप्, 'विड्वनो०' ६।४।४१ इत्यनुनासिकस्य आत्वात्।

विधते (७७)—'विध' विधाने तु०+शतः। ४थौ।

विपोधाम् (७४)—'विप' क्षेपे चु०+कः विपो मेधावी। तान् दधातीति तम्। विप+धा+विच्।

विवर्त्ते (७७)—वि+वृतु+घञ्। तस्मिन्।

श्रवत्तमम् (७६)—श्रवत् (५द) +तमप्। निरन्तरम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सनात् (८०)—षण संभक्तौ भ्वा० + आत्। सदार्थेऽव्ययम्।

समिधा (७३)—सम् + ञिइन्धीदीप्तौ रु० + सम्पदादिलात्करणे क्विप्। नलोपः। समिध्यतेऽनया।

सरते (७३)—'सृ' गतौ भ्वा० लट्, शपः श्लुः, आत्मनेपदं छान्दसम्। सरन्ति।

सहमूरान् (८०)—समूलान्। व्यत्ययेन हः, लस्य रथ।

साध (७६)—साध [illegible] खा०। [illegible] वितरणार्थोऽयम्। लोटि व्यत्ययेन 'सेर्ह्यपिच्च' ३।४। [illegible] हिरादेशः, ते[illegible] हेः' ६।४।१०५ इति लुक्।

सुधायौ (७७)—सु + धा + णिनि। 'आत[illegible]ह०' ७।३।३३।

सुभृतः (७९)—सु + भृञ् भ्वा० + क्तः।

सुमतिः (७६)—सु + मन + क्तिन्।

सूनुः (७६)—'षूङ्' प्राणिप्रसवे भ्वा०, अ०। 'सुवः कित्' उ० ३।३५ इति नुः। सूयते उत्पद्यतेऽसौ।

स्वधावन् (७५)—सु + 'ऋ' अ० अन्येभ्योऽपीति विच्, सर्वलोपः, गुणः। यद्वा सु अर्, रलोपः, गुणः। स्व॥ 'धा'—आतोऽनुसर्गे इति कः, टाप्॥ धा। स्वधा॥ 'ष्वद' भ्वा०। स्वद्यतेऽनया। आ, पृषोदरादित्वाद्दस्य धः॥ वनिप्। सं०।

हवमानाय (७६)—'ह्वेञ्'। 'भावेऽनुपसर्गस्य' ३।३।३५ इत्यप् सम्प्रसारणञ्च। शानच् 'आने मुक्' ७।२।८२। ४थी।

हरिश्मश्रुम् (७४)—हृञ् भ्वा० 'हृपिषि०' उ० ४।११९ इतोन्, गुणः। हरिः। 'श्रिञ्' सेवायाम् भ्वा० 'श्मनि श्रयतेर्डुन्' उ० ५।२८॥ हरेः सूर्यस्य श्मश्रु किरणः। व्यत्ययेन पुंस्त्वम्।

हविष्मद्भिः (७९)—हविः + अस्त्यर्थे मतुप्। ३ या।

हेत्याः (८०)—हन्ते हिंनोते वा 'ऊति यूति०' ३।३।९७ इति क्तिनि हन्तेर्नकारस्येत्वं हिनोतेर्गुणश्च॥ तस्याः॥

इति अष्टमी दशतिः अष्टमः खण्डश्च।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रथमम् (आग्नेयं) पर्व । [illegible] यः । प्रथमः प्रपाठकः । नवमः खण्डः । नवमी [illegible]

गयत्रि ऋषिः । [illegible] ब्रा०) अनुष्टुप् छन्दः (क) । [illegible] शस्त्रे च विनियोगः ।

२ ३ १ २ ३ १ २ ३ २ ३ १ २
अग्न ओजिष्ठ माभर द्युम्नमस्मभ्य मध्रिगो ।
१ २ ३१र २र ३ २ ३ १ २ ३ १ २
प्र नो राये पनीयसे रत्सि वाजाय पन्थाम् ॥८१॥ (ख)

पदपाठः । अग्ने सं० । ओजिष्ठम् २ । आभर क्रि० । द्युम्नम् २ । अस्मभ्यम् ४ । अध्रिगो सं० । प्र अ० । नः ४ । राये ४ । पनीयसे ४ । रत्सि क्रि० । वाजाय ४ । पन्थाम् २ ।

अन्वयः । हे अध्रिगो ! अग्ने ! [त्वम्] ओजिष्ठं द्युम्नम् अस्मभ्यम् आभर, [अपि च] पनीयसे राये वाजाय [च] नः पन्थां (= पन्थानं) प्ररत्सि ।

भाष्यम् । हे 'अध्रिगो' (ग) अप्रतिहतगमन ! 'अग्ने' यज्ञाग्ने ! परमात्मन् ! वा त्वम् 'ओजिष्ठं' बलवत्तमं 'द्युम्नं' प्रकाशकं ज्ञानरूपं वा धनम् 'अस्मभ्यम्' 'आभर' आहर, देहि ; अपि च 'पनीयसे' प्रशंसनीयाय 'राये' धनाय 'वाजाय' अन्नाय च 'नः' अस्मभ्यं 'पन्थां' पन्थानं 'प्ररत्सि' प्रकृष्टं विलिख, कुरु इति ।

(क) अनुष्टुब् गायत्रैः । पि० छ० ३।२३ अष्टाक्षरैः पादैश्चतुर्भिश्छन्दोऽनुष्टुप् संज्ञं भवति ।

(ख) ऋ० ४।१।२ 'प्र णो राया परीणसा' ।

(ग) अहतमप्रतिहतं गमनं यस्येति, अहताऽनिवारिता गावो रश्मयो यस्येति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निरुक्तम्। द्युम्नमिति धननाम ॥ ३।८।९ ॥ द्युम्नं द्योततेर्यशो वा अन्नं वा ॥ ५।५।९ [illegible] नरप्यग्निगुरुच्यते। अष्टतगमनकर्मवन् ॥ ५।११।३ ॥

अ[illegible]तीया।

वामदे[illegible] भरद्वाजः वा [illegible] एकं बृहन्नामकं सामाग्निदेवताकम् (बृहच्चाग्नेयम्। [illegible]ा०) अनुष्टुप्। अग्निः। अग्न्याधाने विनियोगः

१ २ ३ २उ ३ २ ३ १ २ ३ १ २
यदि वीरो अनु ष्यादग्निमिन्धीत मर्त्यः।
३ १ २ ३ १ २ ३ १र २ २ ३ १ २
आजुह्वद्धव्यमानुषक् शर्म्म भक्षीत दैव्यम् ॥ ८२ ॥

पदपाठः। यदि अ०। वीरः १। अनु अ०। स्यात् क्रि०। अग्निम् २। इन्धीत क्रि०। मर्त्यः १। आजुह्वत् क्रि०। हव्यम् २। आनुषक् अ०। शर्म २। भक्षीत क्रि०। दैव्यम् २।

अन्वयः। यदि मर्त्यः अग्निम् इन्धीत, अनु आनुषक् आजुह्वत् [तर्हि स] वीरः स्यात्, दैव्यं शर्म च भक्षीत।

भाष्यम्। 'यदि' 'मर्त्यः' मनुष्यः 'अग्निं' भौतिकं परमात्मानं वा 'इन्धीत' प्रदीपयेत् ध्यायेद् वा 'अनु' तदनु 'आनुषक्' निरन्तरम् 'आजुह्वत्' तस्मिन्नग्नौ सम्यग् जुहुयात्, तं परमात्मानं सम्यगुपासीद्वा तर्हि स 'वीरः' धर्मवीरः 'स्यात्' भवेत् 'दैव्यं' दिव्यं 'शर्म' सुखं च 'भक्षीत' लभेत।

निरुक्तम्। आनुषगिति नामानुपूर्वस्यानुषक्तं भवति ॥६।१४।४॥

अथ तृतीया।

भरद्वाज ऋषिः। यामं साम (यामं च। आ० ब्रा०) अनुष्टुप्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अग्निः। विनियोगस्तु धूम उदिते त्वेषस्ते धूम ऋण्वतीति। लाट्यायन श्रौतसूत्रे।

३ १ २ २१ २ ३ २उ २र २र
त्वेषस्ते धूम ऋण्वति दिवि सञ्छुक्र आततः।
३ २उ २उ २उ ३ १
सूरो न हि द्युता त्वं कृपा पावक रोचसे॥ (क)

पदपाठः। त्वेष[illegible] क्रि०। दिवि ७। सन् १ [illegible] १। [illegible] १। न अ०। हि अ०। द्युता [illegible] त्वम् १। कृपा ३। पावक सं०। रोचसे क्रि०।

अन्वयः। हे पावक [अग्ने!] त्वेषः (=त्वेषस्य) ते शुक्रः धूमः दिवि आततः सन् ऋण्वति, सूरः न कृपा (=कृपया) द्युता हि त्वं रोचसे।

भाष्यम्। हे 'पावक' पवित्रकर्त्तः! अग्ने भौतिक! परमात्मन्! वा 'त्वेषः' दीप्तस्य 'ते' तव 'शुक्रः' शुद्धिकरः 'धूमः', धूमवत्प्रज्ञापको गुणः धुनोति कम्पयति दुष्टान् यः स 'दिवि' अन्तरिक्षे, दिव्यगुणेषु वा 'आततः' विस्तृतः 'सन्' 'ऋण्वति' मेघात्मना परिणतो गच्छति, प्रकाशते वा; 'सूरः न' सूर्य इव 'कृपा' कृपया समर्थया 'द्युता' दीप्त्या 'हि' नूनं 'त्वं' 'रोचसे' दीप्यसे।

निरुक्तम्। ऋण्वतीति गतिकर्मसु॥ ३।८।१४॥ रोचसे सन्दृश्यसे॥ ३।११।२॥ कृप् कृपते वा कल्पते वा ६।८।६॥

अथ चतुर्थी।

भरद्वाज ऋषिः। बृहन्नामकं सामाग्निदेवताकं (बृहच्चैवाग्नेयम्। आ० ब्रा०) अनुष्टुप्। अग्निः। विनियोगस्तु प्रातरनुवाके आश्विनशस्त्रे च।

(क) ऋ० ४।५।२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१र २र ३ १र २र ३ १र २र
त्वꣳहि चैतवद्यशोग्ने । मित्रो न पत्यसे ।
१ २ ३ २ ३ १ २ ३ १र २र २र
त्वं विचर्षणे । श्रवो वसो । पुष्टिं न पुष्यसि ॥८४॥ (क)

पदप[illegible] । त्व[illegible] । अ० । चैतवत् २ । यशः २ । अग्ने सं[illegible] । वः १ । न[illegible] । पत्यसे क्रि० । त्वम् १ । विचर्षणे सं० । श्रवः २ । व[illegible] । पुष्टिम् २ । न अ० । पुष्यसि क्रि० ।

अन्वयः । हे विचर्षणे ! वसो ! [illegible] । त्वं हि चैतवत् यशः मित्रः न पत्यसे, त्वं श्रवः पुष्टिं न पुष्यसि ।

आधियाज्ञिकम् । हे 'विचर्षणे' सर्वसाक्षिन् 'वसो' धनप्रद 'अग्ने' ! 'त्वं' 'हि' 'चैतवत्' क्षितये हितं चैतं तद्वत् तद्यज्ञं 'यशः' अन्नं 'मित्रः' 'न' सूर्य इव 'पत्यसे' तस्य ईशिषे, अधिकारित्वेन वर्त्तसे ; 'त्वं' 'श्रवः' तदेवान्नं 'पुष्टिं न' पोषणमिव 'पुष्यसि' वर्द्धयसि । यथा सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविस्तथाग्नौ हुतमन्नादिकं भूयसीं वृष्टिं प्राप्य पुनरुत्पद्यते ।

आध्यात्मिकम् । हे 'विचर्षणे' विशेषेण सर्वस्य द्रष्टः ! 'वसो' जगतामाधारभूत ! 'अग्ने' परमात्मन् ! 'त्वं' 'हि' 'चैतवत् यशः पत्यसे' क्षितिहितकारिणोऽन्नस्य पतिमिवाचरसि स्वामी भवसि त्वत्कृपया वयमेतत् प्राप्नुमः । अत्र दृष्टान्तमाह—'मित्रः न' यथा सूर्यः इति । 'त्वं' 'श्रवः' तदेवान्नं 'पुष्टिं न' पोषणमिव 'पुष्यसि' वर्द्धयसि ।

निरुक्तम् । यश इत्यन्न नाम ॥३।९।४॥ यश इति धननाम ३।९।९ ॥ पत्यते इति ऐश्वर्यकर्मा ॥ ३।११।६ ॥ विचर्षणिः इति पश्यतिकर्मा ॥ ३।१३।२० ॥ श्रव इति धननाम ॥ ३।९।९ ॥ श्रव इत्यन्ननाम श्रूयते इति सतः ॥१०।३।१॥ श्रवः श्रवणीयं यशः ॥११।९१॥

(क) ऋ० ४।५।१ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ पञ्चमी ।

मृक्तवाहा द्वित ऋषिः । [illegible] कौसुदस्य [illegible] रपत्यस्य (बृहतः कौसुदस्य साम । [illegible]) [illegible] । प्रातरनुवाके [illegible] च विनि[illegible]

३ २ ३ २ २ ३ २ ३
प्रातरग्निः पुरुप्रियो [illegible]

३ २ ३ १ २
विश्वे यस्मिन्नमर्त्ये हव्यं मर्त्ता इन्धते ॥ ४ ॥

पदपाठः । [illegible] पुरुप्रियः १ । विशः १ । स्तवेत क्रि० । [illegible] १ । विश्वे १ । यस्मिन् ७ । अमर्त्ये ७ । हव्यम् २ । मर्त्तासः १ । इन्धते क्रि० ।

अन्वयः । विश्वे मर्त्तासः यस्मिन् अमर्त्ये [अग्नौ] हव्यम् इन्धते पुरुप्रियः विशः अतिथिः [सः] अग्निः प्रातः [यजनशीलैः] स्तवेत (=स्तूयेत) ।

भाष्यम् । 'विश्वे' सर्वे 'मर्त्तासः' मनुष्याः 'यस्मिन्' 'अमर्त्ये' अविनाशिनि अग्नौ परमात्मनि वा 'हव्यं' हविः दातव्यं शुभकर्मफलं वा 'इन्धते' दधते समर्पयन्ति वा 'पुरुप्रियः' बहुप्रियः 'विशः' यजमाने धनस्य निवेशकः (ख) 'अतिथिः' सततगमनशीलः सः 'अग्निः' भौतिकः परमात्मा वा 'प्रातः' प्रातःकाले 'स्तवेत' यजनशीलैः स्तूयेत ।

अथ षष्ठी ।

आत्रेया वसूयव ऋषयः । द्वे सामनी यद्दाहिष्ठीये यन्मण्हिष्ठीये वाग्निर्ऋषिः (अग्ने यद्दाहिष्ठीये द्वे यन्मण्हिष्ठीये वा । आ० ब्रा०)

(क) ऋ० ४।१।१० ॥ 'विश्वानि यो अमर्त्यो हव्या मर्त्तेषु रण्यति' ।

(ख) यद्वा 'विशः' सर्वस्याः प्रजायाः 'अतिथिः' पूज्यः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनुष्टुप्। अग्निः। प्रातरनुवाके आश्विनशस्त्रे च विनियोगः विशेषेण तु अश्वमेधयागस्य पौष्णेष्टौ स्विष्टकृत्प्रकरणे याज्यारूपेण।

१र २र ३ २ ३ १ २ ३ १ २
यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो।
१ २ ३
महिषीव त्वदिव त्वद्रयिः त्वद्वाजा उदीरते ॥ ८६ ॥ (क)

[illegible] १। तत् २। अग्नये ४।
बृहत् [illegible] महिषी १। इव अ०।
त्वत् ५। र[illegible] १ [illegible] उदीरते क्रि०।

अन्वयः। य[illegible] तत् अग्नये [क्रियते], हे विभावसो! बृहत् [illegible] अम्] अर्च, महिषी इव त्वत् रयिः त्वत् वाजाः उ[illegible]

भाष्यम्। [illegible] वाहिष्ठं वोढृतमं स्तोत्रं 'तत्' 'अग्नये' भौतिकाय परमात्मने वा क्रियते, हे 'विभावसो' प्रभाधन! स्वप्रकाश! वा 'बृहत्' महत् धनमन्नं चास्मभ्यम् 'अर्च' प्रयच्छ। 'महिषी' महत् 'इव' त्वत्' तव सकाशात् 'रयिः' धनं 'त्वत्' तव सकाशात् 'वाजाः' अन्नानि बलानि च 'उदीरते' उन्नच्छन्ति, उत्कृष्टं प्रादुर्भवन्ति।

निरुक्तम्। वाहिष्ठो वोढृतमः ॥ ५।१।२ ॥

अथ सप्तमी।

गोपवनः सप्तवध्रिर्वा ऋषिः। एक त्रिशोविशीयं सामग्निर्ऋषिः, ऐड, मिड़ा-पुष्टि-रत्नं तद्युक्तं शार्गमेतन्नामकम् (अग्ने त्रिंशोविशीयमैडं वा शार्गम्। आ० ब्रा०) अनुष्टुप्। अग्निः। व्योमविश्वदेवस्तुद्यागे पञ्चशारदीयप्रकरणे आज्यशस्त्ररूपेण विनियोगः।

(क) ऋ० ४।१।१८॥ यजुः २६।१२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३ १ २ ३ १ २ ३ १ २ ३ २
विशो विशो वो अतिथिं वाजयन्तः पुरुप्रियम् ।
३ २ ३ २ ३ १ २ ३ २ ३ १ २
अग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिः । (क)

पदपाठः । विशः [illegible] वाजयन्तः १ । पुरुप्रियम् [illegible] वचः १ । स्तुषे क्रि० । [illegible]

अन्वयः । [illegible] विशः पुरुप्रियम् अतिथिं [illegible] शूषस्य [लाभाय] मन्मभिः [illegible] [तमग्निं] स्तुषे ।

भाष्यम् । हे मनुष्याः [illegible] यन्तः' अन्नं बलं चेच्छन्तः 'विशः' [illegible] बहुप्रियम् 'अतिथिं' तद्वत्पूज्यं 'दुर्यं' [illegible] किं परमात्मानं वा परिचरत इति शेषः । अहमपि [illegible] वा 'शूषस्य' सुखस्य लाभाय 'मन्मभिः' मननीयैर्मन्त्ररूपैः 'वचः' वचोभिः, विभक्तिव्यत्ययः 'वः' युष्मदर्थं तमग्निं 'स्तुषे' स्तौमि ।

निरुक्तम् । दुर्या इति गृहनाम ॥ ३।१३।८ ॥ शूषमिति बलनाम ॥ ३।९।७ ॥ शूषमिति सुखनाम ॥ ३।१३।११ ॥ मन्म मन्त्रः ६।२२।३ ॥ मन्मानि मननानि ॥ ८।६।२ ॥

अथाष्टमी ।

आत्रेयः पुरुर्ऋषिः । द्वे सामनी कनीनिके प्रजापतिश्चर्षिरत्रिर्वा (प्रजापतेश्च कनीनिके द्वे अत्रे वा । आ० ब्रा० ।) अनुष्टुप् । अग्निः । प्रातरनुवाके आश्विनशस्त्रे च विनियोगः ।

(क) ऋ० ८।४।२१ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३ २उ ३ २ ३ १र २र ३ २ ३ १ २
बृहद्वयो हि भानवेऽर्चा देवायाग्नये ।

३ १र २ २र १ २ ३ २ ३ २
यं मित्रं न प्रशस्तये मर्त्तासो दधिरे पुरः ॥८८॥ (क)

पद[illegible] २ । हि अ० । भानवे ४ ।
अर्चा [illegible] २ । मित्रम् २ । न अ० ।
प्र[illegible] । पुरः अ० ।
अन्वे[illegible] प्रशस्तये पुरः दधिरे [तस्मै]
भानवे देवाय [illegible]

भाष्यम् । [illegible] मननशीला मनुष्याः 'मित्रं न' बन्धुमिव 'यम्' अ[illegible] स्तुतये 'पुरःदधिरे' पुरस्कुर्वन्ति, सम्मुखे उत्तरवेद्या[illegible] काले साक्षात्कुर्वन्ति वा तस्मै 'भानवे' दीप्तिमत[illegible] दिव्यगुणयुक्ताय 'अग्नये' भौतिकाय परमात्मने वा 'बृहत्' महत् 'वयः' हवीरूपमन्नं प्रेम वा 'अर्चा' प्रयच्छ ।

अथ नवमी ।

आत्रेयः पुरुर्ऋषिः । एकं साम औतर्वणं (औतर्वणञ्च । आ० ब्रा०) अनुष्टुप् । अग्निः । प्रातरनुवाके आश्विनशस्त्रे च विनियोगः ।

१ २ ३ १ २ ३ १ २ ३ १र २र
अगन्म वृत्रहन्तमं ज्येष्ठ मग्निमानवम् ।

१ २ ३ २ ३ २ ३ १ २ ३ १ २
यः स्म श्रुतर्वन्नार्चे बृहदनीक दूध्यते ॥ ८९ ॥ (ख)

(क) ऋ० ४।१।८ ॥

(ख) ऋ० ६।५।२१ ॥ 'आगन्म' 'यस्य श्रुतर्वा बृहन्नार्चे अनीक एधते' ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पदपाठः । अगन्म क्रि० । बृहन्तमम् २ । ज्येष्ठम् २ । अग्निम् २ । आनवम् २ । यः १ । रु. प्र० । श्रुतर्वन् ७ । आर्चे ७ । बृहदनीके ७ । दृश्यते क्रि० ।

अन्वयः । यः श्रुतर्वन् आर्चे बृहदनीके दृश्यते [illegible] पादपूरणार्थकम्) बृहन्तमं ज्ये[illegible] अग्नि[illegible]

भाष्यम् । [illegible]
अर्वा अश्वः व्यापकाकिरण[illegible]
स्तन्मये 'बृहदनीके' बृहते[illegible]
प्रकाशते 'बृहन्तमं' [illegible]
प्रशंसनीयम् 'आनवम्' [illegible]
भौतिकं परमात्मानं वा [illegible]

निरुक्तम् । अर्वा [illegible]
मनुष्यनाम ॥ ३।७।१ ॥ [illegible]

अथ दशमी ।

वामदेव ऋषिः कश्यपो मनुर्वा उभौ वा । एकं साम स्वयोनिनामकं कश्यपस्यर्षिः, इन्द्रियनामकं सामेन्द्रस्यर्षिर्वा, यद्वेन्द्र ऋषिः प्रियनामकं साम (कश्यपस्य च स्वयोनीन्द्रस्य वेन्द्रियमिन्द्रस्य वा प्रियम् । आ० ब्रा०) अनुष्टुप् । अग्निः । अग्न्याधानप्रकरणेऽग्निस्तुतौ विनियोगः ।

३ १र २र ३ १ २ ३ २ ३ १ २ ३ १ २
जातः परेण धर्मणा यत्सद्भिः सहाभुवः ।
३ २उ ३ १ २ ३ १ ३ २ ३ १र २र ३ १
पिता यत्कश्यपस्याग्निः श्रद्धा माता मनुः कविः ॥९०॥

पदपाठः । जातः १ । परेण ३ । धर्मणा ३ । यत् १ । सद्भिः ३ । सह अ० । अभुवः क्रि० । पिता १ । यत् १ ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कश्यपस्य ६। अग्निः १। श्रद्धा १। माता १। मनुः १। कविः १।

अन्वयः। यत् (=यः) अग्निः कश्यपस्य पिता, यत् (=यः) [च] सद्वद्भिः सह परेण धर्मणा जातः अभुवः, [तस्याग्नेः] श्रद्धा मनुः कविः [च] माता [illegible]वति]।

भाष्य[illegible]यः 'अग्निः' भौतिकः परमात्मा [illegible]स्य 'पिता' यज्ञाहुतिभिः पाल[illegible] 'सद्वद्भिः' सहवर्त्तिभिः ऋत्वि[illegible] कर्मणा यज्ञेनेति 'जातः अभु[illegible]त्पन्ने[illegible]ष्ठा, आस्तिकबुद्धिः (क) 'मनुः कविः' [illegible]इन्नः पुरुषश्च 'माता' यज्ञानुष्ठानेन निर्माता[illegible]वा भवति।

अथ व्याकरणम्।

अगन्म (८९)—गमेश्छान्दसे लुङि 'मन्त्रे घस०' २।४।८० इति च्लेर्लुकि 'मीनो घातोः' ८।२।६४ 'म्वोश्च' ८।२।६५ इति नकारे रूपम्।

अघ्निगो (८१)—अघ्नता गावो यस्य। अघ्नि (न-घ्नृ-कि) गुः गूः (गम कु डिच् ऊङादेशो वा) सं०।

अर्च (८६)—'अर्च' पूजायाम् भ्वा०।

आजुह्वत् (८२)—आङ् पूर्वाज्जुहोतेः व्यत्ययेन शप्-प्रत्ययः सुलोपः।

आततः (८३)—आ+तनु+क्तः।

आनवम् (८९)—अनप्राणने 'अणव' उ० १।८ इति वाहुलकादुः। अनन्तोऽनवः। 'तस्मै हितम्' इति अण्।

(क) श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः। श्रद्धां भगस्य मूर्द्धनि वचसा वेदयामसि॥ ऋ० १०।१५१॥

नाश्रद्दधानाय हविर्जुह्वति देवाः॥ अश्रद्धामन्वते दधा श्रद्धां सत्ये प्रजापतिः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आशुषक् (८२)—आ + अशु ('वञ्च' सृञ्जे भ्वा०) + क्विप्, सर्वलोपः। 'अनिदितां हल०' ६।४।२४ इति नलोपः। अव्ययम्।

आर्चे (८९)—ऋषति गच्छतीति ऋचः। [illegible] उ० [illegible] क्विप् [illegible]। 'तस्येदम्' इत्यण्।

उदीरते (८६)—उत् + 'ईर' गतौ कम्पने [illegible] ७।१।३ इलादेशः।

ऋखति (८३)—रिवि गतौ भ्वा० रि[illegible]।

ओजिष्ठम् (८१)—अतिशयेन ओजस्[illegible]।

कश्यपस्य (८५)—कश्य उदकं, [illegible] संस्थिवति शीघ्र[illegible] महाभा०। त[illegible]।

क्रपा (८[illegible])—'क्रप' [illegible] गतौ [illegible] विभक्तिलुक्।

चैतवत् (८४)—[illegible] निवासगतयोः [illegible] अत्यर्थेन [illegible]।

ज्येष्ठम् (८९)—'ज्य च' ५।३।६१ इति प्रशस्य[illegible]।

त्विषः (८६)—'त्विष' दी[illegible] भ्वा० + घञ्। विभक्ति[illegible]

दुर्यम् (८७)—दुर्वी हिंसायाम् [illegible] पूर्वात् यातेः 'घञर्थे [illegible]' [illegible] इति [illegible]।

द्युता (८३)—द्युत दीप्तौ भ्वा० + क्विप्। तया।

द्युम्नम् (८१)—दिवं मनति (मा अभ्यासे) आतोऽनुपसर्गे इति कः।

धर्मणा (९०)—'अर्त्तिसु०' उ० १।१४० इति मन्। ध्रियते सुखप्राप्तये सेव्यते तत् धर्म तेन।

धूमः (८३)—'इषि युधी०' उ० १।१४५ इति मक्। धूञ् कम्पने स्वा० क्र्या०।

पत्यसे (८४)—पत्यते इत्यैश्वर्यकर्मा नैरुक्तो धातुः।

पनीयसे (८१)—पनायति + ढच् + ईयसुन्। ढलोपः। तस्मै।

पन्थाम् (८१)—'पतः स्थ च' उ० ४।१२ इतीनिः णित् च। णित्वाद्वृद्धिः। पन्थानम्।

पिता (८०)—पातीति। नप्तृनेष्टृ० इति साधुः।

पुरुप्रियः (८५)—पुरुः बहुः प्रियः। कर्मधा०।

पुष्टिम् (८४)—पुष्यतेः क्तिन्।

पुष्यसि (८४)—लटि सिपि।

प्ररत्सि (८१)—प्र + रद विलेखने भ्वा० श्यपो लुक् सत्सिवत् [१८०]।

भचीत (८२)—'भच' भ्वा० उ० लिङि।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मन्मभिः (८७)—मननं मत् (मन ज्ञाने दि०) सम्पदादित्वात् क्विप्। 'गमादीनामिति वक्तव्यम्' वा० ६।४।४० इति नलोपः। 'इसस्य०' ६।१।७१ इति तुक्। मन्मत इति मन्मन् 'अन्येभ्योऽपि दृश्यन्ते' ३।२।७५ इति मनिन्। तैः।

महिषी (८६)—महिषः [७द] टित्वात् 'टिड्ढाणञ्' ४।१।१५ इति ङीप्। १मा।

यशः (८४)—सुयशस्तरम् [४द] व्यत्ययेन षष्ठीस्थाने द्वितीया।

यदि (८२)—यतते: [illegible] स दः।

वाजयन्तः (८७)—[illegible] बहुव०।

वाहिष्ठम् (८६) [illegible] वहिर्यन्तात्तृच्। अत्यन्तं वाहयिता [illegible] इत्यतुवृत्तौ 'तुम्छन्दसि' ५।३।५९ [illegible] वृद्धौ लोपः। १मा।

विचर्षणे [illegible] रादेशश्च चः' उ० २।१०४ [illegible] प्रत्य[illegible]

विभावसो (८६)—विभा (वि [illegible] तत्संबुद्धौ।

विशः (८५)—विशते: क्वः।

वृत्रहन्तमम् (८६)—वृत्रं [१द] [illegible] भूणहनेषु क्विप्' ३।२।८७ तदन्तात् अतिशायनिकस्य [illegible] ८।२।१७ नान्तात्परस्य घस्य लुट्। अतिशयेन वृत्रं हन्ति [illegible] तमस्तम्।

वृहदनीके (८९)—वृहतां तेजसामनीके ('अनिहषिभ्यां किच्च' उ० ४।१७ इति अन प्राणने धातोः कीकन्)।

शुषस्य (८७)—शुष शोषणे दि० अच प्रत्ययः 'ऋहलो०' उ० ४।७३ इति वत्।

शुद्धा (९०)—शृत् सत्यं तस्मिन्धीयते। अदन्तरीरूपसर्गवृत्तिः वा० ३।३।१०६ इत्यङ्, टाप्।

शृषः (८४)—शृणोतेः कर्मण्यसुन्।

श्रुतर्वन् (८९) अर्वा 'ऋ' भ्वा० 'स्वामदि०' उ० ४।११३ इति वनिप्। अर्तेरन्तर्णीतण्यर्थाद्वा अन्येभ्योऽपीति वनिनि रूपम्। श्रुतः अर्वा यस्य तस्मिन्। सुपां सुलुगिति विभक्तेर्लुक्।

सुहृद्भिः (९०)—सुहृ + वृतु + क्विप्। तैः।

सूरः (८३)—'सु सू धाञ्०' उ० २।२४ इति क्रन्। सूयते वा सुवति प्राणिनः।

स्तवेत (८५)—स्तूयेत।

इति नवमी दशतिर्नवमः खण्डश्च।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रथमम् (आग्नेयं) पर्व । [illegible] । [illegible]मः प्रपाठकः । दशमः खण्डः । दशमो दशतिः ।

तापस [illegible] प्रसिद्ध [illegible]
ऋषिः (बार्हस्पत्यश्च ।
महाव्रतयागेऽग्निमारु[illegible]

२ ३ १ २ २
सोमꣳ राजानं वरुणमग्निमन्वा[illegible]
३ २उ ३ १
आदित्यं विष्णुꣳ सूर्यं ब्रह्माणं च [illegible] ॥ १॥ (क)

पदपाठः । सोमम् २ । राजानम् २ । वरुणम् २ । अग्निम् २ । अन्वारभामहे क्रि० । आदित्यम् २ । विष्णुम् २ । सूर्यम् २ । ब्रह्माणम् २ । च अ० । बृहस्पतिम् २ ।

अन्वयः । सोमं राजानं वरुणम् आदित्यं विष्णुं सूर्यं ब्रह्माणं बृहस्पतिं च अग्निम् अन्वारभामहे ।

भाष्यम् । 'सोमं' सर्वजगदुत्पादकं 'राजानं' प्रकाशमानं 'वरुणं' वरणीयम् 'आदित्यं' नाशरहितं 'विष्णुं' व्यापकं 'सूर्यं' सर्वस्यप्रेरकं 'ब्रह्माणं' महान्तं 'बृहस्पतिं' वेदपतिं 'च' 'अग्निम्' अग्रणीं परमात्मानम् 'अन्वा रभामहे' रक्षणार्थमाह्वयामहे ।

निरुक्तम् राजा राजतेः ॥ २।३।१ ॥ बृहस्पति र्बृहतः पाता वा पालयिता वा ॥ १०।११।२ ॥

(क) ऋ० ८।७।२९ ॥ राजानमवसेऽग्निं गीर्भिर्हवामहे' आदित्यान्' ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ द्वितीया ।

वामदेव ऋषिः । एकं सामारूढशब्दयुक्तमङ्गिरसां स्वभूतं (साग्नि उदारुहन्निति विद्यमानत्वात्) अथवा यामं साम यमेन दृष्टं, यमोऽग्नि[illegible] ताकं [illegible] [illegible]वचाङ्गिरसं यामं वा । आ० ब्रा०) अन[illegible] [illegible] प्रैषरूपेण विनियोगः ।

[illegible]

इ[illegible]हन् ।

प्र भूर्जयो यथा [illegible] ॥ ९२ (क)

पदपाठः । [illegible] १ । उद[illegible]हन् क्रि० । दिवः ६ । पृष्ठानि २ [illegible] क्रि० । प्र अ० । भूर्जयः १ । यथा अ० । पथः २ । [illegible] २ । अङ्गिरसः १ । ययुः क्रि० ।

अन्वयः । एते अङ्गिरसः इतः दिवः पृष्ठानि आरुहन् [ततः] द्यां प्रययुः, यथा भूर्जयः (=भूर्जयाः) पथः उदारुहन् ॥ एते अङ्गिरसः द्यां प्रययुः, इतः दिवः पृष्ठानि आरुहन्, [ततः] उदारुहन्, यथा भूर्जयः (=भूर्जयाः) पथः [गच्छन्ति] ।

आधियाज्ञिकम् । 'एते' 'अङ्गिरसः' अग्नेरङ्गाराः 'इतः' पृथिव्याः सकाशात् 'दिवः पृष्ठानि' आकाशस्य पृष्ठस्थानानि 'आरुहन्' आरोहन्ति, ततः 'द्यां' द्युलोकं 'प्रययुः' प्रयान्ति । अत्र दृष्टान्तमाह, 'यथा' 'भूर्जयः' भुवो जेतारः 'पथः' परिष्कृतमार्गान् 'उदारुहन्' उद्गच्छन्ति ।

आध्यात्मिकम् । 'एते' 'अङ्गिरसः' ब्रह्मवेत्तारः तपस्विनः 'द्याम्' अर्चिः 'प्रययुः' प्राप्नुवन्ति, 'इतः' अस्मात् 'दिवः पृष्ठानि'

(क) अथर्व० १८।१।१ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्युस्थानानि प्रकाशस्थानानि 'आरुहन्' गच्छन्ति, ततः 'उदारुहन्' उत्कृष्टं ब्रह्मलोकं प्राप्नुवन्ति। अत्र दृष्टान्तमाह, 'यथा' 'भूर्जयः' भुवो जेतारो राजानः 'पथः' परिष्कृतमार्गान् [illegible]। (क)

[illegible]

वामदेव ऋषिः। हे [illegible] हे। आ० ब्रा०) [illegible]

३ १ २ २ ३ [illegible]
राये अग्ने महे [illegible]
१ २ ३ २ ३ १ २ ३
ईड़िष्वा हि महे वृषन्द्यावा [illegible] ॥

पदपाठः। राये ४। अग्ने। [illegible] दानाय ४। समिधीमहि क्रि०। ईड़िष्वा क्रि०। हि अ०। महे ४। वृषन् सं०। द्यावापृथिवी २। होत्राय ४।

अन्वयः। हे वृषन्! अग्ने! महे राये त्वा [हविषः] दानाय समिधीमहि, [त्वञ्च] महे होत्राय हि द्यावापृथिवी (=द्यावापृथिव्यौ) ईड़िष्वा।

भाष्यम्। हे 'वृषन्' कामाभिवर्षक 'अग्ने' भौतिक! परमात्मन्! वा 'महे राये' महते धनाय 'त्वा' त्वां हविषः पूजादिकस्य वा 'दानाय' 'समिधीमहि' सम्यक् प्रदीपयामः, सम्यग्ध्यायेम

(क) अस्मिन् मन्त्रे ब्रह्मवेत्तॄणां तपस्विनां ब्रह्मलोकगमनं दर्श्यते, इदमेव स्पष्टीकृतं यास्केन—'अथ ये हिंसासत्यशून्य विद्यामाश्रित्य महत्तपस्तेपिरे ज्ञानोक्तानि वा कर्माणि कुर्वन्ति तेऽर्चिरभिसम्भवन्ति, अर्चिषोऽहः, अह्न आपूर्यमाणपक्षम्, आपूर्यमाणपक्षादुदगयनम्, उदगयनाद्देवलोकं, देवलोकादादित्यम्, आदित्याद्वैद्युतं, वैद्युतान्मानसं, मानसः पुरुषो भूत्वा ब्रह्मलोकमभिसम्भवन्ति'। नि० अ० १४। खं० ९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वा 'महे होत्राय' महते यज्ञाय हि 'द्यावापृथिवी' दिवं पृथिवीञ्च 'ईड़िष्वा' स्तुहि अनुकूलो भव, अव इति ॥ (क)

निरुक्तम् । इषा वर्षिता ॥ ११।४७।१ ॥

अष्टमी दशतिः ।

सोमा[illegible] (त्वाष्ट्रो साम । आ० ब्रा०)
अनुष्[illegible] नरनुवाके आश्विनशस्त्रे
आ[illegible] वैश्वाहे वा आज्यशस्त्र-
रूपे[illegible]

२ २ ३ २ २
दधन्वे यदीमनु वोचद्ब्रह्मेति वेः उ तत् ।
२ ३ २ ३ १ २
परि विश्वानि काव्या नेमिश्चक्रमिवाभुवत् ॥९४॥ (ख)

पदपाठः । दधन्व क्रि० । वा अ० । यत् २ । इम् २ । अनु अ० । वोचत् क्रि० । ब्रह्म २ । इति अ० । वेः क्रि० । उ अ० । तत् २ । परि अ० । विश्वानि २ । काव्या २ । नेमिः १ । चक्रम् २ । इव अ० । अभुवत् क्रि० ।

अन्वयः । [यजनशीलः] ईम् (=एनम्) अनु (=लक्षीकृत्य) यत् दधन्वे [यत्] ब्रह्म इति वा वोचत् [सोऽग्निः] तत् वेः उ, विश्वानि काव्या (=काव्यानि) परि अभुवत्, नेमिः चक्रम् इव ।

भाष्यम् । यजनशीलः 'ईम्' एनमग्निं परमात्मानं वा 'अनु' लक्षीकृत्य 'यत्' यज्ञादिकं 'दधन्वे' धारयति यत् 'ब्रह्म' वेदरूपं स्तोत्रम् 'इति वा' 'वोचत्' वदति सोऽग्निरीश्वरो वा 'तत्' सर्वं 'वेः उ' जानाति स्वीकरोति, 'विश्वानि' सर्वाणि 'काव्या' काव्यानि

(क) .....'अव त्वं द्यावापृथिवी' यजुः २।९ ॥

(ख) ऋ० २।५।२६ ॥ 'ब्रह्माणि' 'अभवन्' ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऋत्विक्कर्माणि, सृष्टिरचनानि वा (क) 'परि अभुवत्' व्याप्नोति अधितिष्ठति। अत्र दृष्टान्तमाह,—'नेमिः चक्रम् इव' वह्निर्वेष्टनवलयो रथाङ्गमिव।

अथ [illegible]

पायु ऋषिः। अगस्त्य[illegible]
च रक्षोघ्नम्। आ० [illegible]
प्रातरनुवाके आश्विनश[illegible]

१ २ ३ १ २ ३ १ २
प्रत्यग्ने हरसा [illegible]
३ १ २ ३ २ ३
यातुधानस्य रक्षसो ब[illegible]

पदपा[illegible] प्रति ज०।
शृणाहि क्रि०। विश्वतः अ०। पा[illegible]
रक्षसः ६। बलम् २। न्युज क्रि०। वीर्यम् २।

अन्वयः। हे अग्ने! [त्वं] हरसा यातुधानस्य हरः बलं विश्वतः परि प्रतिशृणाहि, रक्षसः वीर्यं न्युज [च]।

भाष्यम्। हे 'अग्ने' भौतिक! परमात्मन्! वा त्वं 'हरसा' स्वतेजसा 'यातुधानस्य' पीड़ादायकस्य शत्रोः रोगादेर्वा 'हरः' हरणशीलं 'बलं' 'विश्वतः परि' सर्वतः परिगतं 'प्रतिशृणाहि' नाशय। 'रक्षसः' बाधकस्य रोगादेर्वा 'वीर्यं' बलं 'न्युज' भञ्जय च।

निरुक्तम्। हर इति क्रोधनाम ॥ ३।९।१३ ॥ हरो हरतेः ॥ ४।१९।४ ॥ शृणातीति वधकर्मा ॥ ३।१०।४ ॥

(क) कवयो मेधाविनः ऋत्विजस्तत्सम्बन्धीनि कर्माणि, कविः क्रान्तदर्शन ईश्वरस्तत्सम्बन्धीनि कर्माणि विश्वरचनादीनि ॥

(ख) ऋ० ८।४।९ ॥ 'विश्वज' 'प्रति' ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ षष्ठी ।

प्रस्कण्व ऋषिः । मानवं साम मनुना दृष्टं (मानवं च । आ० ब्रा०) अनुष्टुप् । अग्निः । विनियोगस्तु प्रातरनुवाके आश्विनशस्त्रे च विशेषेण ग[illegible] रात्रयागस[illegible] विष्टेऽहनि ।

१ २ [illegible] ३ २ ३ २
त्व[illegible] [illegible]त्याᳬ उत ।
[illegible]
[illegible]म् ॥ ९६ ॥ (क)

[illegible]पाठ [illegible] । वसून् [illegible] । इह अ० । रु[illegible] २ । आ[illegible] । यजा[illegible] । स्वध्वरम् २ । जनम् २ । मनुज[illegible]म् २ ।

अन्वयः । [illegible]न ! त्वम् इह [illegible]द्रान् आदित्यान् उत (=[illegible]) स्वध्वरं मनुजातं घृतप्रुषं जनं यजा ।

आधियाज्ञिकम् । हे 'अग्ने' यज्ञाग्ने ! 'त्वम्' 'इह' कर्मणि यज्ञे इति अष्ट 'वसून्' एकादश 'रुद्रान्' द्वादश 'आदित्यान्' 'उत' च 'स्वध्वरं' शोभनयागयुक्तं 'मनुजातं' परमात्मनोत्पादितं 'घृतप्रुषं' घृतस्य सेक्तारं 'जनं' यजनशीलं मनुष्यं 'यजा' यज सङ्गमय । यज्ञेन सर्वे देवास्तृप्यन्तीति भावः । ४८ मन्त्रो द्रष्टव्यः ।

आध्यात्मिकम् । हे 'अग्ने' परमात्मन् ! 'त्वम्' 'इह' कर्मणि यज्ञे इति 'वसून्' कृतचतुर्विंशतिवर्षब्रह्मचर्यान् पण्डितान् 'रुद्रान्' आचरितचतुश्चत्वारिंशद्वर्षब्रह्मचर्यान् महाबलान् 'आदित्यान्' समाचरिताष्टचत्वारिंशत्संवत्सरब्रह्मचर्यानखण्डितव्रतान् 'उत' अपि च 'स्वध्वरं' शोभनयज्ञं 'मनुजातं' मननशीलेन प्रजा-

(क) ऋ० १।३।२१ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पतिनोत्पादितं 'घृतप्रुषं' ब्रह्मानन्दरसेन पुष्टं 'जनं' विद्वांसं मनुष्यं च 'यज' अस्माभिः सह सङ्गमय। (क)



अन्वारभामहे (९१)—अनु+आ[illegible]

अभुवत् (९४)—भवते लं[illegible]

आदित्यम् (९१)—'दा[illegible]

[illegible]

इतः (९२)—'पञ्चम्याजसिल्' ५।३।७ 'इदम इश्' ५।३।३। [illegible]

ईम् (९४)—ई+मुच्। अव्ययम्।

उदारुहन् (९२)—उत्+आ+'रुह' बीजजन्मप्रादुर्भावे च भ्वा० लङ्।

काव्या (९४)—कवेरिदं कर्म भावो वा 'गुणवचन०' ५।१।१२४ इति ष्यञ्। सुपां सुलुगिति डा।

घृतप्रुषम् (९६)—घृत+'प्रुष' स्नेहनसेवनपूरणेषु क्र्या० क्विप्। घृतस्य पूरयिता सेवयिता वा घृतप्रुड् तम्।

(क) पुरुषो वाव यज्ञस्तस्य यानि चतुर्विँशतिवर्षाणि तत्प्रातःसवनं चतुर्विँशत्यक्षरा गायत्री गायत्रं प्रातः सवनं तदस्य वसवोऽन्वायत्ताः प्राणा वाव वसव एते हीदँ सर्वं वासयन्ति॥ अथ यानि चतुश्चत्वारिँशद्वर्षाणि तन्माध्यन्दिनँ सवनं चतुश्चत्वारिँशदक्षरा त्रिष्टुप् त्रैष्टुभं माध्यन्दिनँ सवनं तदस्य रुद्रा अन्वायत्ताः प्राणा वाव रुद्रा एते हीदँ सर्वँ रोदयन्ति॥ अथ यान्यष्टाचत्वारिँशद्वर्षाणि तृतीयसवनमष्टाचत्वारिँशदक्षरा जगती जागतं तृतीयसवनं तदस्यादित्या अन्वायत्ताः प्राणा वावादित्या एते हीदँ सर्वमाददते॥ छा० प० ३। कां० १६।१,२,५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चक्रम् (९४)—क्रियतेऽनेन। घञर्थे कः। 'के क्लृप्ता०' वा० ६।१।१२ इति द्वित्वम्। अर्द्धर्चादिः। यद्वा 'स्थायि०' इति रक्। 'चक' तृप्तौ प्रतिघाते च भ्वा०।

दधन्वे (९४)—'धवि' गतौ भ्वा० प० से० लिटि प्रथमैकवचने।

दानाय (९३)—द्यति अनेन। ल्युट्। दीयते इति। भावे कर्मणि वा ल्युट्। तस्मै।

द्यावापृथिवी (९३)—द्यौश्च पृथिवी च ते। दिवोद्यावा' ६।३।२९ इति द्यावादेशः।

नेमिः (९४)—नयति [illegible] 'नियो मिः' [illegible] इति मिः। गुणः।

न्युब्ज (९५) [illegible]

भूर्जयः (९२) [illegible] जि जये अन्येभ्योऽपीति विच्, भूर्जयाः

य[illegible]।

रा[illegible] निन्। राजते प्रकाशतेऽसौ

[illegible]

वरू[illegible] (९)—'कृञ्[illegible] णम्।

विद्[illegible]—'पञ्चम्या[illegible]।

विष्णुम् (९१)—'विष्लृ' व्य[illegible] उ० ३।३९ [illegible]। वेवेष्टि व्याप्नोति

[illegible]चरं जग[illegible]।

वीर्यम् (९[illegible] विक्रान्त[illegible] उ० 'ऋहलोर्ण्यत्' ३।१।१२४ इति ण्यत् बाहुलकात्। [illegible]मिति वीर्यम्।

वृषन् (९३)—'वृषु' [illegible]० 'कनिन्युवृषि०' उ० १।१५६ इति कनिन्। सं०

बृहस्पतिम् (९१)—'तद बृहतोः करपत्योश्चरदेवतयोः सुट् तलोपश्च' वा० ६।१।१५७।

वेः (९४)—अवेः। विदो लङि मध्यमैकवचने 'बहुलं छन्दसमाङ् योगेऽपि' ६।४।७५ इत्यडभावः।

वोचत् (९४)—अवोचत्।

श्रणाहि (९५)—'श्र' हिंसायाम् क्र्या०।

सोमम् (९१)—'अर्त्तिस्तु०' उ० १।१४० सवति ऐश्वर्यहेतुर्भवतीति सोमस्तम्।

हरसा (९५)—हरतेः सर्वधातुभ्योऽसुन्नित्यसुन्। हरतीति हरो बलं तेन।

होचाय (९३)—'हु या०' उ० ४।१६८ इति चन्। हूयत इति होत्रं होम स्तुत्यं।

इति दशमी दशतिः दशमः खण्डश्च।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रथमम् (आग्नेयं) पूर्वं । प्रथमोऽध्यायः । प्रथमः प्रपाठकः । एकादशः खण्डः । एकादशी दशतिः ।

[illegible]

दीर्घतम[illegible] न
दृष्टे, त्रीणि [illegible] न
तीदानि, [illegible] ा
सर्वाणि [illegible]
उष्णिक् छ[illegible]
शस्त्रे च ।

३ १ २ ३ २ ३ १ २
पुरु त्वा दाशिवा[illegible] वोचेऽरि अग्ने [illegible]
३ १ २ ७ ३ १ २
तोदस्येव शरण आ महस्य ॥ ९७ ॥ (ख)

पदपाठः । पुरु २ । त्वा २ । दाशिवाङ् १ । वोचे क्रि० । अरिः १ । अग्ने सं० । तव ६ । स्वित् अ० । आ अ० । तोदस्य ६ । इव अ० । शरणे ७ । आ अ० । महस्य ६ ।

अन्वयः । हे अग्ने ! दाशिवाङ् अरिः [अहं] तव स्वित् आ शरणे त्वा पुरु वोचे, महस्य तोदस्य इव ।

भाष्यम् । हे 'अग्ने' यज्ञाग्ने ! परमात्मन् वा 'दाशिवाङ्' हविर्दाता, सर्वस्य दाता वा 'अरिः' परिचरणशीलः

(क) 'उष्णिग्गायत्री जागतस्य' पि० छ० ३।१८ यत्र गायत्रावष्टाक्षरौ पादौ जागतस्य द्वादशाक्षरः एवं त्रिभिः पादैरुष्णिङ् नाम छन्दो भवति ।

(ख) ऋ० २।२।१९ ॥ 'दाश्वान्' ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अहं 'तव' 'स्वित् आ' एव 'शरणे' गृहे आश्रये इति 'त्वा' त्वां 'पुरु' बहु 'वोचे' स्तौमि। अत्र दृष्टान्तमाह, 'महस्य' महतः 'तोदस्य' शिक्षकस्य 'इव'।

निरुक्तम्। तोदस्तुद्यतेः॥ बहुदाश्वांस्त्वामेवाभिह्वयामि॥ अरिरमित्र [illegible] ॥ [illegible]रोऽप्यरिरितस्मादेव। यदन्यदेवत्या अग्नावा[illegible] [illegible]च्यत्॥...तुदस्येव शरणेऽधि-महत[illegible] [illegible]म॥ ३।२३।८॥

[illegible] (श्यावा-श्वस[illegible] [illegible]तरनुवाके।

१ २र ३ २उ ३ ३ २
प्र होत्रे पूर्व्यं वचोऽग्नये भरता बृहत्।
३ १र २ ३ २ ३ १ २
विपां ज्योतींष्यि विभ्रते न वेधसे॥ ९८॥ (क)

पदपाठः। प्र अ०। होत्रे ४। पूर्व्यम् २। वचः २। अग्नये ४। भरता क्रि०। बृहत् २। विपाम् ६। ज्योतींषि २। विभ्रते ४। न अ०। वेधसे ४।

अन्वयः। [हे मनुष्याः! यूयं] विपां ज्योतींषि विभ्रते वेधसे न होत्रे अग्नये पूर्व्यं बृहत् वचः प्रभरता।

भाष्यम्। हे मनुष्याः! यूयं 'विपां' विप्राणां मेधाविनां 'ज्योतींषि' सत्कर्माद्यनुष्ठानसम्पाद्यानि तेजांसि 'विभ्रते' धारयते 'वेधसे न' यज्ञविधात्रे परमात्मने इव, ब्रह्मणे इव वा 'होत्रे' होम-

(क) ऋ०॥३।११।७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निष्पादकाय सुखदात्रे वा 'अग्नये' भौतिकाय परमात्मने वा 'पूर्व्ये' सनातनं 'बृहत्' महत् 'वचः' सूक्तादिरूपं 'प्रभरता' प्रब्रूत।

निरुक्तम्। पूर्व्यमिति पुराणनाम ॥ ३।१९।२३ ॥

गोतम [illegible] व
अन्ने वा [illegible]
प्रातरनुव[illegible]

३ १
अग्ने व[illegible]

३ १ २
अस्मे देहि [illegible]

पदपाठः। अग्ने सं०। [illegible]
ईशानः १ [illegible] सहसः ६। यहो सं०। [illegible]
जातवेदः सं०। महि २। श्रवः २।

अन्वयः। हे सहसः यहो! अग्ने! [त्वं] गोमतः वाजस्य [च] ईशानः [असि] हे जातवेदः! महि श्रवः अस्मे देहि।

भाष्यम्। हे 'सहसः यहो' बलस्य पुत्र! आत्मबलस्य पालक वा 'अग्ने' भौतिक! परमात्मन्! वा त्वं 'गोमतः' गवादिपशुमत्त्वस्य प्रकाशस्य ज्योतिषो वा 'वाजस्य' अन्नस्य विज्ञानस्य च 'ईशानः' ईश्वरः असि। हे 'जातवेदः' जातधन! सर्ववेदितः वा 'महि' प्रभूतं 'श्रवः' अन्नं, ज्ञानं वा 'अस्मे' अस्मभ्यं 'देहि'।

निरुक्तम्। यहु रित्यपत्यनाम ॥ ३।१।३ ॥

(क) ऋ० १।५।२७ ॥ 'देहि' ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ श्रीः ॥
हरिः ॐ

त्वेषं शुभ्रमरुष्वीतं दिवि संदृक्क आततः ।
सूर्यो नहि द्युतां त्वं कृपा पावक रोचसे ॥८३॥
त्वं हि क्षैतवेधसोऽग्ने मित्रो न पत्यसे ।
त्वं विचर्षणिश्रवो वसो बुष्टिं न पुष्यसि ॥८४॥
प्रातरग्निः पुरुप्रियो विश्पतिर्वेत्यतिथिः ।
विश्वं यो मर्त्यं हव्यं मर्तासश्चिद्धवामहे ॥८५॥
यद्वा हि ष्ठ तदग्नये बृहद्यजे विभावसो ।
महि षु वेदथो यथा स्वध्वरा करते ॥८६॥
विशो विशो वो अतिथिं वाजयन्तः पुरुप्रियम् ।
अग्निं वो दुर्यं वचः स्तुषे सूषस्य मन्मभिः ॥८७॥
बृहद्वयो हि भानवेऽर्चा देवायाग्नये ।
यं मित्रं न प्रशस्तये मर्तासो दधिरे पुरः ॥८८॥
अगन्म बृहतो वयं जेष्ठं नाग्निमानवे ।
यः स्मा पूर्व निषीदति बृहदनीक ईड्यः ॥८९॥
जातः परेण धर्मणा यः सद्वृद्धः सहस्रकः ।
पिता यत्पुत्रमभि श्रेष्ठो मतीनां क्रतुः ॥९०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सोमं राजानं वरुणमग्निमन्वारभामहे ।
आदित्यं विष्णुं सूर्यं ब्रह्माणं च बृहस्पतिं ॥१
इत एतु दशहोतारः पृष्ठाभ्यां कुह्वा ।
प्र मुञ्चेथां यथा पथो द्यामगिरसायथः ॥२
रायो अग्ने महस्वतो दानाय समिधीमहि ।
इष्वा हि मह वृषन्यज्ञो होतायमस्वा ॥३
दधन्वा यदीमनु वोचद्ब्रह्मातेरुतत ।
परि विश्वानि काव्या नेमिश्चक्रमिवाभुवत ॥४
त्रयो मह्यं सोहवं शृणोतु विश्वे तस्य ।
यातुधानस्य रक्षसो विद्युद्रथवीर्यं ॥५
त्वमग्ने वसूँ रुद्रानादित्यानुत ।
यजा स्वध्वरे जन मनुजातं घृतप्रुषम् ॥६
पुरूरवो दाशिमा त्वा वाचा गृत्वेव सिन्धवः ।
तादस्य वरुणो आ महस्य ॥१७॥
प्र होत्रे पूर्वं वचो ऽग्नये रत्नधातमं बृहत् ।
विपां ज्योतीं षि बिभ्रते नवं धर्म ॥१८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अग्ने वाजस्य गोमत ईशानः सहसो यहो।
अस्मे देहि जातवेदो महि श्रवः ॥९९॥
अग्ने यजिष्ठो अध्वरे स्वाहुतो नरां यज।
होता मन्द्रो विराजसि ॥१००॥
जन्मानः सप्त मातृभिर्मेधामाशासत श्रिये।
अयं ध्रुवो रयीणां चिकेतदा ॥१०१॥
उत स्यानो दिवा मतिरदितिस्तोकमीमहे।
सा राता मयस्करदप स्रिधः ॥१०२॥
इष्टा हि प्रतियन्तवे जातवेदः समिद्धिषे।
वीहि स्वध्वरं हविः स्वाहाकृतं हविष्मते ॥१०३॥
न तस्य मायया च न रिपुरीशीत मर्त्यः।
यो अग्नये ददाशद्धविः ॥१०४॥
अपेत्य वृजिनं रिपुं स्तेनमग्ने दुरध्यं।
देवि ह्यस्य सप्रथः ॥१०५॥
शृष्ट्यग्ने जनस्य मे स्तोमस्य वीहि विश्पते

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नि मायिनस्तपसा रक्षसो दह ॥१०६॥
प्रमथ्नीहि पायुगायतमुत ताञ्जातवेदसि
उपस्तृणीहि समिधमग्नये ॥१०७॥
प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः।
यस्य त्वं सख्यमावि थ ॥१०८॥
तं गूर्धया स्वर्णरं देवासो देवमरतिं दधिरे।
देवत्रा हव्यमूहिषे ॥१०९॥
मानो हृणीथा अतिथिं वसुरग्निः पुरुप्रशस्तो एषः।
यः सुहोता स्वध्वरः ॥११०॥
भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः।
भद्रा उत प्रशस्तयः ॥१११॥
यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारं मर्त्यं।
अस्य यज्ञस्य सुक्रतुम् ॥११२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तदग्ने द्युम्नमा भर यत्सासाहा सदने कं चिदत्रिणं।
मन्युं जनस्य दूढ्यम्॥१३॥
वेधा उ विरूपातिः शिरोः सुप्रीतो मनुषो विरो।
विश्वेदग्निः प्रतिरूपो रसिसधीति॥१४

॥ इति प्रकीर्तितं आग्नेयं पर्व-
-समाप्तम्॥

॥ ह्रीं ॐ
॥ ॐ शांतिः ॐ शांतिः ॐ शांति।
॥ सम्भूयात्॥

काशी

॥ समाप्त॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वेषस्तेधूमः कृण्वति दिवि सञ्चुक्र आ
ततः

त्वेषस्तेधूम कृण्वति दिवि संच्छुक्र आततः।
सूरो नहि द्युता त्वं कृपा पावक रोचसे ॥५॥
त्वं हि सैन्धवाय्यश्वोऽग्ने मित्रो न पत्यसे।
त्वं विचर्षणे श्रवो वसो पृष्टिं न पुष्यसि ॥८४॥ प्रातरग्निः पुरुप्रियो विश
स्तवे ता निधिः। विश्वेयस्मिन्नमर्त्य
हव्यं मर्तास ऊह्यतेः ॥८५॥ यद्ध
क्षिष्ठं तदग्नये बृहदर्च विभावसो।
महिषीव त्वद्रयिस्त्वदा जातमुदीरते
॥८६॥ विशो विश्वीरवो अतिथिं वाज
पत्नीः पुरुप्रियम्। अग्निं वो दुर्धर्ष
वः सूक्षे शवसस्य मन्मभिः ॥८७॥
बृहद्वो हि भानवेऽर्चा देवायाग्न
ये। यं मित्रं न प्रशस्तये मर्तासो
दधिरे पुरः ॥८८॥ अगन्म बृहन्न
मज्येष्ठमग्निं मानवम्। यः समिद्ध
स्तनीतनूक्ष्यर्चिर्बृहदनीक ऊह्यते
॥८९॥ आतः परेण धर्मणा य
त्स वृद्धिः सहाभुवः। पिता यत्कर्षय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पस्याग्निः श्रद्धा माता मनुः कविः ॥
८० ॥ इति नवमी दशतिः ॥ नवमः खण्ड
श्च ॥ ॐ सोमं राजानं वरुणमग्निमन्वारभामहे ॥ आदित्यं विष्णुं सूर्यं ब्र
ह्माणं च बृहस्पतिम् ॥ ८१ ॥ इत एते उदा
रुहन्दिवः पृष्ठान्यारुहन् ॥ ग्रभूर्नयो
यथा पथो या भिरसो पद्यः ॥ ८२ ॥
रयेऽग्निं महे त्वादानाय समिधी
महि ॥ ईडिष्वा हि महे बृषं यो वो होता
पुरोहितः ॥ ८३ ॥ दधन्वे वा यदीमनु
नो चङ्कूलेव वित्सरत् ॥ परि विश्वानि काव्या
नेमिश्चक्रमिवाभवत् ॥ ८४ ॥
प्रत्यग्निं हरसा हरः शृणाद्वि विश्वतस्परि ॥ यात्धानस्य रक्षसो बलं न्यं
ब्रवीर्यम् ॥ ८५ ॥ त्वमग्ने वसूँरिह
रुद्राँ आदित्याँ उत ॥ यजा स्वध्वरं
जनं मनुजातं घृतप्रुषम् ॥ ८६ ॥
इति दशमी दशतिः दशमः खण्डः ॥
ॐ पुरुत्वा दाशिवाँ वोचेऽग्ने मर्तो
रिरग्नेतवस्विदा ॥ तोदस्येव शरणा
आमहस्य ॥ ८७ ॥ प्र होत्रे पूर्व्यं वचो
ग्नये भरता बृहत् ॥ विपां ज्योतीं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बि विभ्रतेन वेधसा॥९०॥ अग्ने या
जस्य गोमत ईशान सहसो यहो॥
अस्मे देहि जातवेदो महि श्रव ॥९९॥
अग्ने यजिष्ठो अध्वरे देवान्देवयते
यज ॥ होता मन्द्रो विराजस्पतिस्त्विध:
॥१०॥ यस्त्वान: सप्त मातृभि र्मेधा मा
शासत श्रिये ॥ अयं ध्रुवो रयीणां चि
केतद ॥१०१॥ उत स्यो नो दिवा मति
रदितिस्त्रात्यगन्हसा ॥ सा शंताता मयस्क
रदपस्त्विध: ॥१०२॥ इडिष्वा हि प्रतीव्यं ३
यजस्व जातवेदसम् ॥ चरिष्णु धूममग
भीतशोचिषम् ॥१०३॥ न तस्य माय
या च न रिप्र सीद्वीत मर्त्य: ॥ यो अग्न
वेद दाशुषे हव्यदातये ॥१०४॥ अपत्यं व
जिन रिष्टं सन मग्ने दुराध्यम् ॥ दवि
ष्ठमस्य सत्पते कृधी सुगम् ॥१०५॥
अग्ने जयन्नवस्य मे स्तोमस्य वीर
विश्पते ॥ नि माय्यि नस्तपसा रक्षसो
दह ॥१०६॥ इति प्रथमा दशति: एका दश:
रचा ऽग्न्य ॥ ॐ प्र मंहिष्ठा य गायत
ऋतावानो ऋतेषु रोचि ष्ठा ॥
उप स्तृणीत सो अग्नये ॥१०७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रसो अग्ने तवाभिभिः सवीरा
भिस्तारति वाजकर्मभिः ॥ पस्यत्वं
सख्य मानिष ॥१८॥ तं गृह्य पा
स्वरीरं देवा सो देव मरतिं द
धन्विरे ॥ देवंगा हव्य मूहिषे ॥१९॥
मानो हा पीपा अतिथिं वसुरग्नि
उ सप्रशस्त एष ॥ यः सुहोता स्वध्व
रः ॥२०॥ भद्रो नो अग्निराहुतो
भद्रा रातिः सुभग भद्रो अध्वरः ॥
भद्रा उत प्रशस्तयः ॥२१॥ यजि
ष्ठं त्वा ववृमहे देवं देवत्रा होतार
मर्त्यम् ॥ अस्य यज्ञस्य सुक्रतुं
॥२२॥ तदग्ने द्युम्नमा भर यत्सा
सा हा सदने कं चिदत्रिणम् ॥
मन्युं जनस्य दूढ्यम् ॥२३॥ यद्वा
उ विश्पतिः शितः सुप्रीतो मनुषो
विशे ॥ विश्वेदग्निः प्रति रक्षां
सि सेधति ॥२४॥ इति द्वितीया
यदशतिः ॥ द्वादश खण्डाः ॥

इति आग्नेयं पर्व
सम्पूर्णं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

७१

मधुसूदन-गरन्थ

नरेशकुमार-भगवानदास

काशी हिंदु वि ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीः

ॐकारः प्रणवः सर्वव्यापी महेश्वरः॥

ॐकारः प्रणवः सर्वव्याप्यमनाश्च
तारकः॥ शुद्धः शुक्लो वैद्युतश्च पार
ब्रह्मैक एवच॥१॥ एको रुद्रस्तथे
शानो भगवांश्च महेश्वरः॥ महादेव
स्तथा विष्णुर्ब्रह्मा चैव प्रजापतिः॥२॥

(१) तारण्डब्राह्मणम्। (२) षड्विंश ब्राह्मणम्। (३) सामविधानब्राह्मणम्। (४) आर्षेयब्राह्मणम्। (५) दैवताध्यायब्राह्मणम्। (६) उपनिषद्ब्रा०। (७) वंशब्राह्मणम्।

ॐ हणायनं, शाट्यमुग्रीव्यास, भागुरिस्त्री लुण्डी, गोलुलवि, मानुमानौपमन्यव, का सृष्टि, मशकगार्ग्य, गार्ग्य, कुष्ण मे, शाल होत्रे, जैमिनि, ये उपाध्यायों मे सामगाना यां: स्वसि कुर्वन्तर्पिताः- सामतर्पणम्॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

४२२

१, स्वाध्याय मंडल

ओंध

सीताराम

ज्योतिषी

संस्कृत प्रेस ज्योतिषी

२, कर्ण गली मंदिर

कलकत्ता

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri